**The Rasārṇavam, or The ocean of mercury and other metals and minerals / edited by Praphulla Chandra Ray and Harischandra Kaviratna.**

**Contributors**

Rāy, Praphullacandra, 1861-1944.
Kaviratna, Hariścandra.
Asiatic Society of Bengal.
University of Glasgow. Library

**Publication/Creation**

Calcutta : Satya Press, 1910.

**Persistent URL**

https://wellcomecollection.org/works/tevgqvrf

**Provider**

University of Glasgow

**License and attribution**

This material has been provided by This material has been provided by The University of Glasgow Library. The original may be consulted at The University of Glasgow Library. where the originals may be consulted.
Conditions of use: it is possible this item is protected by copyright and/or related rights. You are free to use this item in any way that is permitted by the copyright and related rights legislation that applies to your use. For other uses you need to obtain permission from the rights-holder(s).

wellcome collection

Wellcome Collection
183 Euston Road
London NW1 2BE UK
T +44 (0)20 7611 8722
E library@wellcomecollection.org
https://wellcomecollection.org

For Consultation Only

Glasgow
University Library

via veritas vita

X 646

Oriental Series

O.1.1.2

30114013914158

BIBLIOTHECA INDICA:

A

Collection Of Oriental Works

PUBLISHED BY

THE ASIATIC SOCIETY OF BENGAL.

New Series Nos. 1193, 1220 and 1238.

---

# THE RASĀRNAVAM

or

The ocean of mercury and other metals and minerals.

EDITED BY

PRAPHULLA CHANDRA RAY, D.Sc. Ph.D.,

*Professor of Chemistry, Presidency College, and Author of "History of the Hindu Chemistry"*

AND

PANDITA HARISCHANDRA KAVIRATNA,

*Late Professor of Sanskrit, Presidency college, Calcutta.*

CALCUTTA:

Printed by Hitavrata Chattopádhyáya,

at the Satya Press, 27, Ghose Lane,

1910.

# रसार्णवम्

पारदादिरसोपरसविषयकं तन्त्रम्


श्रीलश्रीयुक्त-

वङ्गदेशीयासियाटिकसमितेरनुज्ञया

कलिकाता-प्रेसिडेन्सीकलेजे रसायनाध्यापकेन

डि. एस्‌सि.—पि एइच्. डि.—उपाधिद्वयधारिणा

हिन्दुरसायनेतिहासप्रणेत्रा

श्रीप्रफुल्लचन्द्र-रायेण

तथा

तस्यैव कलेजस्य संस्कृताध्यापकवरेण

श्रीहरिश्चन्द्र-कविरत्नेन

संकलितं संशोधितञ्च।



कलिकाता-राजधान्याम्

घोषवर्त्मनि २७ संख्यक-भवने सत्ययन्त्रे

श्रीहिमव्रतचट्टोपाध्यायेन मुद्रितम्

पार्कवर्त्मस्थ-५७-संख्यकभवनात्

प्रकाशितञ्च।

शकाब्दाः १८३२।

# PREFACE

While collecting materials for my History of Hindu Chemistry I was very much struck with the wealth of information and chemical knowledge of which Rasárnava is the repository. Thus 'Nature' in its review of the "History of Hindu Chemistry" (Vol. I) speaking of the progress of chemistry in ancient India quotes two remarkable passages from Rasárnava :

> "Copper yields a blue flame...that of tin is pigeon-coloured ; that of lead is pale-tinted,"

and as another example :—

> "A pure metal is that which, when melted in a crucible, does not give off sparks, nor bubbles, nor spurts, nor emits any sound, nor shows any lines on the surface, but is tranquil as a gem" (see pp. 51-52 vs. 49-52.) *

Among the alchemical Tantras Rasárnava holds a unique position and I have referred to it in the following terms in the Introduction to the History of Hindu Chemistry, Vol. I., 2nd ed. Intro. lxxxiii :

"It is to be regretted that of the several works quoted by Mádhava Rasárnava alone seems to have survived to our days. This work is almost unknown in Bengal, and extremely rare even in N. India and the Deccan. We have been fortunate enough

* "Nature", 1903, LXVIII, 51.

to procure a transcript of it in the Raghunátha Temple Library, Kashmir, and another from the Oriental MSS. Library, Madras. As one of the earliest works of the kind, which throws a flood of light on the chemical knowledge of the Hindus about the 12th century A.D., Rasárnava must be regarded as a valuable national legacy. It has, besides, the merit of being the inspirer of several works of the Iatro-chemical period, notably Rasaratna-samuchchaya and Rasendrachintámani."

It was thought highly desirable that the full and correct text of this great Tantra be presented to the world, and the Publication Committee of the Bibliotheca Indica have laid me under a debt of obligation by acceding to my request to include it in their series. A serious difficulty, however, arose in the way of restoring the text. The MSS. mentioned above were both faulty and defective. I was, however, fortunate in procuring three more transcripts from the libraries of Bikanir, the Deccan and Mysore respectively. The text of the present work is thus based upon a careful collation of five distinct MSS. It is a remarkable fact that these MSS., though procured from such widely divergent sources, often concur in repeating the same errors. There is a close agreement between the MS. of Bikanir and that of Kashmir—possibly they are both derived from the same exemplar. The Kashmir MS. has been found to be on the whole complete and reliable, and it has been mainly followed. The other MSS. are more or less fragmentary, but these *disjecta membra* have been of signal service in throwing light upon doubt-

ful passages. Additional help has also been derived from a comparison of several extracts from Rasárnava with which Rasendrachintámani, Rasaratnasamuchchaya, Sarvadarsanasamgraha., Yogatarangini etc. abound. In spite of all these collateral advantages there was much that could be desired. While the third and concluding part of the present work was in the press, I received a letter from Kaviráj Durgánáráyan Sen Sástrí, who had been to Jammu on a professional visit, volunteering his services for the search of rare Sanskrit MSS. bearing upon Chemistry and Medicine. Among the several MSS. which the scholarly instinct of the Kaviráj had hit upon was one entitled Rasakámadhenu. Although this work is merely a compilation, it proved to me like a God-send, as it is full of lengthy extracts from Rasárnava of remarkable textual accuracy. Indeed, so material has been the help rendered by Rasakámadhenu that it has been thought advisable to draw up a list of corrections based upon this work and it has been inserted as an appendix.

As the Preface appears over my signature alone. I avail myself of this opportunity of expressing my deep obligations to my collaborator, Pandit Harischandra Kaviratna, on whom has mainly devolved the vast labour of going carefully and critically through the text of the MSS. He has also drawn up the exhaustive table of contents (अनुक्रमणिका) and the alphabetical index with glossary of technical terms. It is to be hoped that even a casual reader will have no difficulty in finding out the particular information he is in need of.

I have not attempted here any historical review of the Rasárnava. The probable date of the work will be found discussed at length in the History of Hindu Chemistry, Vol. I. Introduction, under the *Tantric Period* and in Vol. II., Intro., ch. I., under the *age of Nógárjuna and the alchemical Tantras.*

P. C. Rây

Presidency College,
October, 1910.

# रसार्णवम्।

ॐ श्रीगणेशाय नमः।

## प्रथमः पटलः।

यस्मिन् सर्व्वं यतः सर्व्वं यः सर्व्वं सर्व्वतश्च यः।
यश्च सर्व्वमयो नित्यं तस्मै सर्व्वात्मने नमः॥ १ ॥[1]
कैलासशिखरे रम्ये नानारत्नविभूषिते।
नानाद्रुमलताकीर्णे शुभसंबन्धवर्जिते॥ २ ॥
देवदेवं सुखासीनं नीलकण्ठं त्रिलोचनम्।
प्रणम्य शिरसा देवी पार्व्वती परिपृच्छति॥ ३ ॥

श्रीदेव्युवाच।

देवदेव महादेव काल कामाङ्गदाहक।
कुलकौल-महाकौल-सिद्धकौलादिनाशन॥ ४ ॥

---

(1) The portion from the first śloka to the first hemistich of the 54th is wanting in the Bikánir MS. (B). Ślokas from the first to the 43rd are wanting in the Madras MS. (M).

त्वत्प्रसादाच्छ्रुतं सर्व्वमशेषमवधारितम् ।
यदि तेऽहमनुग्राह्या यद्यहं तव वल्लभा ॥ ५ ॥
सूचिता सर्व्वतन्त्रेषु या पुनर्न प्रकाशिता ।
जीवन्मुक्तिरियं नाथ कीदृशी वक्तुमर्हसि ॥ ६ ॥

श्रीभैरव उवाच ।

साधु साधु महाभागे साधु पर्व्वतनन्दिनि ।
साधु पृष्टं त्वया देवि भक्तानां हितकाम्यया ॥ ७ ॥
अजरामरदेहस्य शिवतादात्म्यवेदनम् ।
जीवन्मुक्तिर्महादेवि देवानामपि दुर्ल्लभा ॥ ८ ॥
पिण्डपाते च यो मोक्षः स च मोक्षो निरर्थकः ।
पिण्डे तु पतिते देवि गर्द्दभोऽपि विमुच्यते ॥ ९ ॥
यदि मुक्तिर्भगच्छेदे किं न मुच्यन्ति[1] गर्द्दभाः ।
अजाश्च वृषभाश्चैव किन्न मुक्ता गणाम्बिके ॥ १० ॥
तस्मात् संरक्षयेत्[2] पिण्डं रसैश्चैव रसायनैः ।
शुक्रमूत्रपुरीषाणां यदि मुक्तिर्निषेवणात् ॥ ११ ॥
किन्न मुक्ता महादेवि श्वानशूकरजातयः ।
षड्दर्शनेऽपि मुक्तिस्तु दर्शिता पिण्डपातने ॥ १२ ॥
करामलकवत्[3] सापि प्रत्यक्षं नोपलभ्यते ।
अकथ्यमपि देवेशि सद्भावं कथयामि ते ॥ १३ ॥

---

(1) Káśmír MS. (K) reads मुच्यंति, which is incorrect. (2) सर्व्वदर्शनसंग्रह reads तस्मात्तं रक्षयेत्. (3) K reads करमामलवत्, which is inaccurate.

शून्यपापो मन्त्रयाजी[1] न पिण्डं धारयेत् क्वचित् ।
देवानामपि देवेशि दुर्लभं पिण्डधारणम् ॥ १४ ॥
किं पुनर्मानुषाणान्तु धरणीतलवासिनाम् ।
धर्म्मे नष्टे कुतो धर्म्मः धर्म्मे नष्टे कुतः क्रिया ॥ १५ ॥
क्रियानष्टे[2] कुतो योगः योगे नष्टे कुतो गतिः ।
गतिनष्टे[2] कुतो मोक्षो मोक्षे नष्टे न किञ्चन ॥ १६ ॥
(तेन पिण्डो महाभागे रक्षणीयः प्रयत्नतः ॥)[3]

श्रीदेव्युवाच ।

जीवन्मुक्तिस्वरूपं तु देवदेव श्रुतं मया ।
तत्प्रत्युपायं मे ब्रूहि यद्यस्ति करुणा मयि ॥ १७ ॥

श्रीभैरव उवाच ।

कर्म्मयोगेन देवेशि प्राप्यते पिण्डधारणम् ।
रसश्च पवनश्चेति कर्म्मयोगो द्विधा मतः[4] ॥ १८ ॥
मूर्च्छितो हरते व्याधिं[5] मृतो जीवयति स्वयम् ।
बद्धः खेचरतां कुर्य्यात् रसो वायुश्च भैरवि ॥ १९ ॥[6]
ज्ञानान्मोक्षः सुरेशानि ज्ञानं पवनधारणात् ।

---

(1) K reads शून्यपायामंत्रजायी, which seems to be grammatically incorrect. (2) क्रियानष्टे = क्रियानाशे ; गतिनष्टे = गतिनाशे [नपुंसके भावे क्तः]. K reads गतौ नष्टे, which is inc. (3) K adds the line within brackets without affixing a serial number to it. (4) स. द. सं. and रसेन्द्रचिन्तामणि read स्मृतः. (5) स. द. सं. reads हरति व्याधीन्. (6) The 18th and the 19th ślokas are quoted in स. द. सं.

तत्र देवि स्थिरं पिण्डं यत्र स्थैर्य्ये रसः प्रभुः ॥ २० ॥
अचिराज्जायते देवि शरीरमजरामरम् ।
मनसश्च यथा ध्यानं[1] रसयोगादवाप्यते ॥ २१ ॥
सत्वं स[2] लभते देवि ज्ञानं विज्ञानपूर्व्वकम्[3] ।
तस्य[4] मन्त्राश्च सिध्यन्ति योऽश्नाति[5] मृतसूतकम् ॥ २२ ॥
यावन्न शक्तिपातस्तु न यावत् पाश[6]कृन्तनम् ।
तावत्तस्य कुतो बुद्धिः[7] जायते मृतसूतके ॥ २३ ॥
मद्यमांसरता नित्यं भगलिङ्गेषु ये रताः ।
तेषां विनष्टबुद्धीनां रसज्ञानं सुदुर्लभम् ॥ २४ ॥
कुलशासनहीनानां सद्दर्शनमकाङ्क्षिणाम् ।
न सिध्यति रसो देवि पिबन्ति मृगतृष्णिकाम् ॥ २५ ॥
गोमांसं भक्षयेद्यस्तु पिबेदमरवारुणीम् ।
कुलीनं[8] तमहं मन्ये रसज्ञमपरेऽधमाः ॥ २६ ॥
न गर्भः संप्रदायार्थे[9] रसो गर्भो विधीयते ।
तेनायं लभते सिद्धिं न सिद्धिः सूतकं विना ॥ २७ ॥

---

(1) र. चि. reads समाधानम्. (2) सत्त्वञ्च, a variant in र. चि. (3) र. चि. reads विज्ञानं ज्ञानपूर्व्वकम्. (4) सत्वं, a variant in र. चि. which is not appropriate here. (5) K reads अश्नुते in the sense of अश्नाति. (6) र. चि. reads शक्ति, which is tautological. (7) र. चि. reads शुद्धिः. (8) अहं तं कुलीनं कुकार्य्यलीनं कदाचारं मन्ये ; कुलीनशब्दादुत्पन्नं कौलीनं लोकनिन्दा इत्यर्थः । अन्ये अधमाः तं रसज्ञं मन्यन्ते इत्यर्थः । (9) We have adopted the reading in र. चि.

यावन्न हरबीजन्तु भक्षयेत् पारदं रसम्।
तावत्तस्य कुतो मुक्तिः कुतः पिण्डस्य धारणम्॥ २८॥[1]
मद्यमांसरताप्रज्ञा[2] मोहिताः[3] शिवमायया।
जल्पन्ति च वयं मुक्ता यास्यामः शिवमन्दिरम्॥ २९॥
पिण्डधारणयोगे च निस्पृहा मन्दबुद्धयः।
खण्डज्ञानेन देवेशि रञ्जितं सचराचरम्॥ ३०॥
स्वदेहे खेचरत्वं च शिवत्वं येन लभ्यते।
तादृशे तु रसज्ञाने नित्याभ्यासं कुरु प्रिये॥ ३१॥

श्रीदेव्युवाच।

अवतारं रसेन्द्रस्य माहात्म्यं तु सुरेश्वर।
श्रोतुमिच्छामि देवेश वक्तुमर्हसि तत्त्वतः॥ ३२॥

श्रीभैरव उवाच।

साधु पृष्टं महाभागे गुह्याद्गुह्यतरं त्वया।
अनुग्रहकरं ध्यानं लोकानामुपकारकम्॥ ३३॥
त्वं माता सर्व्वभूतानां पिता चाहं सनातनः[4]।
द्वयोश्च यो रसो देवि महामैथुनसम्भवः॥ ३४॥
स्वैरतः सम्भवाद्देवि[5] पारदः कीर्त्तितो महः[6]।

---

(1) र. चि. exactly quotes this śloka. (2) K reads मद्यमांसरतां प्रज्ञा, which is inc. (3) K reads मोहिता, which seems to be an error of the scribe. (4) K reads सनातनम्, which is inc. This śloka (34th) is also found in र. चि. (5) K reads स्वैरतश्च भवोद्देवि, which is absurd, being gram. untenable. (6) K reads महा, which is inc.

पारदो गदितो यश्च परार्थं साधकोत्तमैः ॥ ३५ ॥
सूतोऽयं[1] मत्समो देवि मम प्रत्यङ्गसम्भवः ।
मम देहरसो यस्मात् रसस्तेनायमुच्यते[2] ॥ ३६ ॥
दर्शनात् स्पर्शनात् तस्य भक्षणात् स्मरणादपि[3] ।
पूजनाच्च प्रदानाच्च[4] दृश्यते षड्विधं फलम् ॥ ३७ ॥
केदारादीनि लिङ्गानि पृथिव्यां यानि कानि च[5] ।
तानि दृष्ट्वा तु यत्पुण्यं तत्पुण्यं रसदर्शनात् ॥ ३८ ॥
चन्दनागुरुकर्पूरकुङ्कुमान्तर्गतो रसः ।
मूर्च्छितः शिवपूजायां[6] शिवसान्निध्यसिद्धये ॥ ३९ ॥
भक्षणात् परमेशानि हन्ति पापत्रयं रसः ।
तथा तापत्रयं हन्ति रोगान् दोषत्रयोद्भवान् ॥ ४० ॥
दुर्लभं ब्रह्मनिष्णातैः[7] प्राप्यते परमं पदम् ।
हृद्व्योमकर्णिकान्तःस्थ-रसेन्द्रस्य महेश्वरि ॥ ४१ ॥[8]
स्मरणान्मुच्यते[9] पापैः सद्यो जन्मान्तरार्जितैः ॥ ४२ ॥
स्वयंभूलिङ्गसाहस्रैः[10] यत्फलं सम्यगर्चनात् ।

---

(1) स. द. सं. reads सुप्तोऽयम्. (2) K reads रसमेनं समुच्यते, which is gram. inc. We have adopted the variant in स. द. सं. (3) र. चि. reads स्मरणात् प्रिये. (4) स. द. सं. reads पूजनात् रसदानाच्च. This variant exactly agrees with that in र. चि. (5) स. द. सं. and र. चि. read कानिचित्. (6) शिवपूजा सा, a variant in र. चि. (7) र. चि. reads ब्रह्मविष्ण्वाद्यैः. (8) The reading in र. चि. is as follows :—तद्व्योमकर्णिकान्तःस्थं रसेन्द्रं परमेश्वरि. (9) स्मरन् विमुच्यते, a variant in र. चि. (10) K reads साहस्रैः, which is inc.

तत्फलं कोटिगुणितं रसलिङ्गार्चनाद्भवेत् ॥ ४३ ॥
अधमः खगवादस्तु[1] बिलवादस्तु मध्यमः ।
उत्तमो मन्त्रवादस्तु रसवादो महोत्तम.[2] ॥ ४४ ॥
मन्त्रतन्त्रपरिज्ञाने रसयोगस्य[3] दूषकाः[4] ।
प्रयान्ति नरकं[5] सर्व्वे छित्त्वा सुकृतसञ्चयम् ॥ ४५ ॥
रसविद्या परा विद्या त्रैलोक्येऽपि सुदुर्ल्लभा[6] ।
भुक्तिमुक्तिकरी यस्मात् तस्माद्देया गुणान्वितैः ॥ ४६ ॥[7]
अस्तीति भाषते कश्चित् कश्चिन्नास्तीति भाषते ।
आस्तिके तु भवेत्सिद्धिः[8] तस्य सिद्ध्यति भूतले ॥ ४७ ॥
नास्तिकेनानुभावेन[9] नास्ति नास्तीति यो वदेत् ।
तस्य नास्ति प्रिये सिद्धिर्जन्मकोटिशतैरपि ॥ ४८ ॥
ब्रह्मज्ञानेन मुक्तोऽसौ पापो यो[10] रसनिन्दकः ।

---

(1) M reads खन्यवादस्तु. रससार reads शून्यवाद in place of खगवाद, and चित्रवाद in place of बिलवाद. (2) रसवादोत्तमोत्तमः, a variant in M, which is gram. inc. (3) रसो योगस्य, a variant in K, which seems to be inc. M reads रसवादस्य. (4) K reads दूषकः, which is inc. M reads भूषकाः, which deteriorates the sense. (5) K reads रसकं, which has no sense here. (6) M reads च दुर्ल्लभा, which agrees with र. चि. (7) मुक्ति-भुक्तिकरी यस्मात् तस्माज्ज्ञेया गुणान्विता is the reading in र. चि. (8) अस्तीति भाषते यस्तु, a variant in M. (9) नास्तिकेन तु वादेन, a variant in M. (10) M reads पापीयान्. सोऽयुक्तो यः पापी, a variant in र. चि.

नाहं त्राता भवे तस्य[1] जन्मकोटि[2]शतैरपि ॥ ४८ ॥
श्वानोऽयं जायते देवि यावत्[3] जन्मसहस्रकम् ।
त्रिकोटिजन्मलक्षाणि मार्जारो जायते रसात् ।
रासभो लक्षजन्मानि लक्षजन्मानि वायसः ॥ ५० ॥[4]
कृमिको लक्षजन्मानि कुक्कुटो[5] जन्मलक्षकम् ।
गृध्रको लक्षजन्मानि यः पापो रसनिन्दकः ॥ ५१ ॥
आलापं गात्रसंस्पर्शं यः कुर्य्याद्रसनिन्दकैः ।
यावज्जन्मसहस्रं तु स भवेद्दुःखपीड़ितः ॥ ५२ ॥[6]
रसवीर्य्यविपाके च सूतक[7]स्त्वमृतोपमः ।
तेन जन्मजराव्याधीन्[8] हरते सूतकः प्रिये ॥ ५३ ॥
गुरुमाराधयेत् पूर्व्वं विशुद्धेनान्तरात्मना[9] ।
संप्रदायं प्रयच्छन्ति[10] गुरौ तुष्टे मरीचयः ॥ ५४ ॥

---

(1) K reads भवेत्तस्य ; so also र.चि. M reads भवेत्तस्य. Both are gram. inc. The correct reading is either भवाम्यस्य or भवे तस्य. (2) K reads जन्मकोटी. (3) श्वयोन्यां जायते सोऽपि याति, a variant in M. (4) Ślokas 50—52 are wanting in M. The sense of रसात् is not accurate. (5) कुकुटः, a variant in K, is palpably an error of the scribe. (6) The hemistich as quoted in र. चि. is as follows :—यावज्जन्मसहस्राणि स भवेत् पापपीड़ितः. (7) रसो वीर्य्यो विपाके चा पारद, a variant in M, which is gram. inc. (8) M reads जन्मजराव्याधीः. (9) This charaṇa is wanting in M. (10) M reads संप्रदायमप्रच्छन्ति, which has no sense here.

गुरुसेवां विना कर्म्म यः कुर्य्यान्मूढ़चेतनः[1] ।
स याति निष्फलं कर्म्म[2] स्वप्नलब्धं धनं यथा[3] ॥ ५५ ॥
यः कर्म्म कुरुते दृष्टं तस्य लाभः[4] पदे पदे ।
कारयेद्रसवादन्तु तुष्टेन गुरुणा प्रिये ॥ ५६ ॥
सिद्धप्रपायोपदेशोऽयमुभयोर्भोगमोक्षदः ।[5]
रसार्णवं महातन्त्र[6]मिदं परमदुर्ल्लभम् ॥ ५७ ॥
गोप्यं गुरुप्रसादेन लब्धं स्यात् फलसिद्धये ।[7]
लब्ध्वात्र[8] रसकर्म्माणि नाहङ्कारं समाचरेत् ॥ ५८ ॥
अनुज्ञातश्च गुरुणा लब्ध्वा चाज्ञां रसाङ्कुशीम् ।[9]
भैरवीं तनु[10]माश्रित्य साधयेद्रसभैरवम् ॥ ५९ ॥
एवमुक्ता रसोत्पत्तिः माहात्म्यञ्च[11] सुरेश्वरि ।
तत्समाचक्ष्व[12] देवेशि किमन्यच्छ्रोतुमिच्छसि ॥ ६० ॥

---

(1) B reads विन, which is inc. मूढ़चेतसा, a variant in M. (2) B and M read जन्म. (3) B reads यथा धनं. M reads स्वयं लब्धं यथा धनम्, which is senseless. (4) B and K read लाभं, which is gram. inc. M reads पापं, which is absurd. (5) B reads मोचयोः. This hemistich is wanting in M. (6) रसार्णवमिदं तंत्रम्, a variant in M. (7) This hemistich is wanting in M. (8) लब्ध्वा तु, a variant in M. (9) B reads लब्ध्वा चाचं. This hemistich is wanting in M. (10) B reads भैरवीतनु. K reads भैरवीमनु. (11) K reads रसोत्पत्ति महात्म्यञ्च, which is inc. (12) B reads समाचच्चि, which is inc. This hemistich is wanting in M.

इति श्रीपार्व्वतीपरमेश्वरसंवादे[1]
रसार्णवे रससंहितायां[2]
तन्त्रावतारो नाम[3]
प्रथमः पटलः ॥१॥

---

## द्वितीयः पटलः ।

श्रीदेव्युवाच ।

रसोपदेशदाता च[1] कथं स्याद्वद मे[2] प्रभो ।
शिष्यश्चैव कथं[3] देव रसानुष्ठानतत्परः ॥ १ ॥

श्रीभैरव उवाच ।

निस्पृहो निरहङ्कारी लोभमायाविवर्ज्जितः ।
कुलमार्गरतो नित्यं गुरुपूजारतश्च यः ॥ २ ॥[4]

---

(1) श्रीपार्व्वतीपरमेश्वरसंवादे is wanting in M. (2) रससंहितायां is wanting in M. (3) B reads रसावतारो नाम.

(1) K reads रसोपरसदाता. We have adopted partly the reading in B and that in M. (2) कथं मम वद, a variant in B and M. (3) K reads रसं, which is senseless. (4) B reads षट्कपूजा instead of गुरुपूजा. This śloka is wanting in M.

दान्तः शिष्योपदेशज्ञः[1] शक्तिमान् गतमत्सरः[2] ।
धर्म्मज्ञः सत्यवाक् दक्षः शीलवान् गुणवान् शुचिः ॥ ३ ॥
अनेकरसशास्त्रज्ञो रसमण्डपकोविदः ।[3]
रसदीक्षाविधानज्ञो यन्त्रौषधि[4]महारसान् ॥ ४ ॥
रागसंख्यां[5] वीजकलां द्वन्द्व[6]मेलापनं विड़म् ।
रञ्जनं[7] सारणं तैलं[8] दलानि क्रामणानि च[9] ॥ ५ ॥
वर्णोत्कर्षं[10] मृदुत्वञ्च जारणां बालवृद्धयोः[11] ।
खेचरीं भूचरीं चैव यो वेत्ति स गुरुर्मतः[12] ॥ ६ ॥
देशकालक्रियाभिज्ञो[13] दयादाक्षिण्यसंयुतः ।
लोभमायाविनिर्म्मुक्तो मन्त्रानुष्ठानतत्परः ॥ ७ ॥
सामुद्रलक्षणोपेतो गम्भीरो गुरुवत्सलः ।

---

(1) शिष्योविशेषज्ञः, a variant in B. शिष्योविनीतश्च, a variant in M. Both are inc. (2) K reads विमत्सरः, which breaks the metre. We have adopted the reading in M. (3) The portion from धर्म्मज्ञः to कोविदः is wanting in M. B reads शिलवान्, which is inc. (4) B reads दिक्षा. K reads मन्त्रौषध. Both are inc. (5) रागसंख्यां, a variant in K. (6) B reads विजकलां, which is inc. K reads द्वन्द, which is a palpable mistake. (7) M reads रञ्जकं. (8) तैक्ष्ण, a variant in K. (9) K reads बलाग्निष्कुमनानि च. दलानीकामणानि च, a variant in M, which seems to be inc. (10) K reads वर्योत्कर्षं, which is gram. inc. (11) जारणाद्बलवृद्धये, a variant in K. (12) B has खेचरिं, and भूचरिं, which are inc. खेचरीञ्चैव यो वेत्ति भूचरीं स गुरुर्भवेत्, a variant in M. (13) देशकालक्रियाभिज्ञ, a variant in K, which cannot be reconciled without the word युक्तः to be understood.

देवाग्नि[1]योगिनीचक्र-कुलपूजारत: सदा ।
शिष्यो विनीतस्तत्त्वज्ञ: सत्यवादी दृढव्रत: ॥ ८ ॥[2]
ये नरा:[3] कुम्भकुद्दाल-ध्वजशंखादिलाञ्छितै:[4] ।
करै[5]रधिष्ठिता देवि योज्यास्ते निधिसाधने[6] ॥ ९ ॥
बलवन्तो महासत्त्वा:[7] कृष्णरक्त[8]विलोचना: ।
वक्रघोणा:[9] सदा[10] क्रूरा: प्रशस्ता बिल[11]साधने ॥ १० ॥
निर्मांस[12]मूर्द्धपिण्डीकान्[13] रक्तकेशान् गतालसान्[14] ।
कठिनानुष्णपादांश्च[15] धातुवादे[16] नियोजयेत् ॥ ११ ॥
आदौ परीक्षयेद्देवि साधकान्[17] सुसमाहितान् ।
ब्राह्मणान् क्षत्रियान् वैश्यान् शूद्रांश्चानुक्रमेण तु[18] ॥ १२ ॥
जितेन्द्रिया: क्लेशसहा नित्योद्यमसमन्विता: ।

---

(1) K reads देवाग्नौ, which is inc. (2) K reads सिद्धो instead of शिष्यो. The portion beginning from लोभमायाविनिर्मुक्तो and ending in सत्यवादी दृढव्रत: is not to be found in M. (3) K reads क्रूरा (without विसर्ग), which is absurd and inc. (4) B reads लाञ्छनै:. K reads लक्षणै:. (5) M reads नरै:, which is inappropriate. (6) निधिदर्शने, a variant in M. (7) K reads महासाधु, which is gram. inc. (8) B reads कृष्णारक्त. (9) K reads वक्रघोरा:. (10) सदा, a variant in K, which is meaningless. (11) K reads किल, which is a mere expletive. (12) K reads निर्मांसा. (13) B reads मूर्द्धपिण्डीकं. M reads मूर्द्धफलिकान्. (14) K reads रक्तकेशाङ्गनासिका:. (15) K reads कठिनान्युष्णपादाश्च. कठिनानुष्ण...श्च, an incomplete variant in M. (16) K reads धातोर्वादे. (17) M reads साधमान्, which is gram. inc. (18) ब्राह्मणं क्षत्रियं वैश्यं शूद्रं चानुक्रमेण तु, a variant in K. M has च instead of तु.

शूराश्च कृतविद्याश्च प्रशस्ताः[1] साधकाः प्रिये ॥ १३ ॥
रसदीक्षाविहीना ये[2] प्रोक्तलक्षणवर्जिताः ।
विप्लावकाः पापरता[3] वर्जयेत्तान्[4] प्रयत्नतः ॥ १४ ॥
दुश्चारिणी दुराचारा निष्ठुरा कलहप्रिया ।
बह्वाशिनी[5] च दुश्चित्ता कोटराक्षी च निर्दया ।
रसनिन्दाकरी या च तां नारीं परिवर्जयेत् ॥ १५ ॥
ईदृशीभिर्वरारोहे[6] सम्पूर्णं क्षितिमण्डलम् ।[7]
न तादृशी[8] भवेन्नारी यादृशी रसबन्धकी ॥ १६ ॥[9]
काकिणी कोकणी नारी तथैव काञ्चिकाक्षिनी ।[10]
कृष्णपक्षे ऋतुमती सा नारी काकिणी स्मृता ॥ १७ ॥
उभयपक्षे ऋतुमती सा नारी कोकणी मता[11] ॥ १८ ॥
शुक्लपक्षे ऋतुमती सा नारी[12] काञ्चिकाक्षिनी ॥ १९ ॥

---

(1) K reads विज्ञेयाः. The portion commencing from the 14th śloka and ending in the first hemistich of the 45th is wanting in M. (2) K reads नरा दीक्षाविहीनाश्च. (3) K reads अवैष्णवान्यायरताः. (4) K reads वर्जये तान्, which is gram. inc. (5) B reads बकाशनी. (6) K reads इदृशी, which is palpably inc. (7) K has सम्पूर्णक्षितिमण्डले. (8) K reads तादृशी च. (9) Cf. रसरत्नसमुच्चय, Chap. VI. ślokas 34—38. (10) काकणी कांचिकाचीनि कोकणी, a variant in K, which we have not adopted for its deficiency in words and defect in metre. र. र. स. reads कालिनी in lieu of काकिणी. (11) उभयपक्षे ऋतुमती सा कोकणी, a variant in K, where some words are wanting. (12) This word is not found in K. The ślokas 17—19 are not found in B.

नवयौवनसम्पन्ना सुरूपा चारुहासिनी ।
सूक्ष्मकेशा तु या नारी क्षीराहारप्रिया सदा ॥ २० ॥
प्रियालापकरी[1] नित्यं शिवशास्त्रकथाप्रिया ।
पद्माकारं[2] मुखं यस्या दृष्टिरिन्दीवराकृतिः ॥ २१ ॥
दशना वज्रसदृशाः प्रवालसदृशोऽधरः[3] ।
यस्याः पयोधरौ देवि तुङ्गपीनौ समावुभौ ॥ २२ ॥
अश्वत्थपत्रसदृशी योनी यस्या भगः समः ।[4]
यत्पादौ मांसलौ स्निग्धौ वर्त्तुलावर्त्तरोमकौ[5] ॥ २३ ॥
श्यामा च मध्ये क्षामा च[6] तन्वी भक्तिपरा[7] शिवे ।
पद्मिनी सा तु विज्ञेया प्रसन्ना[8] मृगलोचना ॥ २४ ॥
पूर्णिमायाममायां वा पक्षे पक्षे रजस्वला ।
षड्भेदा काकिणी नाम्ना पूर्व्वप्रोक्ता रसप्रदा ॥ २५ ॥[9]
यस्य तुष्टो महादेवस्तस्य सिद्धो[10] रसायने ।
तयैव[11] देवदेवेशि रसकर्म्माणि कारयेत् ॥ २६ ॥

---

(1) प्रियालापकरि, a variant in K, which is inc. (2) K has सदा कमल. (3) B reads प्रवालसदृशाधरा. K has दशनं वज्रसदृशं प्रवालसदृशाधरं, which seems to be inc. (4) अश्वत्थपत्रसदृशयोनिर्देशसुशोभिता, a variant in र. र. स. (5) वर्त्तुलाविकरोमकौ, a variant in B. (6) मध्यसूक्ष्मा च, a variant in K. (7) भक्तीपरा, a variant in K, which is inc. (8) B reads सततं. (9) The 25th śloka is not found in B. (10) B reads तस्य सिध्यति तादृशी. K reads सिद्धि, which is gram. inc. (11) K reads तथैव.

तस्य हि निर्म्मला बुद्धिर्निश्चिता रससाधने ।
तस्माद्गुरुश्च शिष्यश्च पूर्व्वोक्तः सिद्धिभाग्भवेत् ॥ २७ ॥

श्रीदेव्युवाच ।

ईदृशैर्लक्षणैः[1] नारीं कुतः प्राप्नोति साधकः ।
यत्र रूपं महादेव लक्षणं नात्र विद्यते ॥ २८ ॥
लक्षणं विद्यते यत्र भावना नात्र विद्यते ।
अथवा रूपहीनाया रूपं केन प्रवर्त्तते ॥ २९ ॥
लक्षणत्रितयं[2] कुत्र त्वया दृष्टं महेश्वर ।
तदेतज्जायते येन तमुपायं वद प्रभो[3] ॥ ३० ॥

श्रीभैरव उवाच ।

शृणु देवि परं गुह्यं यत्सुरैरपि दुर्ल्लभम् ।
पितुः सदाशिवाज्जातं[4] जन्म यच्चण्डिकोदरे ॥ ३१ ॥
तासां बुद्धिर्भवेद्देवि निर्म्मला रससाधने ।
दापयेत्त्वरितामन्त्रं जपेत्तं[5] दर्पवर्जिता[6] ॥ ३२ ॥
लक्षमन्त्रं[7] जपेद्यया तु जायते सा सुलक्षणा ।
बद्धा तु खेचरीं मुद्रां जपेत् फेट्कारभैरवीम् ॥ ३३ ॥

---

(1) ईदृशीं लक्षणां, a variant in K, which is gram. untenable. [Here उपलक्षितां is to be understood.] (2) K reads लक्षणं त्रितयं. (3) K reads तदुपायं वद मे प्रभो, where the word मे can be left out in order to keep up the metre. (4) The reading in K is gram. inc. ; the text runs thus :—पितुः सदाशिवाज्जाय तन्मायायच्छिकोदरे. (5) [Here सा is to be understood.] (6) तं जपेद्द्रूपवर्जिता is the reading in B. (7) B reads लक्षमात्रं.

ममेयं[1] चण्डिका माता जन्म च त्रिपुरान्तकात्[2] ।
कालिकाहं समुद्भूतास्मीदृशं संस्मरेत्तु[3] सा ॥ ३४ ॥
भूतं भव्यं भविष्यच्च त्रैलोक्ये[4] कथयेत्तु सा ।
सहायास्तादृशास्तस्य यादृशी भवितव्यता ॥ ३५ ॥[5]

श्रीदेव्युवाच ।
देवदेव महादेव समस्तज्ञानभाजन ।
रसदीक्षां तु पृच्छामि साधकानां हिताय वै ॥ ३६ ॥

श्रीभैरव उवाच ।
शृणु भैरवि यद्भावम्[6] अपूर्व्वं वर्णयामि ते ।
रसदीक्षाविधानन्तु[7] तस्मान्निगदितं शृणु ॥ ३७ ॥
यत्र राजा नयपरो[8] बलवान् धर्म्मतत्परः ।
मन्त्री च धर्म्मतत्त्वज्ञो भक्तिश्रद्धासमन्वितः ॥ ३८ ॥
तत्रेदं कारयेत् कर्म्म रसबन्धं रसायनम् ।
जना माहेश्वरा यत्र तत्र स्थाने[9] तु कारयेत् ॥ ३९ ॥

---

(1) After the 33rd śloka we find a hemistich in B, which runs thus :—तदा प्रवर्त्तते भावो जन्म स्मरति साद्भुतं ; we have rejected it, since the 34th śloka serves the same purpose. K reads ममैवं. (2) K reads स्मरतांतका, which is inc. (3) K reads संस्मरंतु सा, which is gram. inc. (4) B has भूतं च भवद्भविष्यं च, which mars the metre. K reads त्रैलोक्य, which is inc. (5) After the 35th śloka we have the following hemistich in B :—रसदीक्षां विधायैवं तस्मात् कर्म्म समाचरेत् । We have rejected it, because रसदीक्षाविधान is not yet explained. (6) K reads यद्भावि. (7) Cf. र. र. स. Chap. VI. ślokas 12—66. (8) K reads ऽभयपरो. (9) K reads माहेश्वरास्तत्र प्रच्छन्ने तं.

कारयेद्विजने स्थाने पशुर्यत्र न विद्यते ।
सुगुप्ते सुषमे स्थाने सर्व्वबाधाविवर्ज्जिते ॥ ४० ॥
प्राकार[1]परिखोपेते कपाटार्गलरक्षिते ।
एकान्ते निर्म्मले हृद्ये नानापुष्पद्रुमान्विते ॥ ४१ ॥
हंसकारण्डवाकीर्णे चक्रवाकोपशोभिते ।
दिव्यौषधिगणोपेते सजले श्यामशाद्वले[2] ॥ ४२ ॥
कुमुदोत्पलकह्लार-कदलीषण्डमण्डिते ।
चित्रिते[3] भवनोद्याने कारयेत् परमेश्वरि ॥ ४३ ॥
तन्मध्ये देवदेवेशि मत्तवारणसंयुतम्[4] ।
वातायनसमोपेतमूर्द्धनिर्गामिधूमकम्[5] ॥ ४४ ॥
रक्त[6]पताकासंयुक्तं सज्जोपकरणं तथा ।
प्रविभक्तौषधितुषा[7]काष्ठारण्योत्पलालयम्[8] ॥ ४५ ॥
समालिखितदिग्देवं[9] समर्च्चितविनायकम्[10] ।

---

(1) K reads प्रकार, which seems to be an error of the scribe. (2) K reads स्यात् समाद्वले, wherein the first word (स्यात्) is redundant. (3) B reads विस्तृते. (4) यन्त्रोद्धारं तु कारयेत्, a variant in K, which seems to be unconnected. (5) K reads निष्क्राम instead of निर्गामि. (6) B reads रचा. K reads रक्ता, which is inc. (7) K reads प्रविभक्तौषधीरूपं, wherein रूपं has no meaning. (8) काष्टं वन्योत्पलालकं, a variant in K, wherein the word काष्टं is an error of the scribe. काष्ठारण्योपलायनं, a variant in M, wherein some of the terms are inc. (9) This śloka (46th) is wanting in B. K reads दिग्ब्रह्मं, which has no clear meaning. (10) M reads विनाकम्, which is a palpable error of the scribe.

प्रतिष्ठितसुमेशाभ्यां[1] लोकपालैश्च रचितम् ॥ ४६ ॥
निर्म्मापयेदेकतलं द्वितलं वापि मण्डपम्[2] ।
अथ पक्षे सिते देवि चन्द्रताराबलान्विते[3] ॥ ४७ ॥
पुण्ये तिथौ मुहूर्त्ते च[4] लग्ने सौम्यग्रहेक्षिते ।
स्नातः शुक्लाम्बरधरः शुक्लमाल्यानुलेपनः ॥ ४८ ॥
मधुसर्पिर्दधिक्षीरतिलैः संपूज्य बालिकाः[5] ।
कपिलागोमयालिप्ते हिरण्यकलसावृते ॥ ४९ ॥[6]
यवसिद्धार्थकास्तीर्णे[7] गन्धमाल्योपशोभिते ।
तत्रेष्टिकाभिः रचिते[8] करपीठे सुरेश्वरि[9] ॥ ५० ॥
शिलापट्टं समुत्कीर्य्य शिलापट्टार्गलं प्रिये ।
न्यासं रसाङ्कुशेनैव कृत्वाङ्गुलिहृदादिषु[10] ॥ ५१ ॥
रसलिङ्गं न्यसेत्तत्र हेम्ना च[11] सहितं प्रिये ।

---

(1) प्रतिष्ठितोमामहेशं, a variant in M, which breaks the metre.
(2) B reads मंडलं. M reads मण्टपम्, which is an error of the scribe.
(3) चन्द्रताराबले सति, a variant in B and K. We have adopted the reading in M.
(4) पुण्यतीर्थे मुहूर्त्ते तु, a variant in K, which seems to be unconnected.
(5) M reads पालकः.
(6) The portion from स्नातः to कलसावृते is wanting in M.
(7) B reads यत्र सिद्धार्थकाकीर्णे ; M reads यवसिद्धावकास्तीर्णे ; both the readings seem to be erroneous.
(8) तत्रेष्टकाभिरवचिते, a reading in B. तत्रेष्टकाभिः खचिते, a reading in M.
(9) K reads कारयेत्तु. करपीठे सुरेश्वरीम्, a variant in M, which has no clear sense.
(10) न्यासाक्षेनैव कर्त्तव्याः स्वाङ्गुलीहृदयादिषु, a variant in K. कृताङ्गुलिमृतादिषु, a reading in M, which seems to be erroneous.
(11) K reads पार्श्वतौ.

ॐ क्रीं श्रीं[1] सूतराजस्य मूलमन्त्र उदाहृतः ॥ ५२ ॥
तस्मिन् रसाङ्कुशीं देवीं[2] मूलेनावाहयेत्प्रिये ।
चतुरस्रे तु दिक्पालान्[3] पूजयित्वा वहिः क्रमात् ॥ ५३ ॥
नन्दिनञ्च महाकालं भृङ्गिरीटं महाबलम्[4] ।
कुम्भकर्णञ्च सुग्रीवं भङ्गीकञ्च[5] दृढ़ायुधम्[6] ॥ ५४ ॥
द्वारे चतुर्द्दा विन्यस्य पूजयेद्दक्षवामयोः ।
शुक्रं पूर्व्वेऽभि[7] संपूज्य स्कन्दमाग्नेयगोचरे[8] ॥ ५५ ॥
दक्षिणस्यां ततो रुद्रं[9] पवनं नैर्ऋते तथा[10] ।
शिवं पश्चिमभागे तु पावकं वायवे न्यसेत् ।
उमासुत्तरभागे तु व्यापकं चेशगोचरे[11] ॥ ५६ ॥
लेपिका क्षेपिका चैव चारिका रञ्जिका तथा[12] ।
लोहटी बन्धकारी च भूचरी मृत्युनाशिनी[13] ॥ ५७ ॥
विभूतिः खेचरी[14] चैव दश दूत्यः क्रमेण च[15] ।

---

(1) श्रीं श्रां क्रीं, a variant in M. (2) B reads रसाङ्कुशां. M reads रसाङ्कुशं देवी, which is grammatically inc. (3) चतुरः श्रेष्ठदिक्पालान्, a variant in M. (4) M reads मनोवलं. (5) B reads भङ्गकञ्च. M reads मृगाङ्कञ्च. (6) K reads सुधायुधम्, which has no clear sense. (7) B reads पूर्व्वेऽपि. M reads शुक्रःपूर्व्वे ह. (8) B reads माचरेत्. (9) K reads भद्रं. (10) K reads यजेत्. (11) B reads चेत् समाचरेत्. (12) B has कामिका रंक्षिका तथा. K has लेपिकां क्षेपिकां चैव रक्षकां रञ्जिकां तथा. (13) लोहटीं बन्धकारीं च भूतमृत्युविनाशिनीं, a variant in K. (14) विभूतीं खेचरीं, a variant in K. (15) दशदूत्यक्रमेण च, a reading in M, which is grammatically inc.

पूज्यास्त्वष्टदले[1] पद्मे ऊर्द्ध्वाधस्तु दलेषु च[2] ॥ ५८ ॥
माक्षिको विमलः[3] शैल[4]श्चपलो रसकस्तथा ।
सस्यको[5] गन्धतालौ च पूर्व्वादिक्रमयोगतः ॥ ५९ ॥
अष्टादशभुजा रुद्राः[6] पञ्चवक्त्रास्त्रियम्बकाः[7] ।
चन्द्रार्द्धशोभिमुकुटा[8] नीलग्रीवा वृषध्वजाः[9] ॥ ६० ॥
स्वस्ववर्णधराः[10] सर्व्वेऽप्यष्टविद्येश्वरास्तथा[11] ।
पूजनीया महेशानि द्वितीयेऽष्टदलाम्बुजे[12] ॥ ६१ ॥
कर्णिकायान्तु पूर्व्वादिपूर्व्वं[13] शक्तिचतुष्टयम् ।
मालिनी हैमशक्तिश्च परा शक्तिर्बला स्मृता[14] ।
अपरा वज्रशक्तिश्च कान्तिश्चेयं परापरम्[15] ॥ ६२ ॥

---

(1) पूज्या चाष्टदले is the reading in K, which is a palpable error. (2) पूर्व्वादिषु दलेषु च, a variant in B. ऊर्द्ध्वं चाधःस्थलेषु च, a variant in M. (3) K reads माक्षिकां विमलां. (4) M reads चैलः, which seems to be erroneous. (5) सस्यचा is the reading in K, and सस्यके is that in M. Both are incorrect. (6) K reads भद्रा (without विसर्ग). (7) पञ्चवक्त्रा त्रियम्बिका (without विसर्ग), a variant in K. (8) M reads मकुटा. (9) K reads वृषध्वजा (without विसर्ग). (10) The portion from the 61st to the first hemistich of the 94th is wanting in B. स्वस्व-कर्णवराः, a variant in K, which is absurd. (11) विघ्नेश्वरास्तु ते, a variant in K. विद्येश्वरस्तथा, a reading in M, which is inc. (12) M reads महेशाना द्वितीय.ष्टदलाम्बुजे. (13) पूर्व्वाद्यौ पूर्व्वाः is the reading in M, which seems to be incorrect. (14) K reads स्मृते, which is incorrect. This charaṇa and the next are wanting in M. (15) कान्ते श्चेयं परापरम्, a variant in K.

मध्ये तासाञ्च शक्तीनां सर्व्वेशं रसभैरवम् ।
शुद्धस्फटिकसंकाशं पञ्चवक्त्रं त्रियम्बकम्[1] ॥ ६३ ॥
ज्वलत्पिङ्गोग्रनेत्रञ्च[2] ज्वलज्जिह्वाननं तथा ।
ज्वलद्भ्रुवं[3] ज्वलत्केशं दुःप्रेक्ष्यं[4] प्रेतविष्टरम् ॥ ६४ ॥
जटामुकुटसंयुक्तं चन्द्रार्द्धकृतशेखरम्[5] ।
व्याघ्रचर्म्मधरं नागोपवीतं वृषभध्वजम्[6] ॥ ६५ ॥
अष्टादशभुजं देवमीषत्प्रहसिताननम् ।
द्वात्रिंशार्णेन मनुना पूजयेत् सकलं शिवम् ॥ ६६ ॥
रसेश्वरस्य मन्त्रञ्च कथ्यमानं निबोध मे[7] ॥ ६७ ॥

ॐ ह्रीं क्रौं[8] रसेश्वराय महाकालाय महाबलायाघोर-भैरवाय[9] वज्रवीर[10] क्रोधकङ्काल च्लौः च्लः[11] ॥ ६८ ॥

तस्योत्सङ्गे महादेवीं रत्नाभरणभूषणाम्[12] ।

---

(1) M reads त्र्यम्बकम्, which is the correct form of त्रियम्बकम्. (2) K reads ज्वलत्पिङ्गाग्रनेत्रञ्च. (3) M reads ज्वलद्रूपं. (4) M reads दुष्प्रेक्ष्यं, which is an alternative form of दुःप्रेक्ष्यं. (5) M reads चन्द्रार्द्धीकृतशेखरम्. (6) M reads नाग उपवीतं वृषध्वजम्, wherein the former is grammatically incorrect. (7) In lieu of this hemistich M has only रसेश्वरमन्त्रम्, which ought to be रसेश्वरमन्त्रः. (8) M reads ओम् ह्रीम् क्रेम् क्रम्. (9) M reads भैरव. (10) वज्रधीर is the reading in M. The correct form would be वज्रवीराय and क्रोधकङ्कालाय. (11) M reads च्लौ च्लः । After this, is added इति मन्त्रः. This मन्त्र contains 32 letters (द्वात्रिंशार्णेन), the last two (च्लौः च्लः) being excepted. (12) रत्नाभरणभूषिताम्, a variant in K.

उत्तप्तहेमरुचिरां पीतवस्त्रां त्रिलोचनाम् ॥ ६९ ॥
श्वेतचामरयोर्मध्ये मुक्ताच्छत्रेण शोभिताम्[1] ।
अङ्कुशं चाक्षमालां च दधतीं दक्षहस्तयोः ॥ ७० ॥
पाशाभये च वामाभ्यां[2] चन्द्रार्द्धकृतशेखराम् ।
रसाङ्कुशीं[3] महादेवीं नीलग्रीवां कृपामयीम् ॥ ७१ ॥
पूजयेद्रससिद्ध्यर्थं विद्यया पञ्चबीजया ।
वाग्भवं भुवनेशीञ्च[4] श्रीबीजञ्च सुरेश्वरि ॥ ७२ ॥
मादनं[5] शक्तिबीजञ्च—विद्या[6] परमदुर्ल्लभा ।
धूपदीपैस्तु नैवेद्यैः[7] पुष्पताम्बूलचन्दनैः ॥ ७३ ॥
शान्तिपाठस्य निर्घोषैः[8] स्तोत्रमङ्गलनिस्वनैः[9] ।
घण्टाटङ्कारसंयुक्तैः पूजां कृत्वा यथाविधि ॥ ७४ ॥
अघोरेण बलिं दद्यात् सर्व्वविघ्नोपशान्तये[10] ।

---

(1) K reads मुक्ताच्छत्रोपशोभितां, which is a palpable error of the scribe. (2) वरदाभयहस्ताढ्यां, a variant in K. पाशभयौ च वामाभ्यां, a variant in M, wherein the first term is grammatically incorrect. (3) रसाङ्कुशां, a reading in M. (4) K reads भुवनेशानीं. भुवनेशिञ्च, a variant in M, which ought to be भुवनेशीञ्च. (5) K reads मदनं. (6) K reads विद्यया, which is incorrect. This charaṇa "विद्या परमदुर्ल्लभा" is the remark made by S'iva to draw special attention of his consort. This विद्या is to be communicated by the गुरु to his शिष्य (see śloka 82). (7) धूपदीपैः सुनैवेद्यैः, a variant in K. (8) K reads शान्तिपाठैश्च निर्घोषैः. M reads शास्त्रपाठस्य निर्घोषैः. We have adopted the above reading after collating all the texts. (9) K reads निःस्वनैः. (10) K reads सर्व्वविघ्नस्य शान्तये ।

भूतेभ्यो यक्षरक्षभ्यो[1] पिशाचेभ्यश्च यत्नतः ॥ ७५ ॥
अघोरमन्त्रसंयुक्त[2]मोङ्कारादिनमोऽन्तकम् ।
सर्व्वकर्म्माकरं[3] देवि विघ्नोपद्रवनाशनम्[4] ॥ ७६ ॥
यथाशक्ति जपित्वा तु विद्यामेव रसाङ्कुशीम् ।[5]
कुण्डं विधाय देवेशि योनिचक्रं[6] समेखलम् ॥ ७७ ॥
तत्राज्यतिलसंयुक्तं होमं कृत्वा क्रमेण तु ।
कलशं स्थापयेद्देवि पयःपूर्णं फलान्वितम्[7] ॥ ७८ ॥
पञ्चरत्नसमोपेतं वासोभिः परिवेष्टितम् ।
तत्राष्टादश[8]विद्याभिरभिमन्त्र्य पृथक् पृथक् ॥ ७९ ॥
गन्धपुष्पादिभिः पूर्णं[9] पल्लवैरुपशोभितम् ।
अर्घ्यपात्रञ्च[10] संपूज्य वर्द्धन्याभ्युक्ष्य साधकम्[11] ॥ ८० ॥
शतमष्टोत्तरं चैवमर्घ्यपात्रोदकेन[12] तु ।

---

(1) Both K and M read यक्षरक्षेभ्यः, which is grammatically incorrect, the term being रक्षस् and not रक्ष. (2) M reads संयुक्तां, which is incorrect. (3) सर्व्वकर्णाकरं, a variant in M, which is meaningless. (4) K reads विघ्नोपद्रनाशनम्, which is palpably an error of the scribe. M adds here after the 76th śloka अघोरेभ्योऽथ घोर इति मन्त्रं नमोऽन्तकम्, which we have rejected as it is redundant. (5) K reads विद्योपविद्या विद्या तु, which has no clear sense. (6) योनिवक्त्रं, a variant in K. (7) पयःपूर्णफलान्वितम्, a reading in M. (8) K reads तत्राष्टशत. (9) M reads कीर्णं. (10) K reads वलिपात्रञ्च. (11) Both K and M read वर्द्धन्याभ्युक्ष, which is incorrect. M reads साधकः, which is grammatically untenable. (12) चैव मन्त्रपादोदकेन, a variant in K.

अनाहते[1] ब्रह्मरन्ध्रे मनः कृत्वा निरामये ।
करन्यासं पुरा[2] कृत्वा अङ्गन्यासमनन्तरम्[3] ।
यथाशक्ति जपेन्मन्त्रं रसेन्द्रस्य समाहितः ॥ ९३ ॥
चतुष्कोणं पुनः[4] कृत्वा मध्ये षट्कोणमण्डलम्[5] ।
हस्तमात्रं द्विहस्तं वा तण्डुलैर्विमलैर्लिखेत् ॥ ९४ ॥
सुगन्धैर्लेपिते स्थाने[6] पूजयेच्चन्दनादिभिः ॥ ९५ ॥
कर्णिकायां[7] न्यसेद्देवि[8] पूर्व्वोक्तं रसभैरवम् ।
षट्कोणे[9] देवताषट्कं महाकालादि विन्यसेत् ॥ ९६ ॥
महाकालं महाबल[10]मघोरं वज्रवीरकम्[11] ।
न्यसेत् क्रोधञ्च कङ्कालं मालामन्त्रैः समर्च्चयेत् ॥ ९७ ॥

ॐ ह्रीं क्रौं ह्लूँ ह्लूं ह्रीं ह्रीं ह्रीं ह्रूः हुं फट्—रसेश्वराय महाकालभैरवाय रौद्ररूपाय कृष्णपिङ्गललोचनाय । अवतर २ अवतारय २ जल्प २ जल्पय २ शुभाशुभं कथय २ कथापय २ महारक्षां कुरु २ रससिद्धिं देहि ॥ इति मालामन्त्राः ॥[12]

---

(1) अनाहतौ, a variant in M, which is incorrect. (2) M reads पुनः. (3) The portion commencing from this charaṇa and ending in the third charaṇa of the 94th śloka is not found in K. (4) B reads पुरा. (5) K and M read मण्डले. (6) B reads सुगन्धिलेपितस्थाने. (7) M reads कर्णिकाया, which seems to be an error of the scribe. (8) न्यसेद्देवं, a reading in K. (9) M reads षट्कोण, which is inc. (10) B and K read महाबल; this reading we have adopted, though it makes a defective metre; because we see the same word occurring afterwards. M reads महाबाल. (11) वज्रवीजकम is the variant in M. (12) B reads ॐ ह्रीं क्रें ह्लौं ह्ला ह्रीं ह्रीं ह्रीं ह्र फट्।

ॐ महाकालभैरवाय हृदयाय नमः। ॐ महाबलभैरवाय शिरसे स्वाहा। ॐ अघोरभैरवाय शिखायै वौषट्। ॐ वज्रवीरभैरवाय कवचाय हुम्। ॐ क्रोधभैरवाय नेत्राय वौषट्। ॐ कङ्कालभैरवाय अस्त्राय फट्। सर्व्वत्र स्वाहान्तम्। एवमङ्गन्यासाः।[1] एवमङ्गुलीन्यासान् कुर्य्यादादौ। एते षड़ङ्गे पूजने च मूलमन्त्राः॥

एवं न्यासात्वरैः कूटैः[2] गन्धपुष्पैः समर्च्चयेत्[3]।
पूर्णकुम्भं[4] न्यसेन्मध्ये शरावं तण्डुलैः सह॥ ६८॥
तस्योपरि घृतदीपं[5] वर्त्तीं मन्त्रेश्च[6] मन्त्रयेत्॥ ६९॥
समानीय कुमारीं तु कुमारं वा सुशोभनम्।[7]

---

रसेश्वराय महाकालभैरवाय रौद्ररूपाय कृष्णपिङ्गललोचनाय। कथापय महारत्नां कुरु कुरु कथापय कुरु रससिद्धिं देहि। M reads ओम् ह्रोम् भ्रिम् ख्नोम् ख्र: क्रोम् क्रोम् क्रों ह्र हुम् फट्। रसेश्वराय महाकालभैरवाय क्रोधरूपाय कृष्णपिङ्गलोचनाय। अवतर अवतर। अवतारय अवतारय। जल्प जल्प। जल्पय जल्पय। शुभाशुभं कथय कथय। कथापय कथापय। महारत्नां कुरु कुरु। कथापय कथापय। मम रससिद्धिं देहि। We have adopted the fore-mentioned reading after collating the texts.

(1) ओं महाकालभैरवाय is wanting in B. K reads ओं महाकालभैरवाय ठः ठः स्वाहा अस्त्राय फट्। The portion beginning from हृदयाय नमः and ending in एवमङ्गन्यासाः is wanting in K. (2) K reads एवं न्यासान् करैः कृत्वा. (3) B reads गन्धपुष्पैश्च पूजयेत्. गन्धैः पुष्पैश्च पूजयेत्, a variant in M. (4) पूर्णकं is the reading in K, which is palpably an error of the scribe. (5) B reads घृतं दिव्यं. M reads स्थितं दीपं. (6) B reads चार्चमन्त्रैश्च. M reads तत्तन्मन्त्रैश्च. (7) समानीय कुमारीं कुमारं चासुशोभनम्, a variant in B. समानीय कुमारन्तु कुमारीं वा सुशोभनम्, a variant in M, which is inc.

एकद्वित्रिचतुःपञ्च[1] यथालाभं समानयेत् ।
गन्धपुष्पैर्धूपदीपैः नैवेद्येन च पूजयेत् ॥ १०० ॥
एकैकस्यां[2] न्यसेन्मन्त्रं हृदयाद्यांश्च[3] देवताः ॥ १०१ ॥
ततो निरीक्ष्य[4] तद्दीपं[5] सर्व्वास्तत्र[6] कुमारिकाः[7] ।
पश्यन्ति देवता दीपे कुमाराश्च[8] शुभाशुभम् ।
सिद्धिं वा[9]प्यथवासिद्धिं कथयन्ति कुमारिकाः[10] ॥ १०२ ॥
प्रश्नावतारं ज्ञात्वेति[11] रसकर्म्मणि सञ्चरेत्[12] ॥ १०३ ॥
यः पुरा देवदेवेशि रसेन्द्रे[13] भावितात्मवान् ।
सप्तजन्म[14] मृतो जातो न त्यजेद्रसभावनम्[15] ॥ १०४ ॥
एवं शुभाशुभं ज्ञात्वा देवतानुग्रहान्वितः ।

---

(1) एकद्वित्रिचतुपञ्च is the reading in K, which is not correct. (2) B reads एकैकं स्यात्. M reads एकैकस्य. (3) हृदयादींश्च is the reading in M. They are mentioned in p. 27. (4) M reads निमील्य. B and K read निरीच्य, which seems to be inc. (5) B reads तं दीपं. K reads ते दीपं, which is grammatically untenable. (6) B reads सर्व्वं ते च. K reads सर्व्वा तत्र, which is a palpable mistake. (7) B and M read कमारकाः. (8) ते कुमाराः is the reading in B and M. (9) B and M read चा. (10) B and M read कुमारकाः. (11) प्रतावततारान् ज्ञात्वे is the reading in M, which seems to be incorrect. (12) B reads सर्व्वकर्म्माणि. M reads रसकर्म्मणि सञ्चरन्, which is incorrect. (13) या पुराद्देवदेवेशि रसेन्द्रं is the reading in M, which is incorrect. (14) B and M read वारं. (15) B reads रसभावनां. रसभाविनम् is the variant in M, which has no sense here.

मण्डपे पूर्व्ववद्देवी[1]मर्च्चयित्वा रसाङ्कुशीम्[2] ॥ १०५ ॥
आचार्य्यमपि संपूज्य धूपस्रक्चन्दनादिभिः ।
अघोरेण बलिं दत्त्वा ततः कर्म्म समाचरेत् ॥ १०६ ॥
ओषध्यो मण्डपे[3] प्राच्यां रसस्वेदोऽग्निगोचरे[4] ।
दक्षिणस्यां लोहमारो नैर्ऋत्यां पेषणादिकम्[5] ॥ १०७ ॥
द्रुतिक्रिया तु[6] वारुण्यां वायव्ये धमनं प्रिये ।
वर्णोत्कर्षस्तु[7] कौवेर्य्याम् ऐशान्यां रसवेधनम्[8] ॥ १०८ ॥
आसनन्तु गुरोर्मध्ये[9] निवेश्य[10] सुरनायिके ।
नियामनादिकं कर्म्म क्रामणान्तं[11] वरानने ।
रसाङ्कुशेन मन्त्रेण कर्त्तव्यं साधकेन तु ॥ १०९ ॥

---

(1) B and K read देवि, which is incorrect. (2) B reads रसाङ्कुशा. M reads रसाङ्कुशम्. Both are grammatically erroneous. (3) ओषधी मन्त्रवित्, a variant in K, wherein मन्त्रवित् has no final verb to govern. (4) B reads रसं स्वेदोग्निगोचरे. K reads रसे स्वेदोग्नीगोचरे. (5) K reads पेषिणं दकं, wherein पेषिणं is incorrect. The correct form is पेषणं. [दकं = water.] (6) B reads द्रुतिक्रिया तु, which ought to be spelt द्रुतिक्रिया तु. K reads कर्त्तौ कुर्यौति. M reads धृतिक्रिया तु. (7) वर्णोत्-कर्षणं, a reading in K. (8) ईशान्यां रसबन्धनम्, a variant in B and M. Cf. रसरत्नसमुच्चय, Chap. VII., ślokas 3—5. (9) आसनन्तु गुरुर्मध्ये, a reading in K, which is incorrect. (10) K reads निवेश्य, which is not accurate here. (11) कर्म्मणान्तं, a reading in M, which seems to be incorrect. But K has a different reading in the 5th. Paṭala, śloka 1, नियामिकादिकं कर्म्म क्रमणान्तं.

य: पुरा देवदेवेशि वर्णितो[1] रसभैरव: ।
सद्योजातं तस्य जानु[2] वामदेवन्तु गुह्यकम्[3] ॥ ११० ॥
अघोरं हृदयं[4] तस्य वक्त्रं तत्पुरुषं स्मृतम्[5] ।
यावद्[6]भ्रूमध्यमीशानमर्द्धचन्द्रं ललाटकम्[7] ॥ १११ ॥
बिन्दुर्देवेशि तस्योर्द्ध्वं बिन्दोरूर्द्ध्वं स्थितो नद:[8] ।
ललाटशिरसोर्मध्ये[9] शक्तिस्तत्रैव संस्थिता ॥ ११२ ॥
व्यापिनी[10] ब्रह्मरन्ध्रस्था[11] तस्योर्द्ध्वं तून्मना[12] भवेत् ।
उन्मना उन्मनोभावम्[13] उन्मनापदमव्ययम् ॥ ११३ ॥

---

(1) M reads वर्णत:, which is incorrect. (2) K reads जानौ. सद्योजातस्तथा जातु, a variant in M, wherein जातु is an error of the scribe. (3) K reads गुह्यके. वामदेवैस्तु गुह्यकम्, a reading in M, wherein the first term is erroneous. (4) K and M read अघोरहृदयं, which is not correct. (5) B reads तत्पुरुष: स्मृत:. K reads वत्पुरुष: स्मृतम्. (6) B and M read भवेद्, which is not appropriate. (7) K reads ललाटके. M reads अर्द्धचन्द्रललाटकम्. The final verb ध्यायेत्, stated in the śloka 116, is to be understood here (in the ślokas 110-111) by मण्डूकप्लुति connection. (8) The 112th śloka is not found in B, except the initial and final words, i. e. बिन्दुर्देव and संस्थिता. बिन्दोरुर्द्धस्थितो नट:, a variant in M, which is incorrect. [Here the correct word is नाद as is stated in the कुब्जिकातन्त्, Paṭala I. "आसीद्बिन्दुस्ततो नादो नादाच्छक्ति: समुद्भवा।" (9) ललाटे शिरसो मध्ये, a reading in M. (10) K reads व्यापिनि. M reads व्यापिनीं. Both are incorrect. (11) M reads ब्रह्मरन्ध्रस्थां. (12) B and K read समना. (13) B and M read उन्मनादुन्मनोभावम्. [उन्मना: = उन्मनापद.]

तस्योर्द्ध्वे परमं सत्यं[1] व्योमस्थायि परात्परम्[2] ।
शून्यं शून्यं पुनः[3] शून्यं त्रिशून्यञ्च[4] निरामयम् ॥ ११४ ॥
नभश्च गगनं व्योम खमाकाशं[5] च केवलम् ।
निष्कलं निर्म्मलं नित्यं निस्तरङ्गं निरामयम् ॥ ११५ ॥
निष्प्रपञ्चं[6] निराधारं निर्गुणं गुणगोचरम्[7] ।
एवंरूपं सदा ध्यायेत् स्वदेहे रसभैरवम् ॥ ११६ ॥
यदा च निश्चलं[8] ध्यायेत् यदा च निश्चलं[9] मनः ।
वह्निमध्ये तदा[10] सूतो बध्यते निश्चलस्तथा[11] ॥ ११७ ॥
यदा च[12] चलति ध्यानं रसो वह्नौ न तिष्ठति ॥ ११८ ॥
मण्डलस्य बहिः[13] रात्रौ सुरामत्स्यामिषादिभिः ।
अर्च्चयेद्[14] यक्षगन्धर्व्वान् पिशाचान् राक्षसांस्तथा ॥ ११९ ॥

---

(1) B reads तस्योर्द्ध्वे. K reads तु पदं शून्यं. M reads तु परं सत्यं. (2) B has व्योमव्यापि परापरं. व्योमव्यापीच तत्परम्, a variant in M, which is erroneous. (3) K reads परं. (4) B reads त्रिशून्यञ्च. (5) खप्रकारं, a variant in K. [This repetition expresses the intensity of essence of God, who is compared with nothing but the sky.] (6) K reads निःप्रसङ्गं. (7) नागमनुगणगोचरम्, a variant in M, which has no clear meaning. (8) K reads त्वनिश्चलं, which is inc. (9) B reads न चलं. K reads तदा च. M reads यदा वै. (10) B reads तथा. (11) M reads तदा, thus creating a tautology. (12) B and K read यथा च. M reads यदा स. (13) K reads मंडलं स. M reads मण्डपं कारयेत्. (14) The portion beginning from अर्च्चयेद् and ending in वटुकेश्वरम् is wanting in M.

क्रियाकरणविघ्नाश्च फलविघ्नाश्च[1] कोटिशः ।
सम्भवन्ति तथा तत्तच्छान्त्यै च[2] वटुकेश्वरम् ।
अर्घानु[3]ग्रहषट्कञ्च संपूज्यादौ समाचरेत् ॥ १२० ॥
कर्म्मान्ते च पुनर्बाल[4]मष्टाष्टकमनुग्रहम् ।
संपूज्य विनियुञ्ज्यात्तत्[5] सिद्धद्रव्यन्तु सिद्धिदम् ॥ १२१ ॥
सिद्धस्तु नाशयेद्वादं[6] तद्देशं[7] तु परित्यजेत् ।
भ्रमेन्माधुकरीं[8] भिक्षां सुसिद्धे तु[9] महारसे ॥ १२२ ॥
प्रमादादुत्थितो विघ्नो[10] रसबन्धे कृते सति ।
रसशान्तिर्विधातव्या रसक्षोभं न कारयेत् ॥ १२३ ॥
रसं न दर्शयेद्देवि नारीहस्ते[11] न पातयेत् ।
नार्य्यै[12] गुह्यं न वक्तव्यं द्रव्यं ताभ्यो हि[13] गोपयेत् ॥१२४॥
परद्रव्ये[14]र्न कर्त्तव्यं परदारा[15]न्न संस्पृशेत् ।
परान्नं नैव भुञ्जीत परांश्चैव न विश्वसेत् ॥ १२५ ॥[16]

---

(1) K has विघ्नं तु कुलविघ्नादि. (2) K reads तत्र शान्त्येव, which is senseless and incorrect. (3) K reads यथाता. M reads अर्घानु. (4) K reads मर्मान्ते च पुनर्बाल. M reads बाला. Both are incorrect. (5) K reads विधिवद्देवि. (6) द्वारं is the reading in M. (7) K reads तं देशं. (8) B reads मधुकरीं. The portion commencing from भ्रमेन्माधुकरीं to the end of the 123d. śloka is wanting in M. (9) B reads सुस्निग्धे च. (10) B has प्रमादादुत्थिते सौशि. (11) नारीं हस्ते is the reading in M. (12) B and M read नार्य्या. (13) The term द्रव्यं is wanting in B. B and M read तासाञ्च. (14) M reads परद्रव्यं. (15) M reads परदारं, which is grammatically incorrect. (16) The hemistich परान्नं नैव &c. is not found in K.

न देयं दुष्टबुद्धीनां गोष्ठीरूपेण याचके ॥ १२६ ॥[1]
अष्टम्यां पौर्णमास्यां च[2] अमावास्यां[3] युगादिषु।
अयने विषुवे[4] चैव चतुर्दश्यां विशेषतः।
रसोत्सवं प्रकुर्व्वीत यथावित्तानुसारतः ॥ १२७ ॥[5]
एवं रसोत्सवं देवि यः कुर्य्याद्भक्तिसंयुतः।
ब्रह्महत्यादिपापानि नश्यन्ति विविधानि च ॥ १२८ ॥
अनेन विधिना यत्र पूजां कुर्व्वन्ति साधकाः[6]।
न तत्र रोगदौर्गत्यं ईतयः[7] प्रभवन्ति च ॥ १२९ ॥
एवंविधां[8] रसे पूजां प्रतिष्ठाप्य यथाविधि।
यत्नात्कर्म्म विधातव्यमात्मनः शुभमिच्छता[9] ॥ १३० ॥
अन्यथा[10] कुरुते यस्तु तस्य सिद्धिर्न जायते।
अपायः[11] पापशंका च बुद्धिभङ्गो हि जायते ॥ १३१ ॥

---

(1) K reads गोष्ठीभूय न याचयेत्. This hemistich is wanting in M. (2) K reads पूर्णमायां च, which seems to be an error of the scribe. M reads पूर्णिमायां वा. (3) अमावस्यां वा युगादिषु, a variant in K, which destroys the metre. (4) M reads विषुवै, which is incorrect. (5) After this śloka, there is a hemistich in M, which runs thus :— नश्यन्ति पापसहस्राणि महासिद्धिः प्रजायते ॥ Also the following two ślokas (128 and 129) are not found in M. (6) K has यस्तु पूर्व्वं कुर्वीत साधकः, wherein पूर्व्वं is incorrect. (7) K reads रोगा जायन्ते न पुनः. (8) K reads एवंविधे. (9) सिद्धिमिच्छता, a variant in M. (10) M reads अन्यथा. (11) The portion beginning from अपायः and ending in विधे (ślokas 131—132) is wanting in M.

अवज्ञा रोगजातस्य[1] सन्देहस्य[2] पदे पदे ।
आलस्याद्गुरुलोभाच्च[3] परस्य कथनेन च[4] ।
उत्पन्नमपि विज्ञानं हरन्ति कुलकाः प्रिये ॥ १३२ ॥
दीक्षितो रसकर्म्माणि मन्त्रन्यासविदाचरेत् ।[5]
तन्ममाचक्ष्व देवेशि किमन्यच्छ्रोतुमिच्छसि ॥ १३३ ॥[6]

इति श्रीपार्व्वतीपरमेश्वरसंवादे[7]
रसार्णवे रससंहितायां[8]
दीक्षाविधानो नाम[9]
द्वितीयः पटलः ॥२॥

---

(1) B and K read रोगजातस्य, which seems to be incorrect. (2) K reads स्वदेहस्य. (3) K reads लोपस्य. (4) B has पत्रस्य कथनेन वा. (5) मंत्रे न्यासं विचारयेत्, a variant in K. दीक्षिते रसकर्म्माणि मन्त्रात्मापि समाचरेत्, a variant in M. (6) This hemistich is not found in M. (7) (8) (9) These portions are not found in M. K reads दीक्षाविधानं नाम.

## तृतीयः पटलः ।

श्रीदेव्युवाच ।[1]

भगवन् देवदेवेश लोकनाथ जगत्पते ।
मन्त्रन्यासं समाचक्ष्व रसकर्म्मोपकारकम् ॥ १ ॥

श्रीभैरव उवाच ।[2]

पुनरन्यं[3] प्रवक्ष्यामि मन्त्रमूर्त्तिं रसाङ्कुशीम्[4] ।
पञ्चमं तु गृहं देवि दुर्लभं देवदानवैः ॥ २ ॥
चत्वारः प्रधानगृहाः हंसगृहं[5] तु पञ्चमम् ।
यत्र सिद्धिमकारादिः[6] तिष्ठति[7] पञ्चमे गृहे[8] ॥ ३ ॥
लिङ्गाश्रयं यथा रूपं[9] लिङ्गिमाया[10] तु लिङ्गिनी ।
गगनेन[11] तु सा ज्ञेया भगरेखा[12] तु पञ्चमे ॥ ४ ॥

---

(1) M reads देवी. (2) This as well as the above-mentioned śloka are not found in M. (3) K reads पुनरन्यत्, which is grammatically untenable. (4) M reads रसाङ्कुशम्. (5) B reads चत्वारः प्रधानमहं गृहा. M reads प्रधानग्रहाः चक्रं सह. Both have no clear sense. (6) K reads सिद्धिरकारादि. M reads सिद्धिर्मकारादि. (7) K reads तिष्ठति. (8) गृहे is the reading in M. (9) K reads लिङ्गौ श्रयं, which is evidently an error of the scribe. M reads लिङ्गश्रयं. We have adopted the above text after collating all the readings. The portion commencing from यथा रूपं and ending in the 20th śloka is not found in B. (10) लिङ्गमाया, a variant in M, which is properly लिङ्गिमाया. (11) M reads गगने. (12) भागरेखा, a variant in K.

प्रणवं पूर्व्वमुच्चार्य्य बीजं शब्दमनुत्तरम्[1] ।
ह्रींकारञ्चैव[2] क्रींकारं हंसबुद्धि[3]मनन्तरम् ॥ ५ ॥
कालपाशं महामन्त्रं गृह्णीयात्साधकेश्वरः[4] ।
महारम्भे तु तन्मन्त्रं प्रतीहारं रसाङ्कुशोम्[5] ॥ ६ ॥
लक्षमेकं जपेत्तस्य महासिद्धिः प्रवर्त्तते ।[6]
बालवत्सपुरीषं तु[7] ततः केनैव ग्राहयेत्[8] ॥ ७ ॥
चिताग्नि[9]भस्म तेनैव ग्राहयेत् परमेश्वरि ।
चैवं तदुत्तमं स्थानं रसेन्द्रस्तत्र तिष्ठति ॥ ८ ॥
मार्जन्या मार्जयेत्स्थानं कुब्जिकाख्या तु खेचरी[10] ।
द्वात्रिंशदक्षरा[11] देवि पञ्चनादेषु संस्थिता ॥ ९ ॥
ततः सिद्धाश्च चत्वारः पुरुषाष्टादश[12] स्मृताः ।
अर्थ[13]पञ्चकसंयुक्ता ध्यानं स्यात्[14] पञ्चकं पुनः ॥ १० ॥
योगिनीषट्कसंयुक्तं[15] सप्तविंशत्क्रमान्वितम्[16] ।

---

(1) शिवशब्दमनन्तरम्, a variant in K. (2) ह्रींकारः चैव, a variant in K, which is incorrect, as it is connected with उच्चार्य्य. (3) K reads हंसशब्द. (4) This charaṇa and the next are wanting in K. (5) K reads प्रतिहारं रसाङ्कुशं, which is incorrect. (6) This hemistich is wanting in M. (7) K reads श्रीघ्र in lieu of बाल. M reads बालवत्सपुरांषेषु. (8) K reads पुनस्तेनैव ग्राहयेत्, which has no clear sense. M reads गृह्णयेत्, which is incorrect. (9) K reads चितास्थि. (10) कुब्जिकाख्या तु खेचरी, a reading in M. (11) M reads द्वाविंशदक्षरा. (Vide Paṭala II, verse 68.) (12) K reads पुरुषाष्टदिशः. (13) M reads अष्ट. (14) K reads ध्यानाख्या. (15) योगिनीषट्कसंयुक्ताः, a variant in K. (16) K reads सप्तविंशत्क्रमान्विताः.

एकाशीतिपदैर्युक्तं पञ्चावरणसंयुतम् ॥ ११ ॥
अनेन क्रमयोगेन मार्जनीं परिपूजयेत्[1] ।
अनेन मार्जयेत् चेत्रं रसेन्द्रो यत्र तिष्ठति ॥ १२ ॥
उपलेपन्तु तत्रैव चण्डघण्टान्तु कारयेत् ।
पूर्व्वे गृहे[2] तु सा देवी चण्डघण्टा व्यवस्थिता ॥ १३ ॥
चण्डभैरविका देवी संस्थिता[3] दक्षिणे गृहे ।
गोमयं तेन गृह्णीयाल्लेपनार्थं वरानने ॥ १४ ॥
चण्ड[4]कापालिनी देवी[5] संस्थिता[6] चोत्तरे गृहे ।
गृहीत्वा चोदकं तेन[7] लेपयेद्भूमिमण्डलम्[8] ॥ १५ ॥
सप्तदशाक्षरां कालीं[9] खड्ग[10]पाषाणतो न्यसेत् ।
द्वात्रिंशदक्षरं घोरं मर्दकं[11] तु नियोजयेत् ॥ १६ ॥
गृह्णीयात् काञ्जिकां देवि कालपाशेन मन्त्रितः ।[12]
एवं सुकर्म्मसंयोगं कुरुते खेचरीकुलम् ॥ १७ ॥
अष्टाशीतिसहस्राणि याः स्थिता दिव्यखेचरी[13] ।

---

(1) M reads तेन पूजयेत्. (2) पूर्व्वगेहे, a variant in K. (3) K reads सा स्थिता. (4) M reads पञ्च. (5) M reads देव्या, which is incorrect. (6) K reads सा स्थिता. (7) M reads देवि. (8) लेपनाद्भूमिमण्डले, a variant in M. (9) साष्टादशाक्षरीं कालीं, a variant in K. (10) All the MSS. agree in spelling खड्ग thus—खङ्ग. But no lexicon supports the latter spelling. (11) K reads मर्दने. (12) गृहीत्वा काञ्जिकां देवि कालपाशेन चार्चिताम्, a variant in K. (13) [इति गाथा] is to be understood after दिव्यखेचरी. Both K and M read या (without विसर्ग), which is incorrect.

ता: सर्व्वा: किंकरास्तस्य[1] औषधं पेषयन्ति ता:[2] ॥ १८ ॥
तासां सर्व्वन्तु मन्त्रैकं[3] चतुरक्षरसंयुतम् ।—"सोहं हंस:"
सा विद्या खेचरीणां तु[4] नाम्ना[5] तु कुलखेचरी ॥ १९ ॥
राजिकां सैन्धवं न्यस्य[6] सा विद्या कुलखेचरी ।
मन्त्रयेत् काञ्जिकां[7] तत्र मन्त्रराजो रसाङ्कुशो[8] ॥ २० ॥
अस्त्रविद्यां जपेत्तत्र[9] या ज्ञाता पूर्व्वभार्गवे[10] ।
गुड़ेष्टकान्तु सम्मर्द्य[11] प्रिये तन्मर्दितं[12] रसम् ॥ २१ ॥
का कथा मन्त्रराजस्य[13] न वाक्यं त्रिशिरस्य च[14] ।
षड़ङ्गं योजयेत् तं[15] तु त्वरितं[16] धारयेत् तत: ॥ २२ ॥
डामराख्यं महामन्त्रं धमनीषु[17] नियोजयेत् ।

---

(1) खेचरास्तस्य is the reading in M. [Here किंकरा: = female servants.]
(2) K reads पेषयेत्तत:. (3) तासाञ्च सर्व्वमन्त्रैकं, a reading in K. (4) K reads खेचरी नाम. (5) M reads नाम्ना, which is an error of the scribe. (6) राजिका सैन्धवं न्यस्तां, a variant in M, which seems to be erroneous. (7) M reads काञ्जिकं. (8) B reads रसाङ्कुशा. K reads रसाङ्कुशीं. (9) B has अस्तु विद्या जपे तत्र. (10) K has यो ज्ञाता पूर्व्वभार्गवेत्. M has या ज्ञाता पूर्व्वभार्गवेत्. (11) B reads गुड़ेष्टकं. K reads गुड़ेष्टकं तु संस्तवं, wherein the last term seems to be an error. (12) B reads तं मर्दितं. (13) B reads कालपाशं मन्त्रराजस्य, which mars the metre. (14) B reads न वाक्या त्रिशतस्य च. K reads तस्याक्यत्रिशिरस्य च. (15) K reads तत्. M reads ते, which is incorrect. (16) B and K read त्वरितां, which is a palpable mistake. (17) B reads महातत्त्वं डामरेषु. M reads भूपुरेषु, which has no clear sense.

चिन्तामणिमहाविद्यां कवचेषु नियोजयेत् ॥ २३ ॥
चण्डिकाया महामन्त्रं तं तु पात्रे नियोजयेत् ।[1]
नवविद्यां[2] वरारोहे विन्यसेत्तुषगोमये ॥ २४ ॥
त्रिपुराभैरवीं देवीं[3] राजिकाकाञ्जिके[4] न्यसेत् ।
गुड़स्य कालरात्रिस्तु न्यस्तव्या वीरवन्दिते[5] ॥ २५ ॥
त्रिकूटाद्यं त्रिनेत्रं तु[6] अनलस्य तु विन्यसेत्[7] ।
उदके विन्यसेद्देवि चतुरशीति[8]चण्डिकाः ॥ २६ ॥
क्षेत्रपालमघोरास्त्रं[9] न्यस्तव्यं कोष्ठके प्रिये[10] ।
महापाशुपतास्त्रन्तु मूषायां च नियोजयेत्[11] ॥ २७ ॥
एतन्मन्त्रगणं[12] देवि रसस्थाने नियोजयेत् ।

---

(1) The portion commencing from चिन्तामणिमहाविद्यां and ending in पात्रे नियोजयेत् is not found in M. (2) K reads नवचित्रां. (3) B reads त्रिपुराभैरवि देवि. M reads त्रिपुराभैरवी देवि. Both seem to be incorrect. (4) M reads राजिकां काञ्जिके. (5) गुलस्य कालरात्रिन्तु न्यसव्या वीरवर्जिता, a variant in M, which is inc. (6) K reads त्रिकूटाद्यत्रिनेत्रं च. M reads त्रिघट्टाख्यात्रिकोणेत्रन्तु. (7) K reads अनले च न्यसे न्यसेत्. M reads erroneously अनलस्यन्तु विन्यसेत्. [गुड़स्य = गुड़े, अनलस्य = अनले ; षष्ठी सर्व्वत्र युज्यते ।] (8) All the MSS. read चतुराशीति, which is grammatically incorrect. (9) क्षेत्रपालमघोराख्यं, a variant in M. (10) K reads प्रिये. All the MSS. read कोष्टके, which is incorrect. (11) महापाशुपतं या तु मूषायां तन्नियोजयेत्, a variant in M, which is inc. K reads मूखायां, wherein ख is written in the place of ष, which is pronounced by the up-countrymen as ख. (12) This hemistich is wanting in B. K reads एतन्मन्त्रगणां, which is incorrect.

तदा तु सिद्ध्यति[1] तस्य साधकस्य फलं[2] प्रिये ॥ २८ ॥
रसाङ्कुशं महामन्त्रं जपेत्तु हृदयान्तरे[3] ।
अन्ये ये[4] योगिनीमन्त्राः सर्व्वांन्नारीश्च जापयेत्[5] ॥ २९ ॥
अप्रकाशन्तु[6] तेनैव मन्त्रराजं रसाङ्कुशम् ।
अप्रकाशञ्च[7] नारीणां रचयेत्प्रणवं तथा[8] ।
महासमयविभ्रंशं[9] नारीणां हृदयं यथा[10] ॥ ३० ॥
कुब्जिकाद्यास्तु ये मन्त्रा मया[11] ते संप्रकाशिताः ।
त्रैलोक्यं क्षोभितास्ते तु[12] न मन्यन्ते मम प्रिये ॥ ३१ ॥[13]
रसाङ्कुशेन ज्ञानेन[14] त्रैलोक्यं वश्यतां[15] व्रजेत् ॥ ३२ ॥

---

(1) B reads सिद्यते, which is incorrect. (2) B reads परं. M reads रसं. (3) B reads जप्तव्यं तु हृदंतरे. M reads हृदयाम्बुजे. All the texts read जप्तव्यं, which is grammatically incorrect, as the term मन्त्र is not neuter. (4) B and M read च. (5) B has सर्वान्नारीं च. सर्वगाथ्यैश्च जायते, a variant in K, which has no clear meaning. (6) K reads अपकाश्यन्तु. M reads सप्रकाशन्तु, which is incorrect. (7) K reads अप्रकाश्यन्त. (8) B reads प्राणवद्यथा. K reads प्राणवच्च तां, wherein तां is incorrect. (9) तहासपविभ्रंश is the reading in K, which seems to be defective. (10) हृदयन्तथा is the variantiin K, which is incorrect. This hemistich is wanting in M. (11) B reads मन्त्रा ये त्वया, wherein the last term is incorrect. (12) K reads तैस्तु, which seems to be incorrect. (13) The portion beginning from कुब्जिकाद्यास्तु and ending in प्रिये is not found in M. (14) K reads ज्ञातेन. (15) K reads वशतां.

मन्त्रन्यासमिति[1] ज्ञात्वा यन्त्रमूषाग्नि[2]मानवित् ।
कुर्व्वाणो रसकर्म्माणि सिद्धिं प्राप्नोति साधकः ॥ ३२ ॥

इति श्रीपार्व्वतीपरमेश्वरसंवादे
रसार्णवे रससंहितायां
मन्त्रन्यासो नाम[3]
तृतीयः पटलः ॥३॥

---

## चतुर्थः पटलः ।

श्रीदेव्युवाच ।[1]

यन्त्रमूषाग्निमानानि न ज्ञात्वा मन्त्रवेद्यपि ।
किं करोति[2] महादेव तानि मे वक्तुमर्हसि ॥ १ ॥

---

(1) मन्त्रन्यासानिति, a variant in K. (2) K reads मूखाग्नि. (See the remark in p. 39.) (3) M reads रसार्णवे मन्त्रन्यासन्नाम तृतीयः पटलः.

---

(1) K has the following śloka, which being absurd, we have not adopted :—रसोपरसलोहानि वलयंत्रमूखाग्निना । मानितो ज्ञानतो मंत्रसंज्ञास्तु मंत्रवेद्यपि ॥ The portion commencing from the opening श्रीदेव्युवाच &c. up to श्रीभैरव उवाच (next page) is not found in M except the word भैरवः.
(2) K reads किं करोमि, which is inaccurate.

श्रीभैरव उवाच ।

रसोपरसलोहानि वसनं[1] काञ्जिकम्[2] विड़म् ।
धमनी-लोहयन्त्राणि[3] खल्ल[4]पाषाणमर्दकम् ॥ २ ॥
कोष्ठिका[5] वक्रनालं च[6] गोमयं सारमिन्धनम् ।
मृन्मयानि च यन्त्राणि मुषलोलूखलानि च ॥ ३ ॥
संडसी-पट्टसंदंशं[7] मृत्पात्राय:कटोरकम्[8] ।
प्रतिमानानि च तुला-च्छेदनानि कषोपलम्[9] ॥ ४ ॥
वंशनाली-लोहनाली[10]-मूषाङ्गारां[11]स्तथौषधी: ।
स्नेहाम्ललवणक्षारविषाण्युपविषाणि च ॥ ५ ॥
एवं संगृह्य[12] सम्भारं कर्म्मयोगं समाचरेत् ॥ ६ ॥.
द्रवद्रव्येण भाण्डस्य पूरितार्द्धोदरस्य[13] च ।

---

(1) B and M read वासना. (2) B reads किंजिका. M reads कांचिकं. (3) K reads लोहपत्राणि. (4) All the texts read खल्व, which is not supported by any lexicon. (5) B and K read कोष्टिका, which is not correct. (6) M reads चक्रनालञ्च, which seems to be incorrect. (7) K reads पाड्गसंदंश. M reads मखलीपट्टसन्दंशं. (8) K reads करीटकम्. M reads कमीरकम्. Both are inc. (9) चीदिनीनि, a reading in M, which has no meaning. K reads कषोत्पलम्, which is not correct (10) K reads वंसनालि लोहनालि, which is incorrect. (11) M reads मूषायाम. K reads मुखमार्गा, which has no clear sense. (12) M reads संग्राह्य. (13) K reads द्रवद्रवेण भाण्डं च पूरीतमर्धरसेन, which seems to be an error. We have adopted the reading in B and M, which agrees with that in रसरत्नसमुच्चय, Chap. IX. v. 3.

मुखे तिर्य्यक्कृते[1] भाण्डे रसं सूत्रेण लम्बितम्।
तं[2] स्वेदयेत् तल[3]गतं दोलायन्त्रमिति स्मृतम्॥ ७॥
लोहमूषाद्वयं कृत्वा द्वादशाङ्गुलमानतः।[4]
ईषच्छिद्रान्वितामेकां तत्र[5] गन्धकसंयुताम्[6]॥ ८॥
मूषायां रसयुक्तायाम् अन्यस्यां तां प्रवेशयेत्।
तोयं स्यात् सूतकस्याधः[7] ऊर्द्ध्वाधो वह्निदीपनम्[8]॥ ९॥
रसोनकरसं भद्रे यत्नतो[9] वस्त्रगालितम्।
दापयेत्प्रचुरं यत्नात् आप्लाव्य[10] रसगन्धकौ[11]॥ १०॥
स्थालिकायां निधायोर्द्ध्वं[12] स्थालीमन्यां दृढ़ां कुरु[13]।
सन्धिं[14] विलेपयेद्‌यत्नात् मृदा वस्त्रेण चैव हि[15]॥ ११॥

---

(1) K reads मुखतिर्य्यक्कृते. (2) K reads तत्. (3) K reads तत्र. M reads तैल. For the definition of दोलायन्त्र vide रसरत्नसमुच्चय Chap. IX. vs. 3–4. (4) This śloka and the following six ślokas are nearly the same as in रस.स. in Chap. IX. vs. 15–21. (5) K reads ईषच्छिद्रां छिद्रमितमेकां. (6) M reads गन्धकसंयुतम्, which is grammatically inc. (7) B reads सूतकस्यार्द्धं. (8) Both K and M read दीपकम्. We have adopted the reading in B and रस.स. (9) M reads यत्नतः, which is evidently an error of the scribe. (10) B reads आप्लव्या, which is incorrect. K reads आप्लुतौ. (11) M reads रसगन्धकैः, which seems to be incorrect. (12) B reads विधायोर्ध्वा. K reads विधायोर्द्ध्वं. पिधायोर्द्ध्वं is the reading in रस.स. We have adopted the reading in M. (13) स्थालिमन्यां दृढं कुरु, a variant in K. (14) K reads सार्द्धं, which seems to be incorrect. (15) M reads वेष्टयेत्.

स्थाल्यन्तरे कपोताख्यं पुटं कर्षाग्निना[1] सदा ।
यन्त्रस्याधः करीषाग्निं[2] दद्यात्तीव्राग्निमेव वा ॥ १२ ॥
एवन्तु त्रिदिनं[3] कुर्य्यात् ततो यन्त्रं विमोचयेत्[4] ।
तप्तोदके तप्तचुल्ल्यां[5] न कुर्य्याच्छीतले क्रियाम्[6] ॥ १३ ॥
न तत्र च्योयते[7] सूतो न च गच्छति कुत्रचित् ।
अनेन क्रमयोगेन[8] कुर्य्याद्गन्धकजारणम्[9] ॥ १४ ॥
ऊर्द्ध्वं वह्निरधश्चापो मध्ये तु[10] रससङ्ग्रहः ।
मूषायन्त्रमिदं देवि[11] जारयेद्गगनादिकम्[12] ॥ १५ ॥

---

(1) M reads पुटकर्षाग्निना, which is incorrect. (2) B reads करिष्याग्नि, which is not correct. (3) B, K and M read त्रिविधं, the sense whereof is not clear. We have adopted the reading in रसरत्नसमुच्चय. (4) तप्ततोये विमर्दयेत्, a variant in K. We have adopted the reading in B, M and रस.स. (5) तप्तादके तदा चुल्ल्यां, a variant in K. M reads तप्तोदकेन तत्पश्चा, which seems to be an error. We have adopted the reading in B and रस.स. (6) B reads न कुर्य्याच्छीतलक्रियां. K reads न कुर्य्याग्निलतां क्रियाम्, which is evidently a mistake. न कुर्य्याच्छीतलक्रियाः, a reading in M. We have adopted the reading in रस.स. (7) K reads जायते. M reads चयते. We have taken the reading in B and रस.स. (8) अनेन च क्रमेणैव, a variant in रस.स. (9) M reads गन्धकजारणाम्. (10) M reads च. (11) तुषायन्त्रमिदं देवि, a variant in M, which seems to be an error. K reads मूखायन्त्, which ought to be मूषायन्त्. सोमनालमिदं प्रोक्तं, or सोमानलमिदं प्रोक्तं, a reading in रस.स. Most probably सोमानलयन्त्र is the modern name of मूषायन्त्. (12) सारयेद्गगनादिकं, a variant in B. जार्य्यते गन्धकादिकं, a variant in K. सारयेद्गगनादिकञ्च, a reading in M, which destroys the metre.

गर्भयन्त्रं प्रवच्यामि पिष्टिकाभस्मकारणम्[1] ।
चतुरङ्गुलदीर्घां तु[2] मूषिकां मृन्मयीं दृढ़ाम् ॥ १६ ॥
त्र्यङ्गुलां मध्यविस्तारे[3] वर्त्तुलं कारयेन्मुखम् ।
लोहस्य[4] विंशतिर्भागा एको भागस्तु गुग्गुलोः[5] ॥ १७ ॥
सुश्लक्ष्णं पेषयित्वा तु तोयं दद्यात्[6] पुनः पुनः ।
मूषालेपं ततः कुर्य्यात्[7] तले पिष्टीं च निक्षिपेत्[8] ॥ १८ ॥
तुषकर्षाग्निना भूमौ[9] मृदुस्वेदन्तु कारयेत्[10] ।
अहोरात्रं त्रिरात्रं वा रसेन्द्रो भस्मतां व्रजेत् ॥ १९ ॥

---

(1) B reads भस्मकारकं. K reads पिष्टिकायन्त्रकारकम्. We have adopted the reading in रसरत्नसमुच्चय. For पिष्टिका, see रस.स. Chap. VIII. ślokas 7—8 ; and for गर्भयन्त्र vide do. Chap. IX. vs. 28—31. This hemistich is wanting in M. (2) K reads चतुरङ्गुलदीर्घं च, which is incorrect. दीर्घान्तु मूषीकां, a variant in M. (3) B reads अङ्गुलं मध्यविस्तारे. K reads अङ्गुलं मध्यविस्तारं. त्र्यङ्गुलोन्मितविस्तरां is the reading in रसरत्नसमुच्चय, wherein the last term seems to be incorrect, as the term विस्तर is invariably used to express a collection of words and not the breadth. Vide Pāṇini 3.3.33. (4) B and K read लोणस्य. M reads लौहस्य. We have adopted the reading in रस.स. (5) B reads एकभागस्तु गुग्गुलुः. M reads एको भागस्तु गुग्गुलुः. (6) B and M read दत्वा. दद्याद्वारंवारं is the reading in रस.स. (7) K reads मूषालिपं. दृढं कृत्वा is the reading in रस.स. (8) K reads तिलपिष्टं सुनिक्षिपेत्. तैलपिष्टञ्च निक्षिपेत्, a variant in M. रस.स. has लवणार्द्रमृदम्बुभिः. (9) B has भूयो instead of भूमौ. K has कुर्यात्तुषाग्निं भूमौ च. कर्षैस्तुषाग्निना भूमौ, a variant in रस.स. (10) रस.स. reads स्वेदयेन्मृदु मानवित्.

जारणं मारणं[1] चैव रसराजस्य रञ्जने ।
यन्त्रमेकं[2] परं मर्म्म यन्त्रौषध्यो महाबलम्[3] ॥ २० ॥
औषधीरहितश्चायं हठाद्[4]यन्त्रेण बध्यते ।
सर्व्वत्र सूतको याति[5] मुक्ता भूधरलक्षणम् ॥ २१ ॥
देवताभिः समाक्रष्टो लोष्टस्थोऽपि[6] हि गच्छति ।
तस्माद्‌यन्त्रबलं चैकं न विलङ्घ्यं[7] विजानता ॥ २२ ॥
मन्त्रौषधिसमायोगात् सुसिद्धं कुरुते ह्ययम्[8] ।
मन्त्रोऽघोरोऽत्र जप्तव्यो[9] जपान्ते[10] पूजयेद्रसम्[11] ॥ २३ ॥
एकान्ते तु क्रिया कार्य्या दृष्टान्यैर्विफला[12] भवेत् ॥ २४ ॥
गन्धकस्य क्षयो नास्ति[13] न रसस्य क्षयो भवेत् ।

---

(1) B reads जारणमारणे. K reads मारणे. (2) K reads यन्त्रमेव परं कर्म्म. M reads यन्त्रौषधं परं कर्म्म. (3) K reads यंत्रोविद्या महाबला. M reads यन्त्रौषध्या महारसम्. Both are partly correct. (4) M reads हिक्काद्, which is incorrect and absurd. (5) सूतका यान्ति, a variant in M. (6) B has a defective hemistich समाक्रष्टलोयस्थोपि हि न गच्छति. तथा पीतोऽपि, a variant in M. (7) B has मविलङ्घ. M reads नाविलङ्घ्यं, which seems to be inaccurate. (8) B and M read जवात्. In this reading the sentence becomes incomplete. (9) K reads मंत्रघोरोत्र यष्टव्यो. M reads मंत्रेऽघोरोऽत्र जप्तव्यो. Both the readings are not free from slight errors. (10) K reads यंत्रान्त. M reads यंत्रान्ते. Both are inc. (11) K reads पुरयेद्रसम्. (12) दृष्टेऽन्यैर्विफलं, a variant in M, which is incorrect. (13) गुरुकार्य्यक्षयो नासीत्, a reading in M, which has no sense at all.

चयो यन्त्रस्य विज्ञेयः[1] यन्त्रे विक्रियते क्रिया[2] ।
अलाभे कान्तलोहस्य यन्त्रं लोहेन कारयेत् ॥ २५ ॥
वङ्किलव्य[3]मविज्ञाय रसस्यार्द्धचयो[4] भवेत् ।
यन्त्रचयविधिज्ञस्य चतुर्थांशचयो[5] भवेत् ॥ २६ ॥[6]
द्विमासेन द्वितीयांशं तृतीयांशं त्रिभिर्भवेत् ।
महाग्निं सहते ह्येष सारितो यत्र[7] तिष्ठति ॥ २७ ॥
खर्परं सिकतापूर्णं[8] कृत्वा तस्योपरि न्यसेत् ।
अपरं खर्परं[9] तत्र शनैर्मृद्वग्निना[10] पचेत् ॥ २८ ॥
पञ्चक्षारैस्तथा मूत्रै[11]र्लवणैश्च[12] विड़न्ततः[13] ।
हंसपाकः स विज्ञातो[14] यन्त्रतत्त्वार्थकोविदैः[15] ॥ २९ ॥

---

(1) K reads विज्ञाय. B and M read यंत्रमविज्ञाय. (2) M reads क्रियाः, which is incorrect. (3) K reads वङ्क्लेचा. M reads वङ्किलच. (4) रसस्याधचयो, a variant in M, which seems to be an error of the scribe. (5) यंत्रचेपाविधिज्ञस्य चतुर्थांशचयो, a variant in M, which is inc. (6) This hemistich is not found in K. (7) K reads खेदात् instead of ह्येष. B reads सरिताबर्त्य. M reads खरिद्रावत्य. Both the readings are unintelligible. (8) B reads कपूर, which is inc. कर्परं सिकताचूर्णं, a variant in M. (9) तत्परं कर्परं, a reading in M. (10) K reads शते मृद्वग्निना, which is a palpable mistake of the scribe. (11) B reads पञ्चाचरैस्तथा मंचैः. M reads पञ्चचरैः, which is senseless. (12) लवणश्च is the reading in रसरत्नसमुच्चय. (13) K reads विड़ैस्ततः. (14) स विख्यातो, a variant in B. हंसपादः सुविख्यातो, a variant in M. हंसपाकं समाख्यात, a variant in रस.स. (15) M reads यंत्र तत्त्वार्थकोविदैः. We see यंत्र तद्यार्चिकोत्तमैः in रस.स.

कृष्णा रक्ता च पीता[1] च शुक्लवर्णा[2] च मृत्तिका ।
आद्या श्रेष्ठा कनिष्ठान्त्या[3] मध्यमा मध्यमा मता ॥ ३० ॥
दग्धधान्यतुषोपेता मृत्तिका कोष्ठिकाविधौ[4] ।
वङ्कनालकृता[5] वापि शस्यते सुरसुन्दरि ॥ ३१ ॥
गारा[6] दग्धा तुषा दग्धा दग्धा वल्मीकमृत्तिका ।
अजाश्वानां मलं[7] दग्धं यावत्तत् कृष्णतां गतम्[8] ॥ ३२ ॥
वासकस्य च पत्राणि वल्मीकस्य मृदा सह ।
पेषयेदक्षितोयेन यावत्तत् श्लक्ष्णतां गतम् ॥ ३३ ॥[9]
मर्दयेत्तेन बध्नीयात् वङ्कनालञ्च कोष्ठिकाम्[10] ॥ ३४ ॥
गारा दग्धा तुषा दग्धा दग्धा वल्मीकमृत्तिका ।
चीरमङ्गारकः किट्टं वज्रेणापि न भिद्यते ॥ ३५ ॥[11]
दग्धाङ्गारस्य षड्भागा भागैका[12] कृष्णमृत्तिका ।
चीरमङ्गारकः किट्टं वज्रमूषा[13] प्रकीर्त्तिता ॥ ३६ ॥

---

(1) M reads सीता. (2) M reads शुक्लकृष्णा. (3) कनिष्ठा च, a variant in K. (4) B reads कोष्टकाय वै. K reads कोष्टकार्यं वै, which is inc. The correct reading appears to be कोष्ठकाय वै. (5) B and M read वङ्कनालाकृता. (6) M reads गौरा. [गार or गारा = black earth mixed with kankar or nodular stones.] (7) K reads अजाश्वातां मलं. M reads अजाश्वानमलं. Both are inc. (8) दग्धा मृत् कृष्णतां गता, a variant in K. (9) अनेन वज्रतां गतं, a variant in K. This śloka (33) is not found in M. (10) B reads मर्दयेते तेनौषधी या, which is not intelligible. M reads कोष्ठिकम. (11) This śloka is wanting in M. (12) M reads भागैकं, which is not correct. (13) According to रसरत्नसमुच्चय this appears to be गारमूषा (Chap. X. v. 13).

तुषं वस्त्रसमं दग्धं[1] मृत्तिका चतुरंशिका[2] ।
कूपी[3]पाषाणसंयुक्ता वरमूषा[4] प्रकीर्त्तिता ॥ ३७ ॥
प्रकाशा चान्धमूषा च मूषा तु द्विविधा स्मृता[5] ॥ ३८ ॥
प्रकाशमूषा देवेशि शरावाकारसंयुता ।
द्रव्यनिर्वाहणे सा च वादिकैः[6] सुप्रशस्यते ॥ ३९ ॥
अन्धमूषा तु कर्त्तव्या गोस्तनाकारसन्निभा ।
पिधानकसमायुक्ता किञ्चिदुन्नतमस्तका[7] ॥ ४० ॥
पत्रलेपे तथा रङ्गे[8] द्वन्द्वमेलापके तथा ।
सैव च्छिद्रान्विता[9] मन्दा गम्भीरा सारणोचिता ॥ ४१ ॥
तिलभस्म द्विरंशं तु[10] इष्टकांश[11]समन्वितम् ।

---

(1) तुषं दग्धसमं दग्धं, a variant in K, which is a senseless tautology. (2) B reads चतुरंशका. (3) K reads कूर्पं. M reads कुपी. (4) B, K and M read वज्रमूषा. According to रसरत्नसमुच्चय this appears to be वरमूषा (Chap. X. v. 15.) Hence we have adopted the reading in रस.स. in order to avoid tautology. (5) प्रकृतिर्द्विविधा स्मृता, a variant in K. (6) K reads वैदिकैः. M reads सा चावैदिकैः. (7) किञ्चिदुत्तनमस्तका, a variant in K. किञ्चिदुच्चितमस्तका, a variant in M. Both are incorrect. [उत्तन should be उत्तान, and उच्चित should be उच्छ्रित] This मूषा is called in रस.स. as गोस्तनी. (Vide Chap. X. v. 25.) (8) B reads तव लेपे. K reads भागे in place of रङ्गे. (9) M reads च्छिद्रान्वितान्विता, which is a mistake of the scribe. (10) M reads द्विरंशस्तु, which is not correct. (11) B reads रप्रकाश. K reads इष्टाकांश. Both appear to be incorrect.

भस्ममूषा तु विज्ञेया तारसंशोधने हिता[1] ॥ ४२ ॥
मोच[2]क्षारस्य भागौ द्वौ इष्टकांशसमन्वितौ[3] ।
रुद्रभागास्तारशुद्ध्यर्थमुत्तमा[4] वरवर्णिनि[5] ॥ ४३ ॥
रक्तवर्गेण सम्मिश्रा रक्तवर्गपरिप्लुता[6] ।
रक्तवर्गकृतालेपा[7] सर्व्वशुद्धिषु शोभना[8] ॥ ४४ ॥
शुक्लवर्गेण सम्मिश्रा[9] शुक्लवर्गपरिप्लुता ।
शुक्लवर्गकृतालेपा शुक्लशुद्धिषु शोभना[10] ॥ ४५ ॥
विड्वर्गेण[11] सम्मिश्रा धृतिमिच्छति जारणे[12] ।

---

(1) तस्मान्मूषा तु विज्ञेया तारसंशोधने चिता, a variant in B. तारके शोधने हिता, a variant in K. तारसंशोधने पिता, a variant in M. All appear to be the error of the scribe. We do not find any mention of this मूषा (भस्ममूषा) in रस.स. (2) M reads मोच. (3) रष्टकां च समन्वितं, a variant in B, which is incorrect. ईष्टकांशसमन्वितं, a variant in M. (4) B and K read मुत्तमं, which is not grammatically correct. (5) सुरवर्णिनि is the reading in K, which is not accurate. (6) K reads रक्तवर्णपरिप्लुता, which is incorrect. (7) रक्तवर्गकृतालिता, a variant in K, which is an error of the scribe. (8) This charaṇa and the next three charaṇas are wanting in M. (9) K reads मिश्रा या. (10) सर्व्वशुद्धिषु शोभना, a reading in K. शुक्लसिद्धिषु शोभना, a reading in M. [For रक्तवर्ग and शुक्लवर्ग see the next Paṭala, v.39 and v.40 respectively.] (11) K reads विड्वर्गेण. M reads षड्वर्गेण च. (12) धृतिमिच्छति कारणे, a variant in M, which is meaningless. K reads कृतिमिच्छति जारणे, which has no clear meaning. We have adopted the above reading, after collating all the texts.

निर्वाहणं प्रकुर्व्वीत[1] रक्तवर्गप्रलिप्तया[2] ॥ ४६ ॥
विषटङ्कणगुञ्जाभिः मूषालेपन्तु[3] कारयेत्।
प्रकाशायां प्रकुर्व्वीत यदि वाङ्गारलेपनम्[4] ॥ ४७ ॥
तस्यां विन्यस्य मूषायां द्रव्यमावर्त्तयेद्बुधः।
लेपो वर्णपुटं देवि रक्तमृत्सिन्धुभूखगैः[5] ॥ ४८ ॥
आवर्त्तमाने कनके पीता तारे[6] सिता प्रभा[7]।
शुल्वे[8] नीलनिभा तीक्ष्णे कृष्णवर्णा सुरेश्वरि ॥ ४९ ॥
वङ्गे ज्वाला कपोताभा[9] नागे मलिनधूमका[10]।
शैले तु धूसरा देवि आयसे कपिलप्रभा ॥ ५० ॥
अयस्कान्ते धूम्रवर्णा[11] सस्यके[12] लोहिता भवेत्।
वज्रे नानाविधा[13] ज्वाला खसत्त्वे[14] पाण्डुरप्रभा ॥ ५१ ॥

---

(1) B and M read प्रकुर्व्वन्ति. (2) B reads रक्तवर्णप्रलिप्तया. [मूषया is to be understood after this charaṇa.] (3) K reads मूखालेपन्तु, wherein मूखा = मूषा. (4) K reads वाङ्गारलेपयेत्, which is gram. inc. M reads वाङ्गुलिलेपनम्, which is not accurate here. (5) रक्तभस्मिसु-भूषणैः, a variant in K, which appears to be incorrect. M reads रक्तमृत्-सितभूखगैः. (6) B reads तारः. K reads पितागारे, which is evidently a mistake. (7) K reads सिता शुभा. M reads सितप्रभा. (8) K reads शुक्ले, which is inc. (9) कपोता च, a reading in B and K. (10) B and K read मलिनधूमता. (11) K reads धूमवर्णा. (12) K reads सत्यके, which is incorrect. (13) K reads नानाभिधा. [According to Varáha and Garuḍa a diamond may be रक्तं पीतं सितं शैरीषं and आताम्रं. Hence it emanates different kinds of flames.] (14) K reads सस्यले, which seems to be incorrect. [ख = अभ्र.]

न विस्फुलिङ्गी[1] न च बुद्बुदश्च[2]
यदा न रेखापटलं[3] न शब्दः[4] ।
मूषागतं रत्नसमं स्थिरञ्च[5]
तदा विशुद्धं प्रवदन्ति लोहम् ॥ ५२ ॥

प्रतीवापः पुरा योज्यो[6] निषेक[7]स्तदनन्तरम् ।
छादनं तु प्रतीवापः[8] निषेकं मज्जनं[9] विदुः ।
अभिषेकं[10] तदिच्छन्ति स्नपनं क्रियते तु यत्[11] ॥ ५३ ॥
वापो निषेकः स्नपनं[12] द्रुते[13] निर्मलतां गते ।
उष्णेनैव हि वाञ्छन्ति शीतलं[14] न च वाञ्छति ॥ ५४ ॥
शुक्लदीप्तिः सशब्दश्च[15] यदा वैश्वानरो भवेत् ।

---

(1) K reads विस्फुलिङ्गा. (2) B reads बुद्बुदाश्च. K reads बुद्बुदा च, which is incorrect. (3) नरैः खापटलं, a variant in M, which is senseless. (4) न शब्दम् is the reading in M, which is grammatically incorrect. (5) M reads मूषासमा, which is meaningless. B reads स्थितं च. (6) K reads यो हि. M reads प्रतिवापं पुरा योज्यां, which is gram. inc. (7) K reads निकरैः. M reads निषेकाः. (8) छादनन्तु प्रतिवापि, a variant in K, wherein the latter term is inc. (9) M reads जमनं. (10) K reads अभिशेकं, which is gram. inc. (11) K reads यः, which is gram. incorrect. स्नपितं क्रियते तु यत्, a variant in M. (12) वापे निशेकः स्नपनः, a variant in K, which is erroneous. (13) K has द्रुणि. M has only the letter ते. Both are absurd. (14) M reads शीतवे. (15) B reads शुक्लदीप्तिस्सशब्द स्याद. शुक्लदीप्तिः सशब्द स्यात् तदा, a variant in K, which seems to be inaccurate.

लोहावर्त्तः स विज्ञेयः सत्त्वं पतति निर्म्मलम् ॥ ५५ ॥[1]
षोड़शाङ्गुलविस्तीर्णं हस्तमात्रायतं शुभम्[2] ।
धातुसत्त्वनिपातार्थं[3] कोष्ठकं[4] वरवर्णिनि ॥ ५६ ॥
वंश[5]खादिरमाधूक[6]-बदरीदारुसम्भवैः[7] ।
परिपूर्णं दृढ़ाङ्गारैः धमेद्वातेन कोष्ठकम्[8] ।

---

(1) To illustrate the above technical terms, we quote here the verses from रसरत्नसमुच्चय (Chap. VIII. vs. 49—52) :—

द्रुते द्रव्यान्तरक्षेपो लोहाद्ये क्रियते हि यः ।
स आवापः प्रतीवापस्तदेवाच्छादनं मतम् ॥ ४९ ॥
द्रुते वह्निस्थिते लोहे विरम्याष्टनिमेषकम् ।
सलिलस्य परिक्षेपः सोऽभिषेक इति स्मृतः ॥ ५० ॥
समस्याप्सु विनिक्षेपो निर्वापः स्नपनञ्च तत् ।
प्रतीवापादिकं कार्य्यं द्रुते लोहे सुनिर्म्मले ॥ ५१ ॥
यदा हुताशो दीप्तार्चिः शुक्लोत्थानसमन्वितः ।
शुक्लावर्त्तस्तदा ज्ञेयः स कालः सत्त्वनिर्गमे ॥ ५२ ॥

(2) B, K and M read शुभम् ; but we see समम् in रस.स. and in चरि.
(3) तन्तुसत्त्वनिपातार्थं, a variant in M, which is not correct. (4) B, K and M read कोष्टकं, which is not correct. It is called कोष्ठिकायन्त्र in the 6th Paṭala, śloka 16, and कोष्ठीयन्त्र in रस.स. (Chap. IX. v. 44.) (5) K reads वसाः, which is incorrect. (6) M reads मायूखं, which has no clear sense. (7) बदरीदरीदारिसमभवैः, a variant in M, which is absurd. (8) B reads अधोवातेन कोष्टकैः. K reads धमेद्वातेन कोष्ठकैः. अधोवातेन कोष्ठकैः is the reading in M. अधोवातेन कोष्ठके is the variant in चरि. [We cannot account for the third case-ending in कोष्ठकैः, which has an adjective परिपूर्णं.]

भस्त्रया[1] ज्वालमार्गेण ज्वालयेच्च हुताशनम् ॥ ५७ ॥
प्रविततमुखभागं संवृतान्तःप्रदेशं[2]
स्थलरचितचिरान्तर्जालकं कोष्ठकं स्यात् ।[3]
वकगलसममानं[4] वङ्कनालं विधेयं[5]
शुषिरनलिनिका स्या[6]न्मृन्मयो दीर्घवृत्ता[7] ॥ ५८ ॥
मृन्मये लोहपात्रे वा[8] अयस्कान्तमयेऽथवा ।
पाषाणे स्फटिके वाथ मुक्ताशैलमयेऽथवा ॥ ५९ ॥
सुदृढो मर्दकः कार्य्यः[9] चतुरङ्गुलकोच्छ्रयः[10] ।

---

(1) भावया is the reading in अवि. (2) प्राग्वततन्मुखाभागात् संवृतान्तः-प्रदेशतः, a variant in K, which is inc. B and M read प्रविततमुखभागः संवृतान्तःप्रदेशः, whereas they state कोष्टकं (neuter). (3) स्थलरचितविदांतः-पावकं कोष्टकस्य तु, a variant in K, which has no sense, neither metre. M reads चितान्तर्जालकं. (4) वंकगलसमानं च, a reading in K, which is not correct. M reads वकगगलसमानं, wherein वकग has no meaning. (5) B reads वक्रनालं. K reads विधारयेत्, which mars the metre. (6) B reads शुषिरनलिकांन्या. शिशून् वरनलिकास्या, a variant in K, which is a palpable error. शुषिरनलिनकाढ्या, a variant in M. [शुषिर=सच्छिद्र, नलिनिका=नली, नाल.] (7) K reads दीर्घवृत्तया, which is incorrect. M reads दीर्घवृत्का, the meaning whereof is not intelligible. (8) K reads च. M reads मन्मयेल्लोहपात्रे वा, which seems to be incorrect. (9) B and K read मर्द्दकं कार्य्यं. M reads कार्य्यां, which is incorrect. रसरत्नसमुच्चय has the term मर्दकः in the masculine gender. (Chap. IX, v. 87.) We have adopted that reading. (10) चतुरङ्गुलकोटयः, a variant in K. चतुरङ्गुलगोत्रियः, a reading in M. Both are unintelligible.

स च[1] लोहमयः शैलो ह्ययस्कान्त[1]मयोऽथवा ॥ ६० ॥
अघोरास्त्राभिधानेन महापाशुपतेन वा ।
मन्त्रेण रचयेच्छुद्धिं भूमिं तेनैव शोधयेत् ॥ ६१ ॥
इन्धनानि च सर्व्वाणि द्रव्याणि च विशेषतः ।
दाहकं ज्वालयेत्तेन खल्लं तेनैव शोधयेत् ॥ ६२ ॥[2]
रसं विशोधयेत्तेन विन्यसेत् दिवसे शुभे[3] ।
खल्लोपरि न्यसित्वा[4] च शिवमूर्त्तिमनुस्मरेत् ॥ ६३ ॥
देवतानुग्रहं[5] प्राप्य यन्त्रमूषाग्निमानवित् ।
देवेशि रससिद्ध्यर्थं जानीयात्[6] औषधीरपि[7] ॥ ६४ ॥
यन्त्रमूषाग्निमानानि[8] वर्णितानि सुरेश्वरि ।
तन्ममाचक्ष्व देवेशि[9] किमन्यच्छ्रोतुमिच्छसि ॥ ६५ ॥[10]

---

(1) K reads सैव, and ह्यस्कान्त. Both the readings are incorrect. [The अघोरमन्त्र is mentioned in detail in the 2nd Paṭala. Vide the portion between the ślokas 97 and 98.] (2) This śloka is wanting in M. (3) विन्यसेद्दासवे तथा, a variant in B and M. (4) K reads न्यसेत्वा, which is incorrect. (5) देवभानुग्रहं is the reading in K, which seems to be an error of the scribe. (6) K reads यानि वा, which is inconsistent. (7) M reads द्वोषधीरपि, which seems to be दोषधीरपि. (8) यन्त्रमूषाग्निनामानि, a variant in K. (9) This charaṇa is wanting in M. K reads तन्ममाचल, which is an error of the scribe. (10) This hemistich is written in K between the two hemistichs of the 64th śloka, which is an evident error of the scribe.

इति श्रीपार्व्वतीपरमेश्वरसंवादे[1]
रसार्णवे[2] रससंहितायां
यन्त्रमूषाग्निवर्णनो[3] नाम
चतुर्थः पटलः ॥४॥

---

## पञ्चमः पटलः ।

श्रीदेव्युवाच ।[1]

नियामनादिकं[2] कर्म्म क्रामणान्तं सुरेश्वर ।
यया सम्पद्यते ह्येषामोषधीं[3] वक्तुमर्हसि ॥ १ ॥

श्रीभैरव उवाच ।[4]

---

(1) This is wanting in B and M. (2) This is wanting in M. (3) B reads यन्त्रमूषाग्निवर्णनं नाम. M reads only मूषाग्निवर्णनम् and omits the term यन्त्र.

---

(1) M reads only देवी. (2) B and M read here नियामकादिकं ; but they have stated नियामनादिकं in the 2nd Paṭala. K reads here नियामिकादिकं ; but it has stated नियामनादिकं in the 2nd Paṭala. (Vide Paṭala II. śloka 109.) (3) B reads मोषधी. K reads मौषधिः. [यया इत्यत्र जातिवाचकत्वादेकवचनम् ।] (4) M reads only भैरवः.

सर्पाक्षी वृश्चिककर्कोटी[1] कञ्चुकी जलबिन्दुजा[2] ।
शतावरी भृङ्गराजः[3] शरपुङ्खा[4] पुनर्नवा ॥ २ ॥
मण्डूकपर्णी[5] मत्स्याक्षी ब्रह्मदण्डी शिखण्डिनी[6] ।
अनन्ता काकजङ्घा च काकमाची[7] कपोतिका[8] ॥ ३ ॥
विष्णुक्रान्ता सहचरा[9] सहादेवी[10] महाबला ।
बला नागबला कृष्णा[11] चक्रमर्दः कुरङ्गिणी[12] ॥ ४ ॥
पाठा चामलकी नीली[13] ज्वालिनी पद्मचारिणी ।
फणिविजिह्वा गोजिह्वा[14] कोकिलाक्षी[15] घनध्वनिः[16] ॥५॥

---

(1) K reads वृश्चिकाकर्कोटी. M reads वृश्चिकाकोटी. (2) B reads कंचुकी जलबिन्दुका. K reads कंचुकि जलचिंचिका. M reads कञ्चकी जालबिम्बिका. (3) M reads भृङ्गराजी. (4) B reads शरपुङ्खी. (5) K has मंडूकपर्णि (without विसर्ग). (6) K has शिखंडिनि, which is gram. inc. (7) B reads काचमाची, which is not accurate. K reads only माचि. (8) B reads कपोतकी. K reads कपोतिका तथा. M reads कपोतका. (9) K reads सहसा च. (10) K and M have सहदेवी. (11) B and K read मूर्वा. But this is a tautology; since we see afterwards ज्वालिनी meaning मूर्वा. (12) चक्रमर्दकशंखिनी, a variant in B. चक्रमर्दकिङ्किणी, a variant in M. (13) K has चामलकि नीलि, which is gram. inc. (14) B reads घंटिविजिह्वा गोजिह्वा. K reads गोजिह्विका विजिह्वा च. (15) K reads erroneously कोकीलाक्षा. M reads कोकिलाक्षा. (16) B has घनंध्वनिः, which is incorrect. K has घनध्वनी, which is also incorrect. M has घनाघना (which means काकमाची), which has been already mentioned.

आखुपर्णी[1] त्रिपर्णी च[2] द्विपर्णी चैकपर्णिका[3] ।
तित्तिड़ी[4] क्षीरिणी रास्ना[5] मेषशृङ्गी च कुक्कुटी[6] ॥ ६ ॥
कृष्णपर्णी[7] च तुलसी श्वेता च गिरिकर्णिका[8] ।
एता नियामकौषध्यः[9] पुष्पमूलदलान्विताः[10] ।
दोलास्वेदः प्रकर्त्तव्यो[11] मूलेनानेन सुव्रते[12] ॥ ७ ॥
चण्डाली[13] राक्षसी व्याघ्री खञ्जारी गजकर्णिका[14] ।
शङ्खपुष्पग्निधमनी[15] लाङ्गली बालमोचका[16] ॥ ८ ॥

---

(1) B reads आखुकर्णि. M reads अखुपर्णी Both are gram. incorrect. (2) B reads त्रिपुटी च. M reads तिलपर्णी च. (3) B reads चैकपाणिका. (4) K has तित्तिणी. M has तित्तिरी. (5) B reads लक्ष्मीः. M has लक्ष्मीः and रास्ना. (6) B reads कुकुटी. K reads कर्कुटी. [All meaning the same.] (7) K reads कृतपर्णि, which is gram. inc. M reads कृष्णवर्णा. (8) M reads erroneously श्वेताली घिरिकर्णिका. (9) B reads एता भियामिकौषध्यः. K reads एताश्च यामकौषध्यः, which is inc. (10) K reads erroneously पुष्पमूला दलान्विता. (11) B reads दोला-स्वेदाः प्रकर्त्तव्यौ. M reads दोलास्वेदं प्रकर्त्तव्यः. Both are grammatically incorrect. (12) Both K and M have a defective charaṇa मूलिनाने सुव्रते. (13) K and M read चांडाली, which is also correct. (14) B reads षञ्जारी राजकर्णिका. K reads षट्कारि गजकर्णिका. M reads षाण्डारी गजकर्णका. All the texts have ष as the initial letter. ष is pronounced as ख by the up-countrymen. We do not find any name as षञ्जारि or षट्कारि or षण्डारी in any lexicon. Hence we have adopted a word with ख as its initial. (15) B reads शङ्खपुष्पा, which is rarely found in the lexicons. (16) K reads बालमोचिका.

रक्तस्नुही रक्तशृङ्गी रक्तिका[1] नीलचित्रक: ।
शृगालजिह्वा द्रवन्ती वज्री चक्री च राजिका ॥ ९ ॥[2]
एकवीरा नरकसा रुदन्ती ब्रह्मचारिणी[3] ।
उच्चटा[4] मानिनीकन्दा[5] कुमारी रक्तचित्रक: ॥ १० ॥[6]
लक्ष्मी: शाखोटकश्चैव[7] कञ्चुकी[8] मेषशृङ्गिका ।
हिमावती सोमलता मोदा[9] व्याघ्रनखी शमी[10] ॥ ११ ॥
काञ्चनी वनराजी च[11] काकमाची च केशिनी[12] ।

---

(1) B has सक्तुकं. M has रक्तकर्णी च चित्रका. (2) This hemistich and the next two are not found in M. K reads चक्रा. B reads जारिका. But all other texts have the above reading. After this (9th) śloka we find a hemistich in B and K, which we have omitted, as it appeared to be a repetition of the above-mentioned objects. (3) B reads पद्मचारिणी. (4) B reads उच्चाटा. K reads उच्चला. (5) K has an absurd reading मानिलिंगलीवंकु. (6) After the 10th śloka B and K read the very same hemistich, which is the first part of the 9th śloka. (7) B and M read लक्ष्मीशाकोटकश्चक्री. K reads लक्ष्मीसाखोटकश्चक्री. All the texts read चक्री, which is once mentioned in the 9th śloka. (8) B and K read वज्रिणी, which is once mentioned in the shape of वज्री. (9) B and K read व्याघ्रा, which is once mentioned in the 8th śloka. (10) K reads व्याघ्रानखी समी. M reads व्याघ्रशमी नशा. Both seem to be incorrect. (11) B reads वनराजा च, which is gram. incorrect. M reads काञ्चिनी वानराजी च. (12) B has काचमाची च केशमी. K has काकमाची कमोदनी.

अजमारी[1] कोटराची हनूमत्यङ्गनायिका[2] ॥ १२ ॥
नरजीवा[3] हैमपुष्पी[4] काकमुण्डो च कालिका ।
तोरवल्ली गजारी च[5] हंसाङ्घ्री कुहुकंविका[6] ।
ताम्बूली सूर्य्यभक्ता च[7] रसनिर्जीवकारिका:[8] ॥ १३ ॥
कटुतुम्बी च गोसम्बी देवदालीन्द्रवारुणी[9] ।
वाकुची ब्रह्मवीजानि[10] कार्पासं कृष्णजीरकम् ॥ १४ ॥
कङ्गुनी[11] कृष्णकनकं श्वेतार्कं च पिपीलिजम्[12] ।
दन्तिनी यवचिञ्चा च कर्कोटी[13] कारवल्लिका[14] ॥ १५ ॥
गोजिह्वा काकजङ्घा च महाकाली च शम्बरी[15] ।

---

(1) M reads अजामारी. (2) K has हनुमंतगणायिता, which has no sense. M has हनुमन्यङ्गश्रिका, which is a defective charaṇa. (3) M reads नरजिह्वा. (4) K reads हैमपुषि······का, thus wanting a charaṇa. (5) B reads जगारी च. K reads जगंतारी. (6) K has हंसांघ्री च कुहंविका. M has हंसांघ्रो गुडुभञ्चिका. (7) K has नाकली सर्पभुक्ता च. (8) B reads रसनीजीवकारका:. K reads रसनिर्जिवकारिका:. M reads रसनिर्जीवकारका:. All the readings are more or less void of grammatical accuracy, (the correct term being कारिका:, qualifying ओषध्य: to be understood.) (9) B reads इन्द्रवारणी. M reads देवताली. (10) M has वाकुची ब्रह्मवीजानी, wherein the last term is not gram. correct. (11) K reads कंचुकी. M reads कडुणी. (12) B reads पिपीलुजं. K reads वा पिपीलुकं. M reads पिपूलुजम्. (13) M reads कार्कोटी. (14) K reads कारवेल्लिका. (15) B and M read शंवरा. K reads ववंरी. (The correct term appears to be शम्बरी, which we have adopted above.)

श्वेतगुञ्जा सिताङ्कोलः[1] पटोली विल्वमेव च ।
एकैकमोषधीवीजं[2] मारयेद्रसभैरवम् ॥ १६ ॥
रक्तस्नुही सोमलता रुदन्ती रक्तचित्रक.[3] ।
शाखोटकी[4] दुग्धरुहा मोदिनी[5] ब्रह्मदारुकः ॥ १७ ॥
त्रिशूली कृष्णमार्जारी[6] चक्रिका चौरकुक्कुटी[7] ।
देवदाली[8] शङ्खपुष्पी काकमाची हनूमती[9] ॥ १८ ॥
नीलज्योतिस्तृणज्योति[10]-रुल्कटा हैमवल्लरी[11] ।
त्रिदण्डी ब्रह्मदण्डी च चक्राङ्की[12] स्थलपद्मिनी ॥ १९ ॥
नागजिह्वा नागकर्णी वीरा वर्त्तुलपर्णिका[13] ।
अर्कपत्री वंशपत्री[14] ताम्रपर्णी तथेश्वरी[15] ।

---

(1) B has सिनांकोल, which is incorrect. K has सितांकोलं. M has सिताङ्कोला. (The proper term is अङ्कोलः.) (2) एकैकमौषधीवीजं, a variant in B. एकैकौषधीवीजैश, a variant in K. एकैकमौषधं वीजं, a variant in M. (3) M reads रक्तचित्रकम्. (4) B reads शाकोटरी. K reads साखोटकी. M reads शाकोटका. (5) K reads रीहिणि, which is grammatically incorrect. M reads मोहिनी. (6) K reads कृष्ण-मंजीरी. M reads कृष्णमञ्जरी. (7) B reads चक्रीका चौरकुकुटी. K reads चक्रिका चोरकुकुटी. (8) M reads देवताली. (9) K reads हनुमती, which, though correct, mars the metre. (10) B has लताज्योतिस्तृणज्योति. (11) उर्वरा हैमवल्लिका, a variant in K. उत्कटा हैमवल्लरी, a variant in M. (12) M reads चक्राङ्गी. (13) M has वर्तुलवर्त्तिका. (14) K reads ताम्रपर्णी. (15) B reads तथेश्वरी. K reads हृत्पर्णि तथेश्वरी, which is partly incorrect. M reads ताम्रपर्णी तथैव च, wherein the term ईश्वरी is wanting.

इन्दुरी[1] देवदेवेशि रसबन्धकरा:[2] प्रिये ॥ २० ॥
तीव्रगन्धरसस्पर्शैर्द्रव्यै:[3] स्थावरजङ्गमै: ।
म्रियते बध्यते[4] चैव रस: स्वेदनमर्दनात् ॥ २१ ॥
सूर्य्यावर्त्तश्च कदली बन्ध्या[5] कोशातकी तथा ।
वज्रकन्दोदककणा[6] काकमाची च शिग्रुक:[7] ॥ २२ ॥
देवदाली च देवेशि द्राविका: परिकीर्त्तिता:[8] ।
दोषान् हरन्ति योगिन[9] धातूनां पारदस्य च[10] ॥ २३ ॥
काकमाची घनरव:[11] कासमर्द:[12] कृताञ्जलि: ।
वराहकर्णी सटिरी[13] हंसदावी[14] शतावरी ॥ २४ ॥
ताम्बूली नागिनी ब्रह्मी[15] हंसपादी च लक्षणा ।

---

(1) B has उदिरी. K has उगरी. M has इन्दिरी. We have adopted the above reading after collating all the texts. (2) K reads रससिद्धिकरा:. M reads रसबद्धकरा:. (3) K has स्पर्शी दिव्यै:, which is not gram. accurate. M has स्पर्शे, which is incorrect. (4) B reads बधते, which is gram. inc. (5) M reads बन्ध्य, which is not correct. (6) K reads वज्रकन्दादकद्रेका. (7) B has काचमारी. M has शिग्रकै:, which is inc. (8) द्रवक्रिका: प्रकीर्त्तिता:, a variant in B. (9) दोषं हरन्ति देवेशि, a variant in B. This charaṇa and the next are wanting in M. (10) B has द्राविका: परिकार्त्तिता:, which is a tautology. (11) K and M read वनरव:, which seems to be an error of the scribe. (12) K and M read कासमर्द (without विसर्ग), which is gram. incorrect. (13) B reads वाराहकर्णी चगरी. M reads शर्मरी. (14) K has हंसदोषा. M reads हंसपादी, which is a tautology. [Perhaps the term is हं सदाही = अगुरु.] (15) K reads ब्राह्मी.

अर्जुनी चोरनाली च[1] कारवेल्लोऽर्कपत्रिका[2] ।
व्याघ्री चवी कुरवका[3] कामिकाः सुरवन्दिते[4] ॥ २५ ॥
ब्रह्मदण्डः[5] सुदण्डश्च लोहदण्डस्तृतीयकः ।
एते रसायने योग्या[6] ब्रह्मविष्णुमहेश्वराः ॥ २६ ॥
भूपाटली च कौमारी[7] सिंहवल्ली च शूकरी[8] ।
हेमपर्णी[9] पटोली च नागवल्ली च भृङ्गराट्[10] ।
इत्यष्ट मूलिकाः[11] प्रोक्ताः—पञ्चरत्नं शृणु प्रिये[12] ॥ २७ ॥
मन्त्रसिद्धासना देवी[13] तथा कङ्कालखेचरी ।
इन्दिरा च क्षमापाली[14] पञ्चमी तु निशाचरी[15] ।

---

(1) K reads erroneously अर्जुनि चौरनालि च. M reads कौरनाली च. (2) काकवेलीकपवित्रका, a variant in B, which destroys the metre and has no clear sense. काकवेलार्कपत्रिका, a variant in K. कारवेल्लीकपत्रिका, a variant in M. We have adopted a reading after collating all the texts. (3) व्याघ्री च भौरुपका, a defective charaṇa in B. व्याघ्री च भौरुणी रिक्ता, a variant in K. ब्राह्मी चभी कुरवका, a variant in M. We have taken up a reading after collating the texts. (4) B reads कामिका सुरवद्गीते. K reads वामिका सुरवन्दिनी. M reads कामिकी सुरवन्दिनी. (5) K reads ब्रह्मदण्डी. (6) M reads ग्राह्या. (7) B reads ग्येमारी. M reads गोमारी. (8) B reads सूकरा. K reads सूकरी. M reads ब्रह्मवल्ली च सूकरी. (9) B has हेमकर्णी. K has हेमवर्णा. (10) B reads भङ्गरा. M reads भृङ्गिराट्. (11) M reads मूलकाः. (12) B reads प्रियो, which is inc. (13) B has देवि. K has मन्तृसिंहासनी देवी. M has मन्तृसिद्धासना देवि, which seems to be inc. (14) इंदिरा क्षेमपाला च, a variant in K. M reads इन्दिरी. (15) B has पञ्चमं. K reads पंचमा. M reads पंचमा तु निशाचरा. Both are gram. inc.

पञ्चरत्नमिदं देवि रसशोधनजारणे[1] ॥ २८ ॥
रसस्य बन्धने शस्तमेकैकं[2] सुरवन्दिते ।
रसाङ्कुशेन गृह्णीयात् पञ्चरत्नानि[3] सुव्रते ।
ददाति खेचरीं सिद्धिं[4] रसभैरवसङ्गमे ॥ २९ ॥
क्षिक्षारं[5] टङ्कणक्षारो यवक्षारश्च सर्जिका[6] ।
तिलापामार्गकदली-पलाशशिग्रुमोचिकाः[7] ।
मूलकार्द्रकचिञ्चाश्च[8] ह्यष्टक्षाराः प्रकीर्त्तिताः[9] ॥ ३० ॥
अम्लवेतसजम्बीर-लुङ्गाम्लचणकाम्लकम् ।
नारङ्गं तिन्तिणीकं च चाङ्गेर्य्यम्लगणोत्तमाः[10] ॥ ३१ ॥
सामुद्रं सैन्धवं चैव चूलिकालवणं तथा ।
सौवर्चलं च काचं च लवणाः पञ्च कीर्त्तिताः[11] ॥ ३२ ॥

---

(1) B reads रसाशोधनजारणे. K reads रसशोधनकारणं. (2) K has शस्ता एकैका, which is grammatically incorrect. (3) M reads पञ्चरत्नेन, which is not gram. correct. (4) K reads ददतां. M reads खेचरीसिद्धिं. (5) B and K have क्षिक्षाराः, which is not gram. accurate. (6) K reads सर्जिकः. M reads सर्जिकम्. (7) पालाशाशिग्रुमोचकैः, a variant in B. पलाशशिग्रुमोचकैः, a variant in M. Both are not accurate. (8) मूलार्द्रकचिंचाम्लत्य, a variant in K, which is inc. (9) Compare this with the क्षारत्रय and क्षारपञ्चक in रसरत्नसमुच्चय (Chap. X. vs. 71,72.) (10) The 31st and 32nd ślokas are not found in K and M. Cf. रस.स. Chap. X. vs. 80--85. (11) Cf. रस.स. Chap. X. v. 71, wherein the salts are enumerated as six in number ; viz.

"लवणानि षडुच्यन्ते सामुद्रं सैन्धवं विड़म् ।
सौवर्चलं रोमकं च चूलिकालवणं तथा ॥"

सक्तुकं[1] कालकूटं च क्षितमुस्ता[2] तथैव च ।
शृङ्गी कृष्णविषं चैव[3] पञ्चैते तु महाविषाः[4] ॥ २३ ॥
स्नुह्यर्कोन्मत्तकश्चैव करवीरं च लाङ्गली ।
पञ्चैवोपविषा मुख्याः[5] — तैलानि ह्युत्तमानि वै[6] ।
कुसुम्भकङ्गुणी[7]नक्ता तिल[8]सर्षपजानि तु ॥ २४ ॥
हस्त्यश्वछागनारीणां मूत्रं गव्यं च[9] पञ्चमम् ॥ २५ ॥
पित्तं पञ्चविधं मत्स्य-गवाश्वनरवर्हिजम्[10] ॥ २६ ॥
वसा पञ्चविधा मत्स्य-मेषाहिनरवर्हिजा[11] ॥ २७ ॥
कपोतचाष[12]गृध्राणां शिखिकुक्कुटयोश्च विट् ॥ २८ ॥

---

(1) B reads शुक्तकं, which appears to be the error of the scribe. (2) B reads चशिवमुक्ता, which appears to be erroneous. K reads क्षितं मुस्तं. (3) B reads भृङ्गी. K reads कृष्णाविषश्चैव, which is incorrect. (4) Cf. रसरत्नसमुच्चय Chap. X. vs. 86,87. (5) Cf. रस.स. Chap. X. v. 88. (6) K reads यैः, which is incorrect. M reads तैलानि ह्युत्तमा विषे, wherein the middle term is gram. inc. (7) B has कङ्गुली, which perhaps is incorrect. (8) B has तिला. Cf. रस.स. Chap. X. vs. 73—75. (9) M reads तु. Cf. रस.स. Chap. X. v. 78. (10) पित्तं पञ्चविधं गावं हस्त्यजानरवाजिजं, a variant in K. पित्तं पंचविधं मत्स्य-भवाश्वानरवर्हिणाम्, a variant in M. No mention is made of पित्त in रस.स. (11) K reads वाजिजा instead of वर्हिजा. M reads वर्हजा, which is not correct. Cf. रस.स. Chap. X. vs. 76,77. (12) B reads कपोतश्चाष-गृध्राणां, wherein the first term is gram. inc. M reads भव instead of चाष. Cf. रस.स. Chap. X. vs. 91,92.

मञ्जिष्ठा कुङ्कुमं[1] लाक्षा खदिरश्चासनं[2] तथा ।
रक्तवर्गस्तु देवेशि[3]—पीतवर्गमतः शृणु ।
कुसुम्भं किंशुकं रात्री[4] पतङ्गो मदयन्तिका[5] ॥ ३९ ॥
शुक्लवर्गः सुधाकूर्म्म[6]शङ्खशुक्तिवराटिकाः[7] ॥ ४० ॥
गुञ्जाटङ्कणमध्वाज्यगुड़ा[8] द्रावणपञ्चकम् ॥ ४१ ॥
काचटङ्कणसौवीरं शोधनत्रितयं[9] प्रिये ॥ ४२ ॥
सर्व्वे मलहराः[10] क्षाराः सर्व्वे चाम्लाः प्रबोधकाः[11] ।
विषाणि च तमोघ्नानि[12] स्नेहा मार्दवकारकाः[13] ॥ ४३ ॥
इत्यौषधिगणाः[14] प्रोक्ताः सिद्धिदा रससङ्गमे ।

---

(1) B has मञ्जिष्ठकुङ्कुम. M has कुङ्कुमा. (2) M has खदिरश्चासनं. (3) Cf. रस.स. Chap. X, vs. 92,93. (4) B reads निशा, which destroys the metre. M reads गौशा. [रात्री=two sorts of हरिद्रा.] (5) B has पतंगमर्दयन्तिका. M has पतङ्गयदयन्तिका, which is incorrect. Cf. रस.स. Chap.X. v.94. (6) This charaṇa and the next three are not found in K. M has शुक्लवर्गस्तथा कूर्पः शङ्खशुक्तिवराटिका. (7) Cf. रस.स. Chap. X, v. 95, where the names are different from these mentioned above. (8) M has मध्वाज्यं गुड़. Cf. रस.स. Chap. X. v. 100. (9) K has शोधने त्रितयं. Cf. रस.स. Chap. X. v. 97. (10) B and K read मलहरा (without विसर्ग) which is gram. inc. (11) K reads प्रबोधिकाः, which is gram. inc. (12) K has विषाणि मरुतां घ्नानि, which is gram. incorrect. (13) स्नेहमार्द्रवकाणि वै, an incorrect reading in K. Cf. रस.स. Chap. X. v. 101. (14) B reads इत्यौषधिगणा (without विसर्ग), which is not gram. correct. K reads द्रव्यौषधिगणाः. M reads इत्यौषधगणाः.

क्रियां कुर्व्वन्ति[1] तद्योगात् शक्तयश्च[2] महारसाः ॥ ४४ ॥
तन्ममाचक्ष्व देवेशि[3] किमन्यच्छ्रोतुमिच्छसि ॥ ४५ ॥

इति श्रीपार्व्वतीपरमेश्वरसंवादे[4]
रसार्णवे रससंहितायां[5]
औषधिनिर्णयो नाम[6]
पञ्चमः पटलः ॥ ५ ॥

---

## षष्ठः पटलः ।

श्रीदेव्युवाच ।[1]

देवदेव महादेव शक्तीनां लक्षणं कथम्[2] ।
रसकर्म्मणि योग्यत्वे[3] संस्कारस्तस्य कथ्यताम् ॥ १ ॥

श्रीभैरव उवाच ।[4]

---

(1) K and M read कुर्व्वीत, which is gram. inc. (2) B has इच्छयश्च. M has व्यक्तयश्च. (3) This charaṇa is wanting in M. (4) This portion is wanting in B. (5) रसार्णवे is wanting in M. (6) K reads औषधिनिर्णयो नाम.

---

(1) M reads only देवी. (2) K reads तथा. (3) K has येग्यने or येग्यने, which is unintelligible. (4) M has only भैरवः.

कदाचिद्गिरिजा देवी[1] हरं दृष्ट्वा मनोहरम् ।
मुमोच यत्तदा वीर्य्यं[2] तज्जातं शुभमभ्रकम्[3] ॥
पीतं कृष्णं तथा शुक्लं रक्तं भूमिष सङ्गमात्[4] ॥ २ ॥
अभ्रकं कान्तपाषाणं[5] वज्रं वैक्रान्तकं शृणु ॥ ३ ॥
पिनाकं दर्दुरं नागं[6] वज्रं चाभ्रं चतुर्विधम्[7] ।
पिनाकेऽग्निं प्रविष्टे तु शब्दश्चिटिचिटिर्भवेत्[8] ॥ ४ ॥

---

(1) B reads देवि. (2) K has मुमोच यत्तदवीर्य्यं, which is inc. (3) B reads तज्जात:, which is not grammatically correct, अभ्रकं being neuter. K reads तच्च जातं समभ्रकम्. M reads शुभमभ्रंकम्, which is inc. [For अभ्रक as गौरीतेज: vide रसरत्नसमुच्चय Chap. II. v. 3. For रस as हरतेज: vide ditto Chap. I. vs. 61—68.] (4) B has पीतं कृष्णं तथा रक्तं तत्त-क्रमेष सङ्गमात्, wherein only three sorts of mica are mentioned ; whereas four sorts are stated in रस.स. Chap. II. vs. 5,10. K has पीतं कृष्णं तथा शुक्लं रक्तं भूमं खसंगमात्. M agrees with B in the first charaṇa, but wants the second charaṇa, stating partially त······सङ्गमात्. We have adopted the above reading after collating all the texts and specially referring to what follows (in the 8th śloka.) (5) B reads लोहपादैकं. K reads लोहपादांकं. Here we have adopted the reading in M, which states four objects—1. अभ्रक, 2. कान्त, 3. वज्र and 4. वैक्रान्त. These four objects (called शक्तिs) are described in this Paṭala. Vide śloka 139. (6) सितकं-सुदंरं नागं, a variant in M. (7) B reads चतुर्भुजं. K reads वज्रं चेति चतुर्विधं. Cf. रस.स. Chap. II. v. 10. (8) K has चिटिचिटीर्भवेत्. M has an erroneous reading शब्दं चिटिचिटिं भवेत्.

दर्दुरेऽग्निं प्रविष्टे तु[1] शब्दः कुक्कुटवद्भवेत्[2]।
अग्निं प्रविष्टं नागन्तु[3] फूत्कारं देवि मुञ्चति॥ ५॥
अग्निं प्रविष्टं वज्रं तु[4] वज्रवत्तिष्ठति प्रिये॥ ६॥
कुष्ठप्रदं पिनाकाभ्रं दर्दुरं मरणप्रदम्[5]।
नागं देहगतं नित्यं व्याधिं कुर्य्याद्भगन्दरम्॥ ७॥
रसे रसायने चैव योज्यं[6] वज्राभ्रकं प्रिये।
अनेकवर्णभेदेन तच्चतुर्विधमभ्रकम्[7]॥ ८॥
रक्तं पीतञ्च हेमार्थे[8] कृष्णं हेमशरीरयोः[9]।
तारकर्म्मणि शुक्लं च काचकिट्टं सदा[10] त्यजेत्॥ ९॥
एकपत्रं कृतं[11] पूर्व्वम् अभ्रकं सुरनायिके।

---

(1) K reads अग्निप्रविष्टे. M reads दर्दुरोग्निं प्रविष्टे च, wherein the first term is incorrect. (2) K has कुकुटवद्भवेत्. (3) B and M read अग्निं प्रविष्टो नागस्तु. But these texts read the word as neuter in all other places. (4) B has अग्निप्रविष्टं वज्रि तु, wherein the second term is incorrect. K and M have अग्निं प्रविष्टे वज्रे तु, which is gram. inaccurate. (5) K has मरणं प्रिये. Cf. रस.स. Chap. II. vs. 6—9. (6) K reads योग्यं. (7) B has येकैकं वर्णभेदेन, wherein the first term is incorrect. K has an entirely different hemistich, which runs thus:—अभ्रो सत्वाधियोगेन योजनीयो यथाक्रमं. M has एनेकवर्णभेदेन, wherein the first term is inc. (8) M reads रक्तं सितञ्च हैमाभं. Cf. रस.स. Chap. II. v. 10. (9) Vide रस.स. Chap. II. v. 11, where the black mica is highly praised for its merits—"कृष्णवर्णाभ्रं कोटिकोटिगुणाधिकम्." (10) B reads शदा, which is inc. K reads कीट्टं. M reads काचं किट्टं. (11) M reads एकपत्रकृतं.

अगस्त्यपुष्पतोयेन[1] कुमुदानां रसेन च ॥ १० ॥
कपि[2]तिन्दुकजम्बीर मेघनादपुनर्नवैः[3] ।
यवचिञ्चारनालाम्ल-करवीरारुणोत्पलैः ॥ ११ ॥
वनसूरणभूधात्री-भिण्डिमूलाम्लवेतसैः ।
मेषशृङ्गी[4]शशवसा शृङ्गतैलशमीरसैः ॥ १२ ॥
वज्रवल्लीचीरकन्द[5]-मरिचैः सुमुखेन च[6] ।
त्रिदिनं स्वेदयेद्देवि जायते दोषवर्जितम् ॥ १३ ॥
धान्याभ्रकं[7] पुरा कृत्वा[8] सुश्लक्ष्णं नवनीतवत्[9] ।
त्रिंशत्पलं व्योमरजः[10] क्षुद्रमत्स्यपलद्वयम्[11] ॥ १४ ॥
तिलचूर्णपलं[12] गुञ्जा-त्रिपलं[13] पादटङ्कणम्[14] ।
गोधूमबद्धा[15] तत्पिण्डी पञ्चगव्येन भाविता ॥ १५ ॥

---

(1) K has अगस्ति. M has अगस्त्यपुष्पसारेण. (2) M reads कश्वि. (3) K has पुनर्नवा, which is gram. incorrect. (4) B reads मेषशृङ्ग. (5) B reads चिरकंद, which is an error of the scribe. K reads चीरकंदं, which is not accurate. (6) K has समुषेपि च, which has no sense. M reads मरीचैः. (7) B reads धान्यभकं, which is inc. K reads धान्यमभ्रं. (8) K has पुरस्कृत्य. (9) B has नवनीतवान्, which is incorrect. K has सुलक्ष्ण, which is also inc. (10) त्रिंशत्पलव्योम-रजः, a variant in K. त्रिंशत्फलं व्योमरजः, a variant in M, wherein the first term is inc. (11) K reads क्षौद्र. M reads फल. Both the readings seem to be inc. (12) K reads विलचूर्णपलं, which is evidently an error of the scribe. M reads तिलचूर्णफलं, which is inc. (13) B and M read गुञ्जात्रिफलं, which seems to be an error. (14) B reads पादं टङ्कणम्. (15) M reads गोधूमबन्धा, which is not gram. correct.

धमनात् कोष्ठिकायन्त्रे भस्त्राभ्यां[1] तीव्रवह्निना ।
पतत्यभ्रकसत्त्वं तु[2] सत्त्वानि निखिलानि च[3] ॥ १६ ॥
स्वेदनौषधिनिर्य्यास[4]-लोलितं पुटितं मुहुः ।
मृतं तु पञ्चनिचुल[5]-पुटैर्बहुलपोतकम्[6] ॥ १७ ॥
पिण्डितं व्योम निष्क्लेदं[7] दत्त्वा सत्त्वं निरञ्जनम्[8] ।
उमाफलैश्च पुष्पैश्च[9] धष्टिकाम्ल[10]परिप्लुतैः ।
क्षौमदण्डविमर्द्देन गगनं द्रवति स्फुटम् ॥ १८ ॥
अग्निजारं नवे कुम्भे स्थापयित्वा धरोत्तरम्[11] ।
गगनं द्रवति क्षिप्रं मुक्ताफलसमप्रभम् ॥ १९ ॥
शतधा कञ्चुकीचूर्णं कञ्चुकीरसभावितम्[12] ।
द्रावयेद्गगनं देवि[13] लोहानि सकलानि च ॥ २० ॥

---

(1) M has हस्ताभ्यां. For कोष्ठिकायन्त्र vide 4th Paṭala, ślokas 56–58. (2) पतत्यभ्रकसत्वानि, a variant in M. (3) M reads विविधानि च. The portion commencing from गोधूमवद्धा and ending in च is not found in K. (4) M has स्वेदने भूमयांनिर्य्यास, which has no clear sense. [A list of औषधि for स्वेदन is given in detail in the 4th Paṭala.] (5) K reads निचुला. M reads निचुलं. (6) पुटैर्बहुलपातकं, a variant in M. (7) B reads निष्क्लेदं. K reads निष्कादं. M reads व्यापकं टङ्कं. None of the readings appears to be correct. (8) M reads सत्त्वनिरञ्जनं. (9) K reads वचैश्च. (10) B reads पिटिकाम्ल. K reads कोष्टिकाम्ल. (11) K reads घनोत्तरं. (12) M reads भावितः, which is grammatically incorrect, as it is stated as an adjective to चूर्णं. (13) K reads दिव्यं.

धान्याम्लके पर्य्युषितं[1] निचुलक्षारवारिणि[2] ।
स्थितं तद्द्रवतां याति निर्लेपरससन्निभम्[3] ॥ २१ ॥
अगस्त्यपुष्पतोयेन पिष्टा सूरणकन्दके ।
कोष्ठभूमिगतं[4] मासं जायते रससन्निभम् ॥ २२ ॥
छागमूत्रेण संसिक्तं[5] कपि[6]तिन्दुकरेणुना ।
अभ्रकं वापितं[7] देवि जायते जलसन्निभम्[8] ॥ २३ ॥
काकिनी[9]वीजचूर्णेन घृष्ट[10]मभ्रकजं रजः ।
स्नुहिक्षीरेण सप्ताहं सिक्तं घातं[11] द्रुतं[12] भवेत् ॥ २४ ॥
अपामार्गस्य पञ्चाङ्गमभ्रकञ्च सुपेषितम्[13] ।
स्थापयेन्मृन्मये पात्रे[14] तद्द्रवेत् सलिलं यथा[15] ॥ २५ ॥

---

(1) धान्याभ्रके पर्य्युषिते, a variant in K. (2) B has निचुलं चीरवारुणी. K has निचुलाचरवारिणा. M has निचुलं चारवारुणी. We have adopted a reading after collating all the texts. (3) B reads सन्निभां, which is incorrect, as it is an adjective to तत्. K reads अमले रससन्निभं. M reads निर्लेपे. (4) B reads गोष्ठभूमिगतं. This śloka (22nd) is wanting in K. (5) M reads संयुक्तं. (6) K reads कपी. (7) K reads धापितं. M reads पावितं. (8) M reads रससन्निभं. (9) K reads वाकिनी. (10) B reads कृष्ट. (11) K reads स्निग्धघातं. (12) B reads ड्रुतं, which is not accurate. [Up-country-men generally pronounce ड्र as द्र ; hence they pronounce ड्रुतं as द्रुतं.] (13) K reads मभ्रकं च सपेषितं. (14) M reads देवि. (15) द्रवते सलिलं यथा, a variant in K. जायते रससन्निभं, a variant in M. After this we find in M a hemistich, which is nearly a repetition of the former ; the hemistich runs thus :—काकिनीवीजचूर्णेन तद्द्रवेत्सलिलं यथा.

छुष्टमभ्रकचूर्णं तु[1] कपालीमरिचैः सह ।
शिलया वापितं भूयो[2]ऽप्यगस्त्यरससंयुतम्[3] ॥ २६ ॥
मार्जारपादीस्वरस[4]-फलमूलाम्लमर्दितम् ।
मातुलुङ्गफले[5] न्यस्तं व्रीहिमध्ये[6] निधापयेत् ।
तद्भवेत् पक्षमात्रेण[7] शिलासैन्धवयोजितम् ॥ २७ ॥
एकपत्रीकृतं सप्तदिनं[8] मुनिरसे क्षिपेत्[9] ।
दार्वीमरिचसंमिश्रं[10] मौर्वीरसपरिप्लुतम्[11] ॥ २८ ॥
सौवर्चलयुतो मेघा[12] वज्रवल्लीरसप्लुतः ।
शरावसंपुटे ध्मातो[13] जायते जलसन्निभः[14] ॥ २९ ॥
वेगाफलस्य[15] चूर्णेन सममभ्रकजं रजः ।

---

(1) B reads छुत instead of छुष्ट. M reads च instead of तु. (2) शिलया वापितं भूय, an incorrect variant in K. शिलावावितं भूयो, an incomplete variant in M. (3) प्यगस्तिरससंयुतं, a variant in B. चगस्यरसभावितं, an incorrect variant in K. (4) K reads मार्जारपादस्वरसा. M reads मार्जारपादस्वरस. (5) K and M read मातुलिङ्गफले. (6) M reads ह्रव्रीमध्ये, which appears to be incorrect. (7) K reads पक्षमात्रेण. M reads तद्रवैः, which is inc. (8) B reads एकपत्रीकृतसप्त. M reads एकपात्रीकृतं सर्व्वं दिनं. (9) B and M have मुनिरसोचितम्. (10) B has मरिचे संमिश्र, which is inc. K and M have मरीचसंमिश्रं. (11) K reads मौर्वीपत्रपरिप्लुतं. M reads मौर्वीपत्ररसप्लुतम्. (12) K has युतौ मेघौ. This charaṇa and the next are wanting in M. (13) K reads शरावसंपुटो ध्मातो. M reads शरावसम्पुटे ध्माते. (14) M reads erroneously जीयते जलसन्निभम्. (15) B reads खगाफलस्य. M reads वकाफलस्य.

भावितं[1] कुलिशक्षीरे ध्मातं द्रवति[2] तत्क्षणात् ॥ ३० ॥
वज्रवल्लीरसैः[3] पिष्ट्वा व्योम सौवर्चलान्वितम् ।
शरावसंपुटे पक्त्वा[4] द्रवेत् सलिलसन्निभम् ॥ ३१ ॥[5]
गोमांससैन्धवार्कैस्तु[6] मुनितोययुतं पुनः ।
कदली[7]कन्दकान्तःस्थं गोमयाग्नौ त्र्यहं द्रवेत् ॥ ३२ ॥
कृष्णाभ्रपत्रं[8] संगृह्य पीलुतैलेन लेपयेत्[9] ।
सप्ताहमातपे तप्त-माम्ले क्षिप्त्वा[10] दिनत्रयम् ॥ ३३ ॥
वज्रार्कचित्रकक्षारं तुम्बीक्षारस्तथार्जुनः[11] ।
सर्जक्षारो[12] यवक्षारष्टङ्कणश्चाष्टमो[13] भवेत् ॥ ३४ ॥
क्षीरकन्दरसं चैव[14] वज्रकन्दरसं तथा[15] ।

---

(1) K reads साधितं. (2) M reads भवति. (3) K and M read रसैः. (4) K reads युक्तं. M reads पक्वं. (5) This śloka contains an idea, which is similar to that in the 29th. (6) B has गोमांससैन्धवार्कैस्तु. K has गोमांसैः सैन्धवार्कस्तु. M has गोमांसैः सैन्धवाक्रस्तु. We have adopted the above reading after collating all the MSS. (7) K reads कदलि. (8) B has कृष्णाभ्रकपत्रं, the letter क being redundant mars the metre. (9) पीलुनैलेन पेवयेत्, a variant in K, which is inc. (10) K reads तैले. M reads क्षिप्तं. (11) B reads तुंबीक्षारं. K reads तुंविक्षारं. M reads तुम्बीक्षारं. (12) M has सद्यक्षारो, which appears to be the error of the scribe. (13) यवक्षारं टंकणाश्चाष्टमो, a variant in B. यवक्षारटङ्कणश्चाष्टमो, a variant in M. (14) B and K read रसश्चैव, which is not correct, since it is an object to लेपयेत्. (15) B and K read रसस्तथा, which is also inc. for reason stated just above.

बृहतीत्रयसंयुक्तं क्षारवर्गञ्च लेपयेत्[1] ॥ ३५ ॥
कल्केनानेन लिप्तं तत् पत्राभ्रं[2] कांस्यभाजने ।
धमनात्[3] सूर्य्यतापोत्थात्[4] त्रिदिनेन द्रुतं[5] भवेत् ॥ ३६ ॥
अथवाभ्रकपत्रं तु[6] कञ्चुकीक्षीरमध्यगम् ।
भावयेच्च तथा तेन[7] यावच्चूर्णं ततो[8] भवेत् ॥ ३७ ॥
ग्राहयेदभ्रपत्राणि[9] निक्षिप्याम्ले दिनत्रयम् ।
लेपयेत्तेन कल्केन कांस्यपात्रे निधापयेत् ।
सूर्य्यतापेन[10] सप्ताहं द्रुतिः[11] सञ्जायते क्षणात् ॥ ३८ ॥
काकाण्डीफलचूर्णेन[12] द्रावकैः पञ्चभिस्तथा ।
अभ्रकस्य युतं चूर्णं ध्मातं मूषागतं[13] द्रवेत् ॥ ३९ ॥

॥ इति अभ्रकविधिः ॥

---

(1) क्षारवांशाखिलं भवेत्, an incorrect and absurd reading in K. (2) B reads पात्राभ्र, which seems to be inc. (3) B reads धामनात्. K reads ध्मामथात्. (4) सूर्य्यतापस्थ, a reading in K. सूर्य्यतापाद्य, a reading in M. (5) B reads erroneously त्रिदिनद्रुतं. (6) M reads पात्रन्तु, which seems to be inc. (7) B has तथामेन, which is inc. [It ought to have been तथानेन.] (8) यावच्चूर्णसमं, a variant in K. यावच्चूर्णं तते, a variant in M, wherein the last term is inc. (9) M reads पात्राणि, which seems to be inc. (10) K and M read सूर्य्यातपेन. But as all the texts have ताप in the 36th śloka, so we have adopted it in order to keep uniformity. (11) B reads द्रुतिः, which is inc. for reasons stated before. K reads द्रुति (without विसर्ग) which is inc. M reads द्रुतं. (12) काकाण्डीद्रावकैः पञ्च, a variant in B. M reads काकाण्ड. (13) K reads मूखागतं. It is a blunder. Vide p. 39, note (11).

भ्रामकं चुम्बकं चैव कर्षकं द्रावकं[1] तथा ।
एवं चतुर्विधं कान्तं रोमकान्तञ्च पञ्चमम् ॥ ४० ॥
एकद्वित्रिचतुःपञ्च-सर्व्वतोमुखमेव तत्[2] ।
पीतं कृष्णं तथा रक्तं त्रिवर्णं[3] स्यात् पृथक् पृथक् ॥ ४१ ॥
क्रमेण देवतास्तत्र ब्रह्म[4]विष्णुमहेश्वराः ॥ ४२ ॥
स्पर्शवेधि[5] भवेत् पीतं कृष्णं श्रेष्ठं रसायने[6] ।
रक्तवर्णं महाभागे रसबन्धे[7] प्रशस्यते ॥ ४३ ॥
भ्रामकं तु कनिष्ठं स्यात् चुम्बकं मध्यमं[8] प्रिये ।
उत्तमं कर्षकं देवि द्रावकं चोत्तमोत्तमम् ॥ ४४ ॥
भ्रामयेल्लोहजातं[9] तु तत्कान्तं[10] भ्रामकं प्रिये ।
चुम्बयेच्चुम्बकं कान्तं कर्षयेत् कर्षकं प्रिये ॥ ४५ ॥
यत्साच्चाद्द्रावयेल्लोहं[11] तत्कान्तं द्रावकं भवेत्[12] ।
तद्रोमकान्तं स्फुटितात्[13] यथा रोमोद्गमो भवेत्[14] ॥ ४६ ॥

---

(1) M reads here कर्षणं द्रावणं ; but it states afterwards कर्षकं and द्रावकं. (2) सर्वतोमुखवद्भवेत्, a variant in K. (3) K reads वर्णतः. (4) B reads ब्रह्मा, which is gram. inc. (5) B has स्पर्शवेधी. K has सर्ववेधी. Both the readings are gram. inc. (6) M reads वरानने. (7) M reads रसबन्ध, which is incorrect. (8) K has मध्यमं चुम्बकं. (9) B reads erroneously भ्रामयेल्लोहजातं. (10) M reads erroneously ततकान्तं. (11) यत्साच्चाद्द्रावकं लोहं, a variant in K, which is not accurate. (12) M reads प्रिये. (13) रोमकान्तन्तु तल्लोहं, a variant in K. (14) रोमोद्गमनकारकं, a variant in K.

कनिष्ठं[1] स्यादेकमुखं मध्यं द्वित्रिमुखं भवेत्[2]।
चतुःपञ्चमुखं श्रेष्ठम् उत्तमं सर्व्वतोमुखम् ॥ ४७ ॥
भ्रामकं चुम्बकञ्चैव व्याधिनाशे प्रशस्यते।
रसे रसायने चैव कर्षकं द्रावकं हितम् ॥ ४८ ॥
मदोन्मत्तगजः सूतः[3] कान्तमङ्कुशमुच्यते।
चैतं खात्वा[4] ग्रहीतव्यं[5] तत्प्रयत्नेन भूयसा[6] ॥ ४९ ॥
मारुतातप[7]विच्छिन्नं वर्जयेत् सुरसुन्दरि।
वह्निःस्थितं त्वयस्कान्तं[8] छागरक्तेन भावयेत् ॥ ५० ॥
छागरक्तप्रलिप्तेन[9] वाससा परिवेष्टयेत्[10]।
छागचर्म्मपरीवेष्ट्य[11] विन्यसेत् पूर्व्ववत् चितौ ॥ ५१ ॥
उद्धृतं[12] सप्तभिर्मासैः तोयकुम्भे विनिक्षिपेत् ॥ ५२ ॥

---

(1) M reads कनिष्ठि, which is incorrect. (2) त्रिमुखं मध्यमं भवेत्, a variant in K. मध्यं मन्त्रिमुखं भवेत्, a variant in M, which ought to be मध्यमं त्रिमुखं. (3) M reads गजसूतः, which is inc. (4) K reads ज्ञात्वा. (5) All the MSS. read ग्रहीतव्यं, which is gram. inc. (6) M read भूयसः. (7) मारुतातरूप, an incorrect reading in B. मारुतायत, a reading in K, which can be maintained with difficulty. मान्मतातप, a reading in M, which is absurd. (8) K reads वह्निस्थित तयस्कान्तं, which is incorrect. M reads वह्निःस्थितञ्च यत्कान्तं. (9) छागरक्तफलेपेन, an incorrect variant in M. (10) B and M read तत्र वेष्टयेत्. (11) B has परिवेष्टा. K has छागचर्मो. M has परिवेष्टा. None of these is perfectly correct. (12) B reads उद्धतं. K reads उद्धृत्य. Both are inc. M reads म⋯⋯त, which is unintelligible.

रक्तपुष्पैः सदा पूज्यं रक्तमाल्यानुलेपनैः ।
पूजितं मद्यमांसैश्च योज्यं रसरसायने[1] ॥ ५३ ॥
संस्कृतं छागरक्तेन भ्रामकं चुम्बकं भवेत् ।
अनेन क्रमयोगेन द्रावकं भवति प्रिये ॥ ५४ ॥
सूतलोहस्य वक्ष्यामि संस्कारमतिसौख्यदम् ।
जीवदेहे प्रवेशे च देहसौख्यबलप्रदम् ॥ ५५ ॥[2]
कान्तलोहं विना सूतो देहे न क्रामति क्वचित् ।
वेधयेद्व्यापयेच्छीघ्रं[3] तैलबिन्दुरिवाम्भसि ॥ ५६ ॥
न सूतेन विना कान्तो न कान्तः सूतवर्जितः[4] ।
कान्तसूतसमायुक्तः[5] प्रयोगो देहधारकः[6] ॥ ५७ ॥
यवक्षारन्तु संगृह्य[7] स्निग्धभाण्डे[8] निधापयेत् ।
मरिचाभ्रकचूर्णेन[9] पिण्डीबन्धन्तु[10] कारयेत् ।
कान्तलोहं द्रवेद्ध्मातं[11] नात्र कार्य्या विचारणा ॥ ५८ ॥

---

(1) B has रसरसायनैः. M has only सायने, a defective charana. (2) This śloka (55) is not found in K and M. (3) वेद्धयेद्व्यापयेत् सिद्धिं, a variant in K, which has no clear sense. (4) M reads सुतवर्जितः, which is incorrect. (5) K has कान्तः सूतसमायुक्तः. M has कान्तसूतसमायोग. Both the readings seem to be incorrect. (6) K reads देवधारकः, which is erroneous. (7) यावत् चारं तु संगृह्य, a variant in B. K reads यवचारस्तु संगृह्य, which is inc. M has यवक्षाराद्व संग्राह्याः, which is gram. inc. (8) M reads तस्मिन् भाण्डे. (9) K and M read मरीचाभ्रकचूर्णेन. (10) K has पिण्डिबद्धं तु. M has बिम्बिबन्धन्तु, which is inc. (11) B has भवेत् ध्मातं. K has व्रतध्मातं. Both are inc.

त्रिंशच्चुम्बककान्तं च[1] पिष्ट्वा तु त्रिफलाम्भसा[2] ।
तेनैव चालनं कार्य्यं पञ्चनिष्कं तु टङ्कणम् ॥ ५९ ॥
जीर्णवस्त्रे[3] विनिक्षिप्य मधुसर्पिर्युतं पुटेत् ।
संस्थाप्य मासपर्य्यन्तं तत्र शुद्धिर्भवेत्प्रिये ॥ ६० ॥
सिनाड़िकाया मूलं तु[4] दशनिष्कमितं युतम्[5] ।
फलत्रय[6]कषायेन खल्ले[7] तु परिमर्दयेत् ॥ ६१ ॥
त्रिमूषासु समं स्थाप्य[8]मष्टाङ्गुलमितासु च ।
मूषका[9]लेपनं कार्य्यं तन्मूलं निष्कमात्रकम् ॥ ६२ ॥
शिवपञ्चमुखीकार्य्या[10] मूषां[11] प्रति समं ततः ।
यन्त्रहस्ते सुसंबध्य[12] खोटकं च[13] शिलातले ॥ ६३ ॥
तैलेन मिश्रितं कृत्वा कान्तनागं[14] लभेत्ततः ।

---

(1) त्रिंशांशं चुम्बकान्तं च, a variant in K. (2) पिष्ट्वा तु कवलाम्भसा, a variant in M, which is incorrect. (3) M reads जीर्णे वस्त्रे. (4) B has स्विनाषिकोल्लात् सूतं तु, which has no clear sense. M has सीनाड़िकाया मूलं तु. (5) K reads दशनिष्कयुतं मितं, which seems to be inaccurate. (6) M reads बलत्रय. (7) All the MSS. read खल्वे. (8) K reads त्रिमुखासु समास्थाप्य. M reads त्रिमुषासु संस्थाप्य, which is a defective charaṇa. (9) M reads मूषिका. (10) B has शिव-पंचमुखीकार्य्या. K has शिवपञ्चमखीकार्य्यं. M has शिवपञ्चमषीकार्य्ये. (11) K reads मूखां. M reads मूषा, which is gram. inc. (12) यन्त्रहस्ते बधः सर्वे, a variant in K. यन्त्रहस्ते तु सम्बध्य, a variant in M. (13) B reads स्फोटकं च. M reads तटकञ्च. (14) B reads कान्ते नागं. M reads कान्तं नागं.

अभ्रक[1]क्रमयोगेन द्रुतिपातञ्च[2] साधयेत् ॥ ६४ ॥

॥ इति कान्तविधिः ॥

सुरासुरैर्मथ्यमाने क्षीरोदे मन्दराद्रिणा[3] ।
पीतं तदमृतं देवैरमरत्वमुपागतम्[4] ॥ ६५ ॥
पिबतां बिन्दवो देवि पतिता भूमिमण्डले[5] ।
शुष्कास्ते वज्रतां याता नानावर्णा महाबलाः ॥ ६६ ॥
बिन्दवः केऽपि सञ्जाताः[6] सस्यका विमलास्तथा[7] ।
ब्राह्मणाः[8] क्षत्रिया वैश्याः[9] शूद्राश्चैवमनेकधा ॥ ६७ ॥
श्वेता रक्तास्तथा पीताः[10] कृष्णाश्चैव चतुर्विधाः ।
पुरुषाश्च स्त्रियश्चैव नपुंसक[11]मनुक्रमात् ॥ ६८ ॥
वृत्ताः फलकसंपूर्णा[12]स्तेजस्वन्तो महत्तराः[13] ।

---

(1) K has अभ्रकं क्रमयोगेन, which seems to be incorrect. (2) B reads द्रुतिपातश्च. K reads द्रुतिपादैव. M reads द्रुतीपातश्च. None of the above readings is correct. (3) K has क्षीराब्धौ मंदवारिणा, which is inc. M has मन्दरा[illegible]विणाम्, which is also inc. (4) रमरत्वमुपागताः, a variant in K, which is grammatically inc. रमृतत्वमुपागतम्, a variant in M. (5) K reads भुविमण्डले, which is not accurate. (6) बीजव-कोपि सञ्जात, an incorrect variant in M. (7) B has शांस्यकविमला-स्तथा. K has सस्यकातामलास्तथा. (8) K reads ब्राह्मणा (without विसर्ग), which is inc. (9) K reads वैश्या (without विसर्ग), which is inc. (10) B reads श्वेता रक्ता तथा पीता, which is gram. inc. (11) K reads नपुंसक, which mars the metre. (12) हंद्राकफलसंपूर्ण, an inc. variant in K. वृत्ता वलकसम्पूर्णा, a variant in M. (13) K reads तेजोवन्तो बहुतराः.

पुरुषास्ते निबोद्धव्या[1] रेखाबिन्दुविवर्जिताः ॥ ६९ ॥
रेखाबिन्दुसमायुक्ताः खण्डाश्चैव तु योषितः[2] ।
त्रिकोणाः पत्तला दीर्घा[3] विज्ञेयास्ते नपुंसकाः ॥ ७० ॥
सत्त्ववन्तो बलोपेता लोहे क्रामणशीलिनः[4] ।
रसबन्धकराः शीघ्रं पुंवज्राः[5] सुरवन्दिते ॥ ७१ ॥
शरीरकान्तिजननाः[6] स्त्रीवज्राः स्वल्पशक्तयः[7] ।
नपुंसकाः सत्त्वहीनाः कष्टं[8] लोहे क्रमन्ति च ॥ ७२ ॥
क्षत्रियाः[9] सर्व्वकार्य्येषु वर्ज्याश्च[10] रसकर्म्मणि ।
उत्तमा मध्यमाश्चैव कनिष्ठाः परिकीर्त्तिताः ॥ ७३ ॥
स्थूलातिस्थूलमध्याश्च सूक्ष्माः सूक्ष्मतराः[11] प्रिये ।
आस्फोटदाहभेदैश्च[12] निर्व्यङ्गा[13] निरुपद्रवाः ।

---

(1) B reads निषेद्धव्या. K and M read निबाधव्या, which is incorrect. (2) B reads खण्डैश्चैव तु योषितः. K has व्यन्तसाश्चैव योषितः. M has योषिताः. Both are inc. (3) त्रिकोणाः पत्तला दीर्घा, a variant in B. त्रिकोणाः पित्तला दीर्घा, a variant in K. त्रिकोणा वर्त्तुला दीर्घा, a variant in M. (4) B reads क्रमणशीलिनः, which is not perfectly correct. M reads क्रामणि, which is inc. (5) B and K read erroneously पुंवज्रा (without विसर्ग). M reads वुभंवज्रं, which is absurd. (6) B has जनना (without विसर्ग). M has जनन. Both are gram. inc. (7) M reads स्वल्पशान्तयः, which is inaccurate. (8) M reads कष्ट. (9) B and M read क्षत्रियाः, which we have rejected, the term क्षत्रिय being stated in the previous śloka (67th). (10) K reads वज्राश्च. (11) M has सूक्ष्मसूक्ष्मतराः. (12) आस्फोटाहतभेदाश्च, a variant in K. आस्फोटदोहभेदाश्च, a variant in M. (13) B reads निर्व्यांग्या, which seems to be inc.

वीर्य्यवन्तश्च[1] ते ज्येष्ठा निर्मला बलवत्तरा:[2] ॥ ७४ ॥
रसायने भवेद्विप्रो[3] ह्यणिमादिगुणप्रद:[4] ।
क्षत्रियो मृत्युनाशार्थो[5] वलीपलितरोगहा[6] ॥ ७५ ॥
द्रव्यकारो तथा वैश्य:[7] शरीरं दृढ़तां नयेत्[8] ।
व्याधिप्रशमनं शूद्रो[9] वय:स्तम्भं करोति च[10] ॥ ७६ ॥
क्लीवे क्लीवा: स्त्रिय: स्त्रीणां[11] सर्व्वेषां पुरुषा हिता: ॥७७॥
यथा जातिस्तथोत्साहं[12] यथा सत्त्वं तथा गुणान्[13] ।
यथा रुचिस्तथा शीलं यथा शीलं तथा वरम्[14] ।
यथा वरस्तथा[15] वर्णं कुर्व्वन्ति कुलिशा: प्रिये ॥ ७८ ॥
श्यामा शमी घनरवो वर्षाभूमत्तकोद्रवा:[16] ।
आखुकर्णी[17] मुनितरु: कुलत्थं चाम्लवेतसम् ॥ ७९ ॥
मेषशृङ्गी रसोऽप्येषां[18] कन्दस्य[19] सूरणस्य तु ।

---

(1) K reads वीरबंधाश्च. (2) विरूवर्तुला:, a reading in K. (3) K reads भवेद्विप्रा, which is gram. inc. (4) K and M read गुणप्रदा:. (5) K has क्षत्रिया: श्रितनाशास्य, which has no sense. (6) K reads नाशना:. (7) K has द्रव्यशल्किकरा वैश्या:. (8) K has शरीर-दृढ़ताकरा:. (9) K reads व्याधिप्रशमना: शूद्रा:. (10) K has वय:-स्तम्भकरा हि ते. (11) M reads erroneously क्लीवे क्लीवस्त्रिय स्त्रीणां. (12) K reads भयात्साहं. [उत्साहं &c. are objects to कुर्व्वन्ति.] (13) K reads यथावश्य तथा गुणा:, which has no sense. (14) This charaṇa and the next are not found in K and M. (15) B reads यथा वरं तथा. (16) M reads वर्षाभूमत्तकांद्रवा:. (17) B reads erroneously आखुरकर्णी. K reads आखुपर्णी. (18) B has रसे लेषां. K has रसयेषां. (19) B reads कन्दश्च. M reads कन्दस्य. Both are inc.

शोधयेत्त्रिदिनं वज्रं शुद्धिमेति[1] सुरेश्वरि ॥ ८० ॥

मेषशृङ्गं भुजङ्गास्थि कूर्म्मपृष्ठं[2] शिलाजतु ।
सूक्कोलालरसं स्तन्यं[3] कान्तपाषाणमेव च ॥ ८१ ॥

वज्रकं चापि वैक्रान्तं[4] तन्मध्ये प्रक्षिपेत् प्रिये ।
तीव्रानले पुटं[5] दत्त्वा पुटान्तं[6] यावदागतम् ॥ ८२ ॥

कुलत्थं कोद्रवं[7] चापि ह्यमूत्रेण पेषयेत् ।
तप्तं निषिचयेत् पीठे[8] यावत्तद्भस्मतां गतम् ॥ ८३ ॥

एष कापालिको[9] योगो वज्रमारण उत्तमः[10] ॥ ८४ ॥

माक्षिकं मेषशृङ्गं च[11] शिलागन्धकटङ्कणम्[12] ।
वैक्रान्तं तालकं चापि[13] वज्रोक्षीरपरिप्लुतम्[14] ॥ ८५ ॥

---

(1) M reads सिद्धिमेति, which is not accurate. (2) B has कर्म-पृष्टं, which is evidently an error of the scribe. (3) सूक्ष्मीमूलरसस्तन्यं, a variant in K. (4) K reads वज्रं चापि सुवज्रं च. After this, next four charaṇas are not found in K. (5) M reads पुटे. (6) B reads पुटं तं, which seems to be an error. (7) M reads कुलत्थकोद्रवं, which is an error of the scribe. (8) B reads पीड़े, which appears to be inc. K reads पृष्ठे. M reads तस्मिन्निषिचयेत् पृष्ठे. (9) B reads कापालिको, which seems to be the blunder of the scribe. (10) B and M read वज्रमारणमुत्तमम्, which can also be maintained grammatically. (11) मेषभङ्गे च, a variant in B, which is evidently an error. (12) शिलागन्धकटङ्कणं, a reading in M, which is incorrect. (13) B reads जालकं चापि. K reads चैव. (14) M reads वज्रिक्षीरं परिप्लुतम्, which is inc.

लेपं मूषोदरे[1] दत्त्वा समावर्त्तं तु[2] कारयेत् ।
म्रियन्ते हीरकास्तत्र द्वन्द्वे सम्यङ्मिलन्ति च ॥ ८६ ॥
गन्धकं च शिलाधातुं[3] भ्रामकस्य मुखं तथा[4] ।
शशकस्य च दन्तांश्च[5] वेतसाम्लेन पेषयेत् ॥ ८७ ॥
अनेन सिद्ध[6]कल्केन मूषालेपं[7] तु कारयेत् ।
अन्धमूषागतं ध्मातं[8] वज्रं तु म्रियते क्षणात् ॥ ८८ ॥
तेनैव[9] मिलितं वज्रं तारहेम्नि न संशयः ॥ ८९ ॥
तालकं गन्धकं कान्तं ताप्यं कर्पूरटङ्कणम् ।
चिञ्चास्थि[10] मेषशृङ्गं च[11] स्त्रीरजःपरिपेषितम्[12] ।
मूषालेपगतं[13] ध्मातं वज्रं तु म्रियते क्षणात् ॥ ९० ॥
शरपुङ्खस्य पञ्चाङ्गं[14] पेष्यं स्त्रीरजसा ततः[15] ।

---

(1) K reads मूखोदरे, which is incorrect. Vide p. 39, note (11). (2) K reads सवंताका तु. (3) गन्धकश्च शिलाधातु, an incorrect variant in K. M reads गन्धकश्च शिलाजातु, which is also inc. (4) K has भ्रामकश्च सुखस्तथा, which is gram. inc. (5) B reads दन्ताश्च, which is not correct. K reads शशकस्य तु दन्ताश्च, which is also not perfectly correct. (6) M reads सत्व. (7) Both B and K read मूखालेपं. Vide p. 39, note (11). (8) B has not the term ध्मातं. K reads मूखागतं. (9) B reads तेनैत, which is evidently an error. After this charaṇa two ślokas are wanting in M. (10) K reads चिंचास्थि, which is not correct. (11) B reads मेषभृङ्गं च. (12) K reads परीवेष्टितं, which is inc. (13) K reads मूखालिपावृतं, which is not correct. (14) K has सर्वाङ्गं. (15) B reads erroneously स्त्रीरजस ततः. K reads रजसमन्वितम्. M reads रजसाप्ततः, which is erroneous.

पेटारी[1]वीजमथवा संपेष्यं तण्डुलाम्भसा[2] ॥ ८१ ॥
पेष्यं त्रिकर्षकार्पास[3]मूलं वा तण्डुलाम्भसा ।
आरक्तराकामूलं वा[4] क्षौद्रस्तन्येन तु पेषितम्[5] ॥ ८२ ॥
पेषयेद्वज्रकन्दं वा[6] वज्रीक्षीरेण[7] सुव्रते ।
तत्कल्कपुटितं ध्मातं[8] वज्रं चैव मृतं भवेत् ॥ ८३ ॥
महानदीश्वेतशुक्त्यां[9] दिनमेकन्तु भावितम्[10] ।
क्षीरेणोत्तरवारुण्याः[11] कल्केनानेन[12] सुव्रते ॥ ८४ ॥
तालेन मेषशृङ्ग्या च[13] वज्रवल्ल्या च[14] वेष्टितम् ।
अन्धमूषागतं ध्मातं[15] वज्रं तु म्रियते क्षणात् ॥ ८५ ॥

---

(1) K reads पेटरी. M reads पेटारि. (2) पेषितं तंडुलांभसि; a variant in K. (3) K has शीषककर्पास. M has त्रिवर्षकार्पास. (4) आरक्तं चार्कमूलं वा, a variant in K. आरीतराकामूलं वा, a variant in M, which seems to be inc. (5) K reads च पेषितं. M reads सुपेषितम्. (6) पेषयेद्वज्रकन्देन, a variant in K. (7) M reads वज्रिकीरेण, which is an error of the scribe. (8) तत्कल्क पुटिध्मातं, a defective variant in B. तत्कल्कं पुटितध्मातं, a variant in M. (9) K has महानदीभवाशुक्त्या, which is gram. inc. M has महानदीश्वेतशुक्त्या. (10) K reads भावयेत्. (11) K has no विसर्ग after वारुण्या, which is gram. inc. (12) K reads कल्केनाने, wherein न is left out by the scribe. (13) तालस्य मेषशृङ्गाय, an incorrect variant in B. तालस्य मेषशृङ्गाय, a variant in M, which is also inc. (14) B reads वज्रवल्याय. M reads वज्रवल्यय. Both the readings are inc. (15) K reads अन्धमूखागतं ध्मातं. M reads अन्धमूषागतध्मातं.

कान्तस्य पिष्टिकामध्ये वज्रं देवि विनिक्षिपेत् ।
पेषयेद्गन्धतैलेन म्रियते वज्रमीश्वरि ॥ ९६ ॥
कुलत्थाम्भसि[1] कासीससौराष्ट्रीतालकान्विते[2] ।
अपामार्गक्षारयुते[3] वज्रं सिक्तं मृतं भवेत् ॥ ९७ ॥
अमृताकन्दतिमिर-बीजात्वक्‌क्षीरवेष्टितम् ।[4]
मेषशृङ्गगतं[5] वज्रं मृल्लिप्तं म्रियते पुटैः ॥ ९८ ॥
पेटारी हंसपादी च वज्रवल्ली च सूरणम् ।
अश्वत्थस्याङ्कुरा देवि सर्व्वे स्त्रीस्तन्यपेषिताः[6] ॥ ९९ ॥
अनेन सिद्धकल्केन वेष्टितं बृहतीफले[7] ।
क्षिप्तं वह्निर्मृदा[8] लिप्तं म्रियते सप्तभिः पुटैः ॥ १०० ॥
श्वेतेन्दुरेखापुष्पाम्बु[9]-गन्धकत्रयमाक्षिकैः[10] ।
वेष्टितं कुलिशं देवि पुटपाकात्[11] मृतं भवेत् ॥ १०१ ॥
अश्वत्थबदरीभिण्डी[12]-माक्षीकं[13] कर्कटास्थि[14] च ।

---

(1) B reads कुलित्थाम्भसि. M reads कूलस्थाम्भस, which is incorrect. (2) K has तालकान्वितम्. M has an incomplete and incorrect charaṇa राष्टितालखान्विते. (3) अपामार्गाक्षारयुक्ते, a variant in M. (4) This hemistich is not found in K. This śloka and the next four ślokas (98—102) are not found in M. (5) B reads मेषभृङ्गगते, which has no sense. (6) K reads पेषिता (without विसर्ग), which is gram. inc. (7) K has बृहतीफलं. (8) K reads क्षिप्ता वह्नौ मृदा. (9) B reads श्वेतींदुरेखा. K reads श्वेतांबुरेखा. Both are inc. (10) गन्धकं माक्षिकैः सह, a variant in K. (11) B has पुटं पाकात्. (12) B reads बदरि. K reads भाण्डी. (13) B reads माक्षिकं. (14) K reads कच्छपास्थि.

स्नुहीक्षीरेण[1] संपेष्य पुटाद्विप्रो मृतो भवेत् ॥ १०२ ॥
करवीरार्कदुग्धेन मेषशृङ्गं[2] सहिङ्गुलम्।
उदुम्बर[3]समायुक्तं पुटात्[4] क्षत्रियमारणम् ॥ १०३ ॥
बाला चातिबला[5] चैव गन्धकं कर्कटास्थि[6] च।
क्षीरिणीत्तरवारुण्याः[7] पुटनाद्वैश्यमारणम् ॥ १०४ ॥
कण्डूलसूरणेनैव[8] शिलया[9] लशुनेन च।
न्यग्रोधशङ्ख[10]दुग्धेन शूद्रोऽपि म्रियते क्षणात् ॥ १०५ ॥
स्थूला बहुस्थूलपुटैः[11] नश्यन्ति फलकादयः[12]।
सुस्विन्ना[13] इव जायन्ते मृदुत्वमुपजायते ॥ १०६ ॥[14]

(1) B has स्नुहिक्षीरेण. (2) B reads मेषभङ्ग, which is incorrect. (3) M reads औदुम्बर. (4) Both B and M read पुटे ; but they read पुटात् and पुटनात् (in the 5th case-ending) before and after this śloka, i.e. पुटात् in 102, and पुटनात् in 104. (5) B reads बला चातिबला (a mere tautology, अतिबला is a kind of बला, which has four different kinds.) [बाला = ह्रीवेर.] K reads बला वा निम्बुना, which has no clear sense. (6) K has कच्छपास्थि. M has गन्धं कच्छवरास्थि, which is inc. (7) पुटेनं,त्तरवारुण्याः, a variant in M. (8) K reads कङ्गुनी च सूरणेन, which is not only grammatically incorrect, but also defective in metre. (9) B reads शिया, ल being left out by the scribe. (10) B reads शंख्य, which seems to be the blunder of the scribe. (11) K reads पुटे. M reads बहुमूलपुटैः. (12) K has शकलादयः. (13) सुखिना is the incorrect reading in B. This hemistich is wanting in K. M reads सुस्विन्न, which is inc. (14) After this śloka we find in B—सामान्यवज्रमारणम्. As other MSS. are silent in this point, we did not adopt this in the body of the text.

पिष्टामलकपञ्चाङ्गं गौराभा[1]मिन्द्रवारुणीम् ।
अनेन वेष्टितं[2] वज्रं म्रियते सप्तभिः पुटैः ॥ १०७ ॥
मातृवाहकजीवस्य[3] मध्ये वज्रं विनिक्षिपेत् ।
दोलास्वेदे त्र्यहं देवि[4] गुणपत्रसमं[5] भवेत् ॥ १०८ ॥
एरण्डवृक्षमध्ये तु वज्रं देवि विनिक्षिपेत् ।
एकमासे[6] गते देवि गुणपत्रसमं[7] भवेत् ॥ १०९ ॥
कान्तस्य पिष्टिकामध्ये[8] वज्रं देवि विनिक्षिपेत्[9] ।
कार्पास[10]निम्बपत्रं च बदरीपत्रसंयुतम् ॥ ११० ॥
एकत्र पेषयेत्तत्तु[11] कान्तगोलकवेष्टितम्[12] ।
वाह्ये[13] ताम्बूलपत्रेण[14] स्थापयेज्जानुमध्यतः[15] ॥ १११ ॥
यामद्वयेन तद्वज्रं जायते मृदु निश्चितम्[16] ।

---

(1) B reads गौरंभा. K reads राजिनी. (2) M reads पेषितं. (3) K has मातृवाहकवीजस्य. M has मातृहावकजीवस्य. Both the texts seem to be incorrect. (4) This charaṇa and the next three are not found in B. K reads दोलास्वेदं. M reads डोलायां स्वेदयेद्देवि. (5) K reads गुणत्रयसमं. (6) M reads एकमासं, which is gram. inc. (7) K reads गुणत्रयसमं. (8) कान्तस्य पिष्टितं वज्रं, a variant in K, which has no clear sense. (9) सुस्विन्नमिति जायते, a variant in K, which is unconnected. After this we do not find the next two charaṇas in K. (10) B reads कर्पास. M reads कार्पं, स being left out by the scribe. (11) B reads पेषयेत् तं तु. M reads पेषयेत्तं तु. (12) B has कान्तं गोलकवेष्टितं. M has कान्तकोलकवेष्टितम्, which seems to be inc. (13) B reads वाह्य. (14) K reads ताम्बूलपत्रे वज्रं तु. (15) K has स्थापयेद्गजमध्यतः. (16) This charaṇa and the next are not found in K.

तत्क्षणाम्रियते[1] वज्रं तारे हेम्नि न संशयः ॥ ११२ ॥
जम्बीरफलमध्यस्थं वस्त्र[2]पोटलिकागतम्।
क्वाथयेत् कोद्रवक्वाथे[3] क्रमेणानेन तु त्र्यहम्[4]।
तद्वज्रं जायते खोटं[5] हेम्ना मिलति तत्क्षणात्[6] ॥ ११३ ॥
नागवल्ल्या प्रलिप्तं तु तत्पत्रेणैव[7] वेष्टितम्।
जानुमध्ये[8] स्थितं यामं मृदु सञ्जायते ध्रुवम्[9] ॥ ११४ ॥
मूले वज्रलतायास्तु मृदु वज्रं विनिक्षिपेत्।
पुटं दद्यात् प्रयत्नेन भस्मीभवति[10] तत्क्षणात् ॥ ११५ ॥
सुखाद्वन्धकरं ह्याशु[11] सत्त्वं मुञ्चति तत्क्षणात्।
सर्व्वमृत्युप्रशमनाः[12] सर्व्वसिद्धिकराश्च ते[13] ॥ ११६ ॥
अस्थिशृङ्खलमध्यस्थं[14] कृत्वा वज्रं विरम्भितम्[15]।

(1) M reads तत्क्षणाज्जायते. (2) K reads वज्रं पोटलिकागतम्. M reads वस्त्रपं।इलकागतम्. (3) K reads कोद्रवक्वाथैः. (4) M reads सद्यहं, which is senseless. (5) B has only खो. M reads खोइं. (6) K reads लक्षणात्. (7) M reads तत्पत्रेनैव, wherein 'न' is gram. inc. (8) K reads योनिमध्ये. (9) K has संज्ञायते द्रुतम्. (10) K reads म्रियते देवि. (11) K has सुरद्वन्धं करोत्याशु, which has no clear sense. M has सुखादवद्धकरा ह्याशु. (12) सर्वमृत्युप्रशमना (without विसर्ग), a variant in B. सर्वमृत्युः प्रशमनाः, a variant in K. सर्वमृत्युप्रशमनं, a variant in M. All are incorrect. (13) सर्वं सिद्धिरताश्च ते, a reading in B, which is not correct. सर्वव्याधिप्रशताश्च ते, a reading in M, which is absurd. (14) K reads अस्थिशृगालमध्यस्थं. M reads अथ शृङ्खलमध्यस्थं. (15) विराट्हतं, a reading in K. M has a defective charaṇa—कृत्वा वज्रं विर···तम्.

जलभाण्डे तु तत् खिन्नं[1] सप्ताहं[2] द्रवतां व्रजेत् ॥ ११७ ॥
क्षारत्रयं रामठञ्च[3] चणकाम्लाम्लवेतसम्[4] ।
क्षिप्ता[5] ज्वालामुखीक्षीरं स्थलकुम्भी[6]रसेन च ॥ ११८ ॥
एतैस्तु मर्द्दितं वज्रं[7] स्नुह्यर्कपयसा तथा[8] ।
दोलायां[9] स्वेदयेद्देवि जायते[10] रसवद्द्रवथा ॥ ११९ ॥
अथवाप्यभ्रकं[11] खिन्नं मौक्तिकं च प्रवालकम् ।
माक्षिकं नीलपुष्पं च[12] पीतं मरकतं महत्[13] ।
वैदूर्य्यस्फटिकादीनि[14] द्रवन्ति सलिलं यथा ॥ १२० ॥
लोहजातं तथा[15] ध्मातम् अग्निवर्णं तु दृश्यते ।
वापितं सक्रदेकेन[16] मृतं जलसमं[17] भवेत् ॥ १२१ ॥
मुक्ताफलन्तु सप्ताहं वेतसाम्लेन भावितम् ।

---

(1) K reads तत् क्षिप्तं. M reads जलमध्ये तु. (2) K reads सप्ताहात्. (3) K has क्षारत्रयं. M has हि रामठं. (4) K has only चणकाम्लवेतसा. M has चणकाम्लमवेतसम्. (5) K reads क्षिप्तं. (6) M reads स्थलकुम्भ. (7) B has मर्दिता वज्रा. M has मर्दिता वज्र, which is incorrect. (8) M reads पयसस्तथा, which is not correct. (9) M has डोलायां. (10) B reads जायते. (11) B and M read खभ्रकं. (12) M reads नीलपुष्टं च, which is inc. (13) B reads मयकतं, which is inc. K reads मरकतक. M reads पीतमंरतकं भवेत्, which has no sense. (14) All the texts read वैडूर्य. But the reading we have adopted above is generally used, and stated in रस.स. Chap. VIII. v. 57. (15) K and M read यथा. (16) M reads सक्रर्दितेन. (17) B has दंतं समजलं. K has घृतं instead of मृतं.

जम्बीरोदरमध्यस्थं धान्यराशौ निधापयेत् ।
पुटपाकेन तच्चूर्णं[1] जायते सलिलं यथा ॥ १२२ ॥
॥ इति वज्रविधिः ॥

शृणु देवि महाभागे वैक्रान्ताख्यं महारसम् ॥ १२३ ॥
दैत्येन्द्रो महिषः सिद्धो हरदेहसमुद्भवः[2] ।
दुर्गा भगवती देवी[3] तं शूलेन व्यमर्द्दयत्[4] ॥ १२४ ॥
तस्य रक्तं तु पतितं यत्र यत्र स्थितं भुवि ।
तत्र तत्र तु वैक्रान्तो वज्राकारो महारसः[5] ॥ १२५ ॥
विन्ध्यस्य दक्षिणे चास्ति उत्तरे नास्ति सर्व्वथा[6] ।
विकृतयति[7] लोहानि तेन वैक्रान्तकः स्मृतः[8] ॥ १२६ ॥
श्वेतः पीतस्तथा रक्तो नीलः[9] पारावतप्रभः ।
मयूरबालसदृशश्चान्यो मरकतप्रभः[10] ॥ १२७ ॥

---

(1) K reads तद्वर्णं, which is not correct. (2) सर्वदेवसमुद्भवः, a variant in K. (3) B reads भगवति देवि. M reads देवि. (4) तं बलेनैव मर्दयेत्, a variant in M. (5) All the texts read वैक्रान्तं वज्राकारं महारसं. But the term रस is in masculine gender, meaning mercury or any metal. [Rules on genders are not strictly observed in the Purāṇas and Tantras.] (6) सर्वथा सर्वसिद्धिदम्, a variant in K, which is unconnected with the context. (7) K reads विक्रन्तयति. M reads निकृन्तयति. Both are gram. inc. (8) K has वैक्रान्तकं स्मृतम्. [The term वैक्रान्त is used here in both the genders, masculine and neuter, as it is stated in रस.स. Chap. IV. v. 73.] (9) M reads खलः, which is erroneous. [But the term कृष्ण is used as its synonym in the next śloka.] (10) This hemistich is not found in M.

देहसिद्धिकरः कृष्णः[1] पीते पीतः सिते सितः[2] ।
सर्व्वार्थसिद्धिदो रक्तः[3] तथा मरकतप्रभः[4] ।
शेषे द्वे निष्फले वर्ज्ये[5] वैक्रान्तमिति सप्तधा ॥ १२८ ॥
यत्र क्षेत्रे स्थितं देवि[6] वैक्रान्तं तत्र भैरवम् ।
विनायकं च[7] संपूज्य गृह्णीयात् साधकोत्तमः ॥ १२९ ॥
वैक्रान्तं चूर्णितं सूक्ष्मं सुरासुरनमस्कृतम्[8] ।
व्याघ्रीकन्दस्य मध्यस्थं[9] धमयित्वा पुटे स्थितम्[10] ॥ १३० ॥
अश्वमूत्रेण[11] मृदग्नौ स्वेदयेत् सप्तवासरात् ।
छायाशुष्कं ततः कुर्य्या[12]दिदं वैक्रान्तमुत्तमम् ॥ १३१ ॥
अथवा लवणक्षारमूत्राम्लकृष्णतैलकैः[13] ।
कुलत्थकोद्रवक्वाथे[14] स्वेदयेत् सप्त वासरान् ॥ १३२ ॥

---

(1) B reads देहसिद्धिकर कृष्ण. M reads देहसन्धिकरे कृष्णं, which is inc. (2) B and M read पीते पीतं सितं सित. K reads पीतः पीते सितः सिते. We have adopted the above reading after collating all the MSS. (3) B and K read सर्वार्थसिद्धिदं रक्तं. (4) B, K and M read तथा मरकतप्रभम्. (5) K reads वज्रे, which is inc. [From this charaṇa the term वैक्रान्त is used in neuter gender.] (6) B reads स्थिते देवि. M reads यत्र क्षेत्रमिद देवि. Both are gram. inc. (7) K reads तु. (8) सुरासुरनमस्कृतं, a variant in B. (9) M reads व्याघ्रकन्दकमध्यस्थं. (10) K reads धामयित्वा पुटस्थितं. M reads पुटं स्थितम्. (11) B has अश्वसूत्रेण. M has अग्निमूत्रेण. Both are inc. (12) This hemistich and the next two are wanting in K. M has a defective charaṇa—तथा कुर्यां. (13) B reads तुषतैलकैः. (14) कुलत्थं कोद्रवक्वाथे, a variant in B. कूलस्थकोद्रवक्वाथे, a variant in M, which is not correct.

वन्ध्याचूर्णन्तु वैक्रान्तं समांशेन तु चूर्णयेत्[1]।
अजामूत्रेण[2] संभाव्य छायाशुष्कं तु कारयेत्।
अन्धनाले धमित्वा तु[3] मूषासत्त्वं तु जायते[4]॥ १३३॥
मोचमोरटपालाश-क्षारगोमूत्रभावितम्[5]।
वज्रकन्दशिफाकल्क[6]-लाक्षाटङ्कणसंयुतम्॥ १३४॥
वैक्रान्तसम्भवं चूर्णं मेषशृङ्गी[7]द्रवान्वितम्।
पिण्डितं मूकमूषायां[8] ध्मातं सत्त्वं विमुञ्चति॥ १३५॥
वैक्रान्तं वज्रकन्दं च[9] पेषयेद्वज्रवारिणा[10]।
माहिषे नवनीते च[11] सक्षौद्रं पिण्डितं ततः।
शोधयित्वा धमेत् सत्त्व[12]-मिन्द्रगोपसमं पतेत्[13]॥ १३६॥
केतकीस्वरसः कांची[14] मणिमत्थं सखेचरम्[15]।

---

(1) K reads कारयेत्. M reads पूजयेत्. (2) M reads अजमूत्रेण. (3) M reads erroneously अन्धनालयमित्वा तु. (4) K has मूखासत्त्वं तु जायते. (5) M reads कोमूत्रभावितः, which is inc. (6) K has कल्क. M has शिलाकल्क. (7) B reads मेषभृङ्गी, which is inc. M reads मेषशृङ्गि. (8) K reads मूकमूखायां. M reads मूकमूषाया, wherein the omission of अनुस्वार is the error of the scribe. (9) वज्रान्ते वज्रकन्दे च, a variant in K, which has no sense. (10) M reads वज्रसीरिणा, which is inc. (11) B reads पेषित नवनीतेन. M reads माहिषं नवनीतञ्च. (12) शोषयित्वा धमेत् सत्त्वं, a variant in M. (13) इन्द्रगोपासमं भवेत्, a variant in K. M reads इन्द्रकोपसमं पतेत्, which is inc. (14) B reads केतकिस्वरसं कांची. K and M read केतकीस्वरसं कांचि. [But the term स्वरस is in masculine gender.] (15) K has सखेचरीं, which is not correct. M has माणिमत्थं.

खेदनाज्जायते[1] देवि वैक्रान्तं रससन्निभम् ॥ १३७ ॥

॥ इति वैक्रान्तविधिः ॥

सुवर्णं रजतं ताम्रं कान्तलोहस्य वा रजः[2] ।
अनेन खेदविधिना द्रवन्ति सलिलं यथा ॥ १३८ ॥
इत्युक्तमभ्रकादीनां चतुर्णां लक्षणादिकम् ।
तन्ममाचक्ष्व देवेशि किमन्यच्छ्रोतुमिच्छसि ॥ १३९ ॥

इति श्रीपार्व्वतीपरमेश्वरसंवादे[3]
रसार्णवे रससंहितायां
अभ्रकादिलक्षणसंस्कारनिर्णयो नाम
षष्ठः पटलः ॥ ६ ॥

---

(1) K reads erroneously खेदना जायते (2) B reads कान्तलोहं च वाजरः. K reads कांतलोहं च वाजरं. M reads कान्तलोहस्य वा रजः. All the texts seem to be incorrect. We have adopted a reading after collating all of them. (3) This portion is wanting in B and M.

## सप्तमः पटलः ।

श्रीदेव्युवाच ।[1]

सह लक्षण[2]संस्कारै-राज्ञापय महारसान् ।
अन्यच्च तादृशं देव रसविद्योपकारकम् ॥ १ ॥

श्रीभैरव उवाच ।[3]

माक्षिको विमलः शैलः[4] चपलो रसकस्तथा ।
सस्यको दरदश्चैव स्रोतोऽञ्जनमथाष्टकम्[5] ।
अष्टौ महारसाश्चैव[6]-मेतान्[7] प्रथमतः शृणु ॥ २ ॥
कृष्णस्तु भारतं श्रुत्वा[8] योगनिद्रामुपागतः[9] ।
तस्य पादतले विद्धं[10] व्याधेन मृगशङ्कया ॥ ३ ॥
ये तत्र[11] पतिता भूमौ क्षताद्रुधिरबिन्दवः ।

---

(1) M reads देवी and nothing else. (2) B reads लक्षणै, which is not gram. correct. (3) B has भैरवोवाच । K has श्रीभैरव्युवाच । Both the readings are incorrect. M has श्रीभैरवः and nothing else. (4) B reads मलसः instead of विमलः, which seems to be the blunder of the scribe. K reads माक्षिका विमला शिला. M reads शैलो, which is gram. inc. (5) K has सोतांजनकथाष्टकम्, which is inc. [Vide रसरत्नसमुच्चय Chap. II., and रससार, 6th Paṭala, vs. 2–3.] (6) B reads महारसाश्चैव. M reads महारसाश्चैव. Both the readings are inc. (7) K reads मेतत्. (8) K has कृत्वा. (9) B reads सुपागताः, which is gram. inc. (10) K has चिह्नं, which has no sense here. (11) K reads एकत्र.

ते निम्बफलसंस्थाना जाता वै माक्षिकोपलाः[1] ॥ ४ ॥
माक्षिको द्विविधस्तत्र[2] पीतशुक्लविभागतः[3] ।
विमलस्त्रिविधो[4] देवि शुक्लः पीतश्च लोहितः[5] ॥ ५ ॥
तैलारनालतक्रेषु गोमूत्रे कदलीरसे[6] ।
कुलत्थकोद्रवक्वाथैः[7] माक्षिकं विमलं तथा[8] ।
मुहुः शूरणकन्दस्थं स्वेदयेद्वरवर्णिनि[9] ॥ ६ ॥
क्षाराम्ललवणैरण्ड-तैलसर्पिः[10]समन्वितम् ।
पुटत्रयं प्रदातव्यं तद्द्वयं शोधितं भवेत् ॥ ७ ॥

---

(1) This hemistich is wanting in B. K reads माक्षिकोपला (without विसर्ग), which is gram. inc. M reads जाता माक्षिककोमलाः. (2) This hemistich is not found in B. K has an incomplete charaṇa—माक्षिको द्विधस्तत्र. (3) पीतः शुक्लो विभागतः, a variant in K. [रसरत्नसमुच्चय reads माक्षिको द्विविधो हेममाक्षिकस्तारमाक्षिकः. Chap. II. v. 80.] The following śloka is found in MS. K only;—चतुर्थो करकाकारः शुक्तिकापुटसन्निभः । तथांगुलीयकाकारो भस्मकर्त्तरिकासमः ॥ इति माक्षिकलक्षणं ॥ We have placed it in the footnote, because we do not find these varieties of माक्षिक in any other MS., neither in रस.स., nor in रससार. (4) B reads विमलास्त्रिविधा. K reads विमलास्त्रिविधो, which is inc. (5) B has शुक्लः पीतश्च लोहिताः : here the last term is inc. K has शुक्लपीतश्च. [रस.स. mentions the different names of विमल according to its colour, as पीतः—हेमविमलः, शुक्लः—तारविमलः, लोहितः—कांस्यविमलः. Chap. II. v. 96.] (6) गोमूत्रकदलीरसैः, a variant in K. (7) M reads कुलत्थकोद्रवक्वाथे, which is inc. (8) K reads माक्षिको विमलस्तथा, which is not gram. correct, as these are objects to स्वेदयेत्. (9) K reads this hemistich very imperfectly—मुहुः सूरणकं दयेद्वरवर्णिनि. (10) B and M read तैलसर्पिः.

माक्षिकं चूर्णितं स्तन्य[1]-स्नुह्यर्कक्षीरभावितम् ।
सत्त्वं मुञ्चति सुध्मातं टङ्ककङ्कुष्ठमोदितम्[2] ॥ ८ ॥
कदलीकन्दतुलसी-नारङ्गाम्लपरिप्लुतम्[3] ।
सप्तसप्तपुटीपितं[4] पञ्चद्रावकसंयुतम्[5] ।
स्त्रीस्तन्यमोदितं ध्मातं[6] सत्त्वं मुञ्चति माक्षिकम् ॥ ९ ॥
क्षौद्रगन्धर्व्वतैलाभ्यां[7] गोमूत्रेण घृतेन च ।
कदलीकन्दसारेण भावितं माक्षिकं मुहुः ।
मूषायां[8] मुञ्चति ध्मातं सत्त्वं शुल्वनिभं मृदु[9] ॥ १० ॥
देवदालीरसं क्षिप्त्वा[10] पादांशटङ्कणैर्युतम्[11] ।
प्रकटां मूषिकां[12] कृत्वा धमेत् सत्त्वमपेक्षितम्[13] ॥ ११ ॥
किमत्र चित्रं कदलीरसेन
सुपाचितं[14] सूरणकन्दसम्पुटे ।

(1) मर्दकं चूर्णितं स्तन्यं, a variant in M, which is partly correct. (2) टंकणं कुष्ठमर्दितं, a variant in K. (3) M reads पयःप्लुतम्. (4) M reads व्यप्तसप्त पुटीपितं, wherein the first term is inc. (5) M reads सम्मतम्. (6) B reads erroneously स्त्रीसन्यं मोदितं धातं. K has स्त्रीस्तन्यमर्दितं ध्मातं. (7) क्षौद्रं गन्धकतैलाभ्यां, a variant in B. [Vide रस.स. Chap. II. vs. 89–90.] (8) K reads मुखायां, which is incorrect. [Vide p. 39, note (11)]. (9) B reads मृदुः, which is not gram. correct. M reads सत्वं शुल्वकं मृदु, which is inc. as well as incomplete. (10) M has क्षुप्ता. (11) B and M read पादांशं टंकणं युतम्. (12) K reads erroneously मूखिकां. (13) धमेत् सत्वमपेक्षितः, a variant in B. स च मुञ्चति पेक्षितम्, a variant in M. (14) K reads सुभावित.

वातारितैलेन पुटेन ताप्यं
पुटेन दग्धं वरशुद्धिमेति[1] ॥ १२ ॥
गोमूत्रैश्च स्नुहिक्षीरैः[2] भाव्यमेरण्डतैलकैः[3] ।
माक्षिकं दिनमेकन्तु मर्दितं वटकीकृतम् ।
अभ्रवद्धमयेत् सत्त्वं[4] सस्यकस्याप्ययं विधिः[5] ॥ १३ ॥
ताप्यमावर्त्तकं धातु[6]-माक्षिकं[7] मधुधातुकम् ।
माक्षिकं तिक्तमधुरं मेहार्शः[8]क्षयकुष्ठनुत् ।
कफपित्तहरं बल्यं[9] योगवाहि रसायनम् ॥ १४ ॥
ज्वरसन्निपातदारिद्र्याण्यपि[10] यन्नामकथनमात्रेण[11] ।
नश्यन्ति योजनशते[12] कस्तस्माल्लोहवेधकरः[13] ॥ १५ ॥
॥ इति माक्षिकशुद्धिः ॥[14]

---

(1) M reads परशुद्धिमेति. (2) गोमूत्रेण स्नुहिक्षीरैः, a variant in K. (3) B reads तैलकै. (4) K reads सत्वे. M reads अभ्रकन्तु पतेत् सत्त्वं. (5) B has an incomplete charaṇa—सस्याप्ययं विधिः. (6) ताप्य आवर्त्तकन्धार्क, an incorrect variant in M. (7) M reads मार्यिकं, which is an error of the scribe. (8) B has मेहार्त्ता, which is inc. M has महार्शः. (9) M reads बल्य (without अनुस्वार). (10) K has ज्वरसन्निपातदाद्यांण्यपि. M has ज्वरसन्नितदारिद्र्याण्यपि. Both seem to be inc. (11) K has तु after मात्रेण. But we have not adopted it, because the final ण is optionally a गुरु letter. (12) K reads योगशतांतरे. (13) B has कस्तौर्च्याभाह्वैवरकः, which is entirely absurd. M has कस्य लाचालोहवेधकरः, which has no clear sense. (14) B reads इति माक्षिकक्रियाशुद्धिः । This is wanting in M.

विमलं[1] शिग्रुतोयेन काङ्क्षीकासीसटङ्कणैः[2] ।
वज्रकन्दसमायुक्तं भावितं कदलीरसैः[3] ॥ १६ ॥
मोचक[4]क्षारसंयुक्तं धामितं मूकमूषया[5] ।
सत्त्वं चन्द्रार्कसंकाशं[6] प्रयच्छति न संशयः ॥ १७ ॥
॥ इति विमलशुद्धिः[7] ॥
पतितोऽपतितश्चेति[8] द्विविधः शैल ईश्वरि[9] ।
ग्रन्थान्तरेऽपि कीर्त्त्योऽसौ[10] कीर्त्तितो बहुभिः सुरैः ॥ १८ ॥
निदाघे घर्म्मसंतप्ता धातुसारं धराधराः ।
निर्यासं च विमुञ्चन्ति तच्छिलाजतु[11] कीर्त्तितम् ॥ १९ ॥
शिलावद्धातुकं[12] ध्मातं शैलजं गिरिसानुजम्[13] ।

---

(1) B and K read विमला, but use its adjectives in the neuter gender ; this is ungrammatical. (2) कांचिकाशीसटंकणैः, a variant in K. काचिकासिसटङ्कणैः, a variant in M. (3) M reads कदलीरसै. (4) K reads मोचिक. M reads मोचण. (5) M has सन्धितं instead of धामितं. K has मूकमूखया, which is incorrect. (6) M reads संयुक्तं. [The 16th and the 17th ślokas nearly agree with the texts in रस.स. Chap. II. vs. 103–104.] (7) Both B and K read विमलाशुद्धिः । This is wanting in M. (8) पतितः पतितश्चैव, a variant in K. (9) B reads शैलमीश्वरि. M reads द्विविधा शैलमीश्वरि, which is gram. inc. (10) The portion commencing from this charaṇa and ending in शोधयेत्तत्तु यत्नतः (ślokas 18—21) is not found in B and M. (11) K reads शिलाजितु, which seems to be inc. [Cf. रस.स. Chap. II. vs. 110—111.] (12) K reads incompletely धातु. (13) K has गिरिसानुकम्.

जत्वद्रिजं[1] गिरिः शैलः प्रोक्तस्त्वयानुकीर्त्तितः ॥ २० ॥
क्षाराम्लगोजलैर्धौतं[2] शुध्यति च शिलाजतु ।
अथवा गोघृतेनापि त्रिफलदार्द्रकद्रवैः ।
लोहपात्रे विनिक्षिप्य शोधयेत्तत्तु यत्नतः ॥ २१ ॥
शैलं विचूर्णयित्वा[3] तु धान्याम्लोपविषैर्विषैः[4] ।
पिण्डं बद्धा तु विधिवत्[5] पातयेच्चपलं यथा[6] ॥ २२ ॥
॥ इति शैलशुद्धिः[7] ॥
गौरः श्वेतोऽरुणः कृष्णश्चपलस्तु प्रशस्यते ।
हेमाभश्चैव ताराभो विशेषाद्रसबन्धकः[8] ॥ २३ ॥

---

(1) K reads जत्वाद्रिजं, which is incorrect. (2) This charaṇa and the next five charaṇas are not found in B and M. [रस.स. reads "क्षाराम्लगोजलैर्धौतं शुद्ध्येव शिलाजतु । शिलाधातुं च दुग्धेन त्रिफलामार्कवद्रवैः ॥" Chap. II. v. 117.] (3) विचूर्णयित्वा is gram. inc. The correct form is विचूर्ण्य, which, if adopted, destroys the metre. [This form of grammatical error is generally met with in the Purāṇas and Tantras. To avoid this error रस.स. reads शैलं तु चूर्णयित्वा तु, which creates tautology of तु. This śloka (22nd) nearly agrees with the text in रस.स. Chap. II. v. 148.] (4) K has an incorrect reading—धान्याभोपदकर्मणि. (5) This charaṇa is wanting in K. M reads कृत्वा instead of बद्धा. (6) This charaṇa is not found in K. M has पातयेत्फलं यथा, which is unintelligible. [रस.स. reads तथा. Chap. II. v. 148.] (7) K reads इति शिलाजितशुद्धिः, which ought to be शिलाजतुशुद्धिः. (8) B reads रसबन्धनः. M reads रसबन्धनम्.

शेषौ मध्यौ च लाक्षावत्[1] शीघ्रद्रावौ तु निष्फलौ[2] ।
वङ्गवद्द्रवते[3] वह्नौ चपलस्तेन कीर्त्तितः[4] ॥ २४ ॥
वस्त्रेण बद्ध्वा चपलं लङ्घयेद्यदि सागरम् ।
वस्त्रञ्च वेष्टयेत् सद्यः तेनासौ चपलः स्मृतः ॥ २५ ॥[5]
मारयेत् पुटपाकेन चपलं गिरिमस्तके ।
देहबन्धं करोत्येव विशेषाद्रसबन्धनम् ॥ २६ ॥
चपलश्चपलावेधं करोति घनवच्चलः ।
चपलो लेखनः स्निग्धो देहलोहकरो मतः ॥ २७ ॥
॥ इति चपलशुद्धिः ॥[6]
मृत्तिका[7]गुड़पाषाण-भेदतो रसकस्त्रिधा[8] ॥ २८ ॥
पीतस्तु मृत्तिकाकारो मृत्तिकारसको वरः[9] ।

---

(1) B has शेषा मध्याश्च लाक्षावत्. M has शेषा मध्याश्च लाचाय, wherein the last term seems to be incorrect. (2) शीघ्रं द्रावास्तु निष्फलाः, a variant in B. K has शीघ्रद्रावौस्तु, which is inc. रसद्रावास्तु निष्फलम्, a variant in M, wherein the last term is inc. (3) M reads नागवद्द्रवते. (4) The ślokas 23rd and 24th nearly agree with the texts in रस.स. Chap. II. vs. 143–144. (5) The 25th śloka is not found in B and M. (6) The 26th and the 27th ślokas with the portion—इति चपलशुद्धिः are not found in B and M. [The latter hemistich of the 27th śloka exactly agrees with the text in रस.स. Chap. II. v. 145.] (7) M reads मूर्त्तिका, which is inc. (8) B reads भेदकौ तौ, which is not correct. M reads भेदको रसस्त्रिधा, which is a defective charaṇa. [But रस.स. states two sorts of रसक. Vide Chap. II. v. 149.] (9) मृत्तिकारसतो वरम्, a variant in M, which is erroneous.

गुड़ाभो मध्यमो ज्ञेयः पाषाणाभः कनिष्ठकः[1] ॥ २९ ॥
कटुकालाबुनिर्य्यासैनालोड्य[2] रसकं पचेत् ।
शुद्धो दोषविनिर्म्मुक्तः[3] पीतवर्णस्तु जायते[4] ॥ ३० ॥
किमत्र चित्रं रसकं[5] रसेन
रजस्वलायाः कुसुमेन[6] भावितम् ।
क्रमेण कृत्वा उरगेन[7] रञ्जितं
करोति शुल्वं त्रिपुटेन[8] काञ्चनम् ॥ ३१ ॥
क्षीयते नापि वह्निस्थः सत्त्वरूपो महाबलः ॥ ३२ ॥[9]
रसकं चूर्णयित्वा तु बद्धा वस्त्रे विचक्षणः ।
मूत्रे निधापयेत् स्त्रीणां सप्तरात्रं सुरेश्वरि ॥ ३३ ॥
पुष्पाणां रक्तपीतानां रसैः पत्रैश्च[10] भावयेत् ॥ ३४ ॥

---

(1) K reads कनिष्टकः. M reads कनिष्ठिकः. Both are incorrect. (2) B has निर्यासै चालोड्य. M has निर्यासै चालोड्या. Both are incorrect. (3) K reads दोषः विनिर्मुक्तः. M reads विनिर्मुक्तो. Both are gram. inc. (4) पीतवर्णस्तु जायते, a variant in K, which seems to be an error of the scribe. जायते पीतवर्णकः, a variant in M. [Vide रस.स. Chap. II. vs. 153-154.] (5) M reads रसको. [The term रसक is of both genders.] (6) M reads रजस्वलाया ऋतुजेन. (7) K reads तुरगेण. [Both उरग (lead) and तुरग (sulphur) are mentioned in रसचिन्तामणि, Chap. 3.] (8) M has गन्धं पुटकेन. (9) This hemistich is not found in B and M. After this 32nd śloka we find अन्यच्च in K only ; hence we have not inserted it in the text. It appears to be redundant. (10) B reads पत्तैश्च, which is evidently an error of the scribe. K reads पित्तैश्च, which is also incorrect, as the पित्त of flowers is unusual.

क्षारैः स्नेहैस्तथा चाम्लैः भावितं रसकं मुहुः ।
ऊर्णालाक्षानिशा[1]पथ्या भूलताधूमसंयुतम्[2] ॥ ३५ ॥
मूकमूषागतं[3] ध्मातं टङ्कणेन समन्वितम् ।
सत्त्वं कुटिलसङ्काशं मुञ्चत्येव[4] न संशयः[5] ॥ ३६ ॥
गोभद्रो रसकस्तुल्यं[6] क्षितिकिट्टो[7] रसोद्भवः ।
खर्परो[8] नेत्ररोगारिः रीतिकृत्ताम्ररञ्जकः[9] ॥ ३७ ॥
रसको रञ्जको रूक्षो वातकृत् श्लेष्मनाशनः[10] ।
त्रिदोषघ्नन्तु तत्सत्त्वं नेत्रदोषविनाशनम्[11] ॥ ३८ ॥
॥ इति रसकशुद्धिः[12] ॥

कालकूट[13]विषं पीत्वा गरुड़ः सोदुमक्षमः ।

---

(1) B has ऊर्णालाक्षा तथा, wherein the first term is not correct. K has तथा in lieu of निशा. M has ऊर्ण instead of ऊर्णा. [Vide रस.स. Chap. II. v. 162, which mentions निशा.] (2) K reads संयुता, which is gram. inc. (3) B has गते. K has मूखा. M has एक in place of मूक. All the readings are inc. (4) Vide रस.स. Chap. II. v. 161, which says "वङ्गाभं पतितं सत्त्वं." K reads मुञ्चत्यत्र. M reads मुञ्चत्येवं. (5) Cf. रस.स. Chap. II. v. 162. (6) M has an incomplete charaṇa—रसस्तु······ल्यं. (7) M reads भट्टो, which seems to be inc. (8) B has खर्परी. M has कर्परी. (9) K reads रतिकृत्वामरंजकः. M reads रीतिकृत्ता चिरञ्जकः. (10) M reads नाशिनी, which is not correct. [रस.स. states कफपित्तविनाशनः. Chap. II. v. 150.] (11) K reads नेत्ररोगविनाशनम्. M reads नेत्रदोषं हरन्ति च, which is gram. inc. (12) B has not इति. M reads रसशुद्धिः, which is not correct. (13) B reads कालकूटे.

सुधामपि तथावामत्[1] भुक्त आशीविषामृते[2] ।
स्वयं विनिर्गते चञ्चोः सस्यकोऽभूत् स कालिकः[3] ॥ ३९ ॥
एकधा सस्यकस्तस्य[4] स्त्रीमूत्रे भावयेद्रजः[5] ।
शश[6]शोणितमध्ये वा दिनमेकं निधापयेत् ॥ ४० ॥
तस्य चूर्णं महेशानि पादसौभाग्यसंयुतम्[7] ।
करञ्जतैलमध्यस्थं दिनमेकं निधापयेत्[8] ॥ ४१ ॥
मध्यस्थमन्धमूषायाः[9] धमयेत् कोकिलात्रयम्[10] ।
इन्द्रगोपकसंकाशं[11] सत्त्वं पतति शोभनम्[12] ॥ ४२ ॥
एकधा सस्यकस्तस्मात्[13] घातो निपतितो भवेत् ।

---

(1) B reads स्वधावामत्. K reads सुधां चारु. M reads सुधामविश्वधामानं, which is unintelligible. We have kept अवामत्, though gram. incorrect, merely for the sake of metre. (2) प्रोक्तमासीविषामृते, a variant in B. भुक्तामासीद्विषामृते, a variant in K. प्रोक्तमाशीविषाहृते, a variant in M. [Vide रसरत्नसमुच्चय Chap. II. vs. 126–127.] (3) M reads सकाशतः. (4) एकमा सस्यकस्तुल्यं, a reading in K, which seems to be inc. M reads एकया instead of एकधा. (5) M reads द्रावयेद्रजः. (6) M has शर. (7) M has an incorrect reading—पादश्चन्द्रसाध्यसंयुतम्. (8) Cf. रस.स. Chap. II. v. 133. (9) K has अन्धमूखाशं, which is erroneous. M has मयकूपायां, which is absurd. रस.स. has अन्धमूषास्यमध्यस्थं. Chap. II. v. 134. (10) K reads धापयेत्. रस.स. reads also धापयेत् कोकिलत्रयम्. Chap. II. v. 134. (11) M has an absurd reading—षगोपकाशासाकाशा. रस.स has इन्द्रगोपाकृति चैव. (12) रस.स. reads भवति instead of पतति. Chap. II. v. 134. (13) K reads सस्यकस्तुल्यं. M reads एकया सस्यकामध्ये.

कालिकारहितो रक्तः शिखिकंठ[1]समाकृतिः ॥ ४३ ॥
सस्यां मयूरतुल्यं स्यात्[2] वह्निकृत् कालनाशनः[3] ।
रसायने तु योग्यः स्याद्[4] वयस्तम्भकरो भवेत् ॥ ४४ ॥
सस्यकः शुद्धिमाप्नोति रक्तवर्गेण भावितः[5] ॥ ४५ ॥

॥ इति सस्यकशुद्धिः ॥

दरदस्त्रिविधः प्रोक्त[6]श्चर्म्मारः शुकतुण्डकः[7] ।
हंसपादस्तृतीयः स्याद्[8]-गुणवानुत्तरोत्तरः[9] ॥ ४६ ॥
चूर्णपारदभेदेन[10] द्विविधो दरदः पुनः ॥ ४७ ॥

---

(1) K has शिखिहंस. M has शिखिकर्णि. But रस.स. has मयूरकण्ठसच्छायं. Chap. II. v. 127. (2) B has तुल्य स्याद. K has तुल्य स्या. M has तुर्ध्य. All the readings are gram. incorrect. (3) B reads कलनाशनः, which has no clear sense. K reads वह्निकृदग्निनाशनः. (4) B and K have योग्य स्याद. M has योग्यस्तद. Both are gram. inc. (5) K and M read रसवर्गेण, which is evidently an error; because we find in रस.स. रक्त-वर्गेण, which is supported by the MS. B. M has भावितम्, which is gram. erroneous. [Vide रस.स. Chap. II. v. 130.] (6) दरदस्त्रिविधो रक्त, a variant in B and M. (7) B has चर्मारशुकदडकः. M has चर्माभः शुकदण्डकः. (8) B and M read हंसपादस्तु लेपः स्यात्. [रस.स. reads हंसपाकः. Vide Chap. III. v. 139.] (9) All the MSS. have उत्तरोत्तरम् ; but since दरद is written in the masculine gender, it ought to have an adjective in the same gender. (10) K reads भेदानि. M reads दारद. Both are inc.

गोमांसे माहिषे मूत्रे[1] दध्यम्लतिलतैलयोः[2] ।
एकैकं त्रिदिनं पक्त्वा शिखिपित्तेन भावयेत् ॥ ४८ ॥
दरदं पातनायन्त्रे[3] पातयेत् सलिलाशये[4] ।
सत्त्वं तु सूतसंकाशं[5] जायते नात्र संशयः[6] ॥ ४९ ॥
लवुकन्दरदो म्लेच्छो[7] हिङ्गुलं चूर्णपारदम्[8] ।
मणिरागजमस्यैव[9] नाम चर्मारगन्धिकम्[10] ॥ ५० ॥
तिक्तोष्णं हिङ्गुलं दिव्यं[11] रसगन्धकसम्भवम्[12] ।
लोहकुष्ठहरं दिव्य[13]-बलमेधाग्निदीपनम् ॥ ५१ ॥

---

(1) The portion commencing from this charaṇa and ending in घृताक्तकर्पटोपरि (48—70) is wanting in K. (2) दध्यं सतिलतैलयोः, a variant in M, which seems to be incorrect. (3) M has दरदः पातयेत् पात्रे, wherein the first term is gram. inc. [For पातनायन्त्र vide रस.स. Chap. IX. vs. 6—8.] (4) The term पातयेत् is wanting in B, which reads सलिलाशया. M reads सलिलाशयः. But as we see in रस.स., which nearly agrees with this śloka, the term जलाशये, we have adopted the above reading as correct one. [Vide Chap. III. v. 144.] (5) सत्वं सूतकसङ्काशं, a variant in M. [रस.स. reads तत्सत्त्वं सूतसंकाशं. Chap. III. v. 144.] (6) रस.स. reads पातयेन्नात्र संशयः. [Chap. III. v. 144.] (7) M has an incorrect and incomplete reading—लवुकन्दरदोम्लेन. (8) B reads पूर्णपारग. M reads पूर्णपारगम्. (9) मणिनामकरंदसैव, a variant in B. मणिकामाकरं सैव, a variant in M. Both the readings seem to be inc. (10) B reads नामा. M reads नामा चर्मारगन्धितम्. (11) M reads द्रव्यं. (12) M reads संभवेत्, which is not correct. (13) B has लोहकूटहरं दिव्यं. M has दीका, which has no sense.

किमत्र चित्रं दरदः सुभावितः
चोरेण मेष्या बहुशोऽम्लवर्गैः ।
सितं सुवर्णं बहुघर्म्मतापितं
करोति साक्षाद्दरकुङ्कुमप्रभम् ॥[1] ५२ ॥

॥ इति दरदशुद्धिः ॥

वल्मीकशिखराकारं भङ्गे नीलोत्पलद्युति ।
घृष्टन्तु गैरिकच्छायं[2] स्रोतोजं सुरवन्दितं[3] ॥ ५३ ॥
गोशकृद्रसमूत्रेषु घृतक्षौद्रवसासु च ।
भावितं बहुशस्तच्च क्षिप्रं बध्नाति सूतकम्[4] ॥ ५४ ॥

॥ इति स्रोतोऽञ्जनशुद्धिः ॥[5]

॥ इत्यष्टमहारसशुद्धिः ॥[6]

एवं महारसाः[7] प्रोक्ताः शृणुष्वोपरसान्[8] प्रिये ॥ ५५ ॥

---

(1) M reads बहुघर्मभावितं. This śloka agrees with the text in रस.स. except the term सितं, which is एवं. [Chap. III. v. 143.] (2) घृष्टन्तु गैरिकच्छायं,—an incorrect variant in M. (3) M reads स्रोतोऽञ्ज, which is evidently an error. This śloka agrees with the text in रस.स. except the last term, which is लक्षयद्बुधः. (4) Cf. रस.स. Chap. III. v. 107. (5) This portion is wanting in M. (6) This portion is not found in M. (7) B reads महारसा (without विसर्ग), which is inc. (8) M has शृणुष्वेव रसान्, which is gram. inc. [The verb शृणुष्व is gram. inc. The correct form is शृणु. This sort of error is generally seen in the Purāṇas and Tantras. For a similar grammatical anomaly vide ante page 100, note 3.]

गन्धकस्तालकः[1] शिला सौराष्ट्री खग[2]गैरिकम् ।
राजावर्त्तश्च[3] कङ्कुष्ठम्[4] अष्टौ[5] उपरसाः स्मृताः[6] ॥ ५६ ॥
श्वेतद्वीपे पुरा देवि सर्व्वरत्नविभूषिते ।
सर्व्वकाममये रम्ये तीरे क्षीरपयोनिधेः[7] ॥ ५७ ॥
विद्याधरीभिर्मुख्याभिरङ्गनाभिश्च योषिते ।[8]
सिद्धाङ्गनाभिस्त्रिदशाभिस्तथैवाप्सरसां गणैः ॥ ५८ ॥
देवाङ्गनाभिरन्याभिः क्रीड़िताभिः पुरा प्रिये ।
गीतनृत्यैर्विचित्रैश्च वाद्यैर्नानाविधैस्तथा ॥ ५९ ॥
एवं[9] संक्रीड़मानायास्तवाभूत् प्रसृतं[10] रजः ।
तद्रजोऽतीव सुश्रोणि[11] सुगन्धि सुमनोहरम्[12] ॥ ६० ॥
रजसश्चातिबाहुल्यात् वासस्ते रक्ततां[13] ययौ ।
तत्र त्यक्त्वा तु तद्वासः[14] सुस्नाता[15] क्षीरसागरे ॥ ६१ ॥

---

(1) B reads here गन्धकं तालकं. But it writes afterwards गन्धकः and तालकः. (2) M reads खर here; but we see afterwards in B and M काशीशं instead of खग or खर. [Vide śloka 81.] (3) B and M read at first राजावर्त्तं, but afterwards राजावर्त्तः. (4) B reads कङ्कुष्टं. (5) B has अष्टा, which is grammatically inc. (6) B reads प्रिये. (7) B has पयोनिधे (without विसर्ग), which is incorrect. (8) This hemistich and the next three are not found in M. (9) M reads बहु. (10) B reads प्रसूतं, which is neither accurate nor metrical. (11) M has सुश्राणि, which is gram. inc. (12) B reads सुमहत्तरम्. (13) B reads पक्वतां. (14) B has तद्वस्त्रं. (15) M reads तास्मापि.

हृता[1] देवाङ्गनाभिस्त्वं सुरैश्चापि पुरं[2] गता ।
ऊर्म्मिभिस्ते रजोवस्त्रं[3] नीतं मध्ये[4] पयोनिधेः ॥ ६२ ॥
एवं ते शोणितं भद्रे प्रविष्टं क्षीरसागरे ।
क्षीराब्धिमथने चैतदमृतेन सहोत्थितम् ।
निजगन्धेन तान् सर्व्वान् हर्षयद्देवदानवान्[5] ॥ ६३ ॥
ततो देवगणैरुक्तं[6] गन्धकाख्यो भवत्वयम् ॥ ६४ ॥
रसस्य बन्धनार्थाय जारणाय[7] भवत्वयम् ।
ये गुणाः पारदे प्रोक्ता[8]स्ते चैवात्र भवन्त्विति ॥ ६५ ॥
इति देवगणैः प्रीतैः पुरा प्रोक्तं सुरेश्वरि ।
तेनायं गन्धको नाम विख्यातः क्षितिमण्डले ॥ ६६ ॥
स चापि त्रिविधो देवि शुकचञ्चुनिभो वरः ।
मध्यमः पीतवर्णः स्याच्छुक्लवर्णोऽधमः प्रिये ॥ ६७ ॥
करञ्जैरण्डतैलेन द्रावयित्वाजदुग्धके[9] ।
सिञ्चेदुन्मत्तनिर्यासे[10] त्रीन् वारांस्तं[11] पृथक् पृथक् ॥ ६८ ॥

---

(1) B reads हृत्ता, which is not accurate. (2) B has सुरैराप्सु पुरा, which has no sense. (3) उर्वशीभिस्तद्रजोवस्त्रं, a variant in M. (4) This term is wanting in M. (5) Both B and M read सर्व्वदानवान्, which creates tautology. (6) M has देवगणैर्युक्तं, which appears to be incorrect. (7) M reads जारणार्थाय. (8) B has पारदैः प्रोक्ताः, which is gram. inc. M has पारदेऽप्युक्ताः. (9) द्रावयित्वा च दुग्धकैः, a variant in M. (10) M reads सिञ्चेदुत्तमनिर्यासैः, wherein the middle term seems to be inaccurate. (11) Both B and M read त्रीन् वारांस्तं, which is gram. inc.

ज्वालिनीवीजचूर्णेन मत्स्यपित्तैश्च भावयेत् ।
भृङ्गाम्भसा वा सप्ताहं भावितः चालितोऽम्भसा[1] ॥ ६८ ॥
तापितो बदराङ्गारैः[2] घृताक्ते लोहभाजने ।
आवर्त्तितश्च मृद्वग्नौ घृताक्त[3]कर्पटोपरि ॥ ७० ॥
क्षिप्रं भृङ्गस्य निर्यासे[4] चालितो गन्धको हितः[5] ॥ ७१ ॥
गन्धको हि स्वभावेन रसरूपः[6] स्वरूपतः ।
गन्धकं शोधयेत् क्षीरे[7] भृङ्गवेररसे तथा[8] ॥ ७२ ॥
रसे च[9] भृङ्गराजस्य निम्बुकस्य रसे तथा[10] ।
शोधितः सप्तवाराणि[11] गन्धको जायतेऽमलः[12] ॥ ७३ ॥
॥ इति[13] गन्धकशुद्धिः ॥
तालकः पटलः पिण्डो द्विधा तत्राद्य उत्तमः ।
कुष्माण्डे तु शतं[14] वारान् तालकं स्वेदयेद्बुधः ॥ ७४ ॥

---

(1) B has भावितं चालितांभसा. M has भावितं चालिताम्भसा. Both the readings seem to be inaccurate. (2) तापीतयदराङ्गारैः, a variant in M, which is evidently an error of the scribe. (3) M reads घृताक्ते. (4) निक्षिप्य भृङ्गनिर्यासे, a variant in K. M reads भृङ्गस्य सारेण. (5) M reads हितम्, which is grammatically inc., being an adjective to गन्धकः. (6) B reads रसः रूपः, which is not correct. (7) M has चारे. (8) K has शृङ्गवेररसैस्तथा. M has शृङ्गिवेररसे तथा. (9) K reads रसगं, which is inc. (10) निंबकस्य रसे ततः, a variant in K. निम्बकस्य रसे तथा, a variant in M. (11) All the texts have this reading, which is not authorised by any lexicon. The correct form is सप्तवारान्. (12) M reads गन्धको निर्मलो भवेत्. (13) This term is wanting in B. (14) M reads शतान्, which is gram. inc.

स्नुक्क्षीरकटुकालाबु[1]-रसयोः सप्तधा पृथक् ।
तिलसर्षपशिग्रूणि लाक्षा च लवणं गुड़ः[2] ।
टङ्कणं च युतैर्ह्रतैः[3] तालकं भूधरे द्रवेत्[4] ॥ ७५ ॥
व्याधिघातफलक्षारं[5] मधु[6]कुष्माण्डकं तथा ।
द्रवैः[7] पुनर्नवोद्भूतैः सप्ताहं मर्दयेद्बुधः ॥ ७६ ॥
दत्त्वा पादांशकं[8] सर्व्वं ततः पातनयन्त्रके ।
दद्यात् पुटं गजाकारं[9] पतेत् सत्त्वं सुतालकात्[10] ॥ ७७ ॥

॥ इति तालकशुद्धिः ॥[11]

रक्ता शिला[12] तु गोमांसे लुङ्गाम्लेन विपाचिता[13] ।
(त्रिपुष्पेण पृथग्भाव्या शिला तालकवद्द्रवेत् ।)[14]

---

(1) B has स्नुक्क्षीरकरंटुकालाबु. which is unintelligible, as well as defective in metre. K has स्नुह्यर्कक्षीरकटुकौ. M has स्नुक्क्षीरकटुकालाम्बु. (2) M has गुड़म्. (3) B reads युतं ह्रौते, which is gram. incorrect. M reads युतं ह्रौतैः. (4) K reads धमेत्. M reads न्द्रवत्, which is inc. (5) व्याधिघातबलक्षार, a variant in B. व्याघ्रीद्भूतफलक्षार, a variant in K. M has an incomplete charaṇa—व्याधिघातप···रक्ष्म. (6) B reads मंबु. M has not this term. (7) B reads द्रावैः. (8) M reads पादात् क्रमं. (9) M reads गम्बकाद्यान्. (10) पतेत् सर्वं सुतालकम्, a variant in M. (11) This is wanting in B and M. (12) K reads रक्तां शिलां, which seems to be gram. inc. (13) भङ्गाम्ले च विपाचिता, a variant in B. लुङ्गाम्लेन तु पाचिते, a variant in K. लुङ्गाम्लेन विपाचितम्, a variant in M. The last two readings are gram. incorrect. (14) This hemistich is found only in M.

तां रक्तपीतपुष्पाणां रसैः पित्तैश्च भावयेत् ॥ ७८ ॥

॥ इति शिलाशुद्धिः ॥[1]

सिता कृष्णा च सौराष्ट्री चूर्णखण्डात्मिका च सा[2] ॥७९॥
गोपित्तेन[3] शतं वारान् सौराष्ट्रीं भावयेत्ततः ।
धमित्वा पातयेत् सत्त्वं क्रामणं चातिगुह्यकम् ॥ ८० ॥

॥ इति सौराष्ट्रीशुद्धिः ॥[4]

काशीसं त्रिविधं शुक्लं[5] कृष्णं पीतमिति प्रिये ॥ ८१ ॥
काशीसं चूर्णयित्वा तु कासमर्दरसेन च ।
राजकोशातकीतोयैः[6] पित्तैश्च[7] परिभावयेत् ॥ ८२ ॥

॥ इति काशीसशुद्धिः ॥[8]

गैरिकं त्रिविधं रक्तहेमकेवलभेदतः[9] ।
रक्तवर्गरसक्वाथपित्तै[10]स्तद्भावयेत् पृथक् ॥ ८३ ॥
अनेन क्रमयोगेन गैरिकं विमलं धमेत्[11] ।
क्रमात् सितञ्च[12] रक्तञ्च सत्त्वं पतति शोभनम् ॥ ८४ ॥

॥ इति गैरिकशुद्धिः ॥[13]

---

(1) This is wanting in B and M. K has इति मनःशिलाशुद्धिः ॥ (2) M reads चूर्णिते सात्मिकाचसा, which is unintelligible. (3) M has गोवित्तेन, which is inc. (4) This is wanting in B and M. (5) K has काशसं त्रिध शुक्ल. M has कासीसन्त्री······शुक्ल. Both are incomplete. (6) K reads कोशतकी. M reads तोये. (7) M reads पञ्चैश्च. (8) This is wanting in B and M. (9) हेमाधं सितभेदतः, a variant in M. (10) M reads वित्तैः, which is inc. (11) K reads भवेत्. (12) M reads पीतञ्च. (13) This is wanting in B and M.

राजावर्त्तो द्विधा देवि गुलिका[1]चूर्णभेदतः ॥ ८५ ॥
तच्चूर्णं देवदेवेशि महिषीक्षीरसंयुतम्[2] ।
विपचेदायसे पात्रे गोघृतेन विमिश्रितम्[3] ॥ ८६ ॥
तच्चूर्णितं सुरेशानि[4] कुनटीघृतमिश्रितम्[5] ।
सौभाग्यपञ्चगव्येन पिण्डीबद्धं तु[6] कारयेत् ।
धमितं खादिराङ्गारैः[7] सत्त्वं मुञ्चति शोभनम् ॥ ८७ ॥

॥ इति राजावर्त्तशुद्धिः ॥[8]

कङ्कुष्ठं विद्रुमच्छायं[9] तच्च सत्त्वमयं प्रिये[10] ॥ ८८ ॥

॥ इति कङ्कुष्ठम् ॥

सूर्य्यावर्त्तोदककणा-वह्निशिग्रुशिफारसैः[11] ।
कदली[12]कन्दसारेण वन्ध्याकोशातकीरसैः[13] ॥ ८९ ॥

---

(1) K reads गुटिका. (2) K reads मिश्रितं. (3) M reads संमिश्रितम्. (4) M has महेशानि. (5) B reads कुनटि. K reads संयुतम्. M reads कूनटी, which appears to be the error of the scribe. (6) B reads पिण्डीबंधं तु. K reads पिंडिबद्धं तु. M reads पिण्डबद्धन्तु. (7) धामितः खदिराङ्गारैः, a variant in B. K reads धामितं. M reads धमितः. (8) This is wanting in B and M. We find the 84th śloka in all the MSS. after इति राजावर्त्तशुद्धिः ; but looking at the context, we placed the same after the 83rd śloka. (9) M reads विद्रुमच्छायां, which is gram. inc. (10) B reads यच्च. K reads सत्वं तु यत्प्रिये. (11) B has वनशिग्रु. K has नवसीग्रु. M has शिवारसैः. (12) K reads कदली. (13) K reads कौशतकी, which seems to be incorrect.

काकमाची[1]देवदाली[2]-वज्रकन्दरसैस्तथा[3] ।
एभिर्व्यस्तैः[4] समस्तैर्वा चाराम्लस्नेहसैन्धवैः ।
महारसाश्चोपरसाः शुद्धिमायान्ति भाविताः ॥ ९० ॥
लाक्षालवणसौभाग्य-धूमसार[5]कटुत्रयम् ।
शिग्रुमूल[6]-मधूच्छिष्टं पथ्यागुग्गुलुधातवः[7] ॥ ९१ ॥
सर्जिकासर्जनिर्यास[8]-पिण्याकोर्णासमन्वितम्[9] ।
पारावतमलक्षुद्रमत्स्यद्रावकपञ्चकम्[10] ॥ ९२ ॥
तिलसर्षपगोधूम-माषनिष्पावचिक्कसम्[11] ।
छागक्षीरेण[12] संयुक्तं वज्रपिण्डो तु कीर्त्तिता[13] ॥ ९३ ॥
अनया वज्रपिण्ड्या तु पञ्च[14]माहिषयुक्तया ।
महारसा मोदितास्तु पञ्चगव्येन भाविताः ॥ ९४ ॥
कोष्ठे[15] खराग्निना ध्माताः[16] सत्त्वं मुञ्चन्ति[17] सुव्रते ।

---

(1) K has काचूमाचि, which appears to be incorrect. (2) M reads देवताली. (3) B and M have रसेन च. (4) M reads एभिर्नैव. (5) M reads द्रुमसार. (6) K reads शिग्रुमूल. M reads शिग्रमूलं. (7) पथ्यां गुग्गुलधातवः, a variant in B, wherein the first term is incorrect. M reads सर्जिकम् instead of धातवः. (8) B has सर्जिनिर्यास. M has सर्जनिर्यासपिण्याकी. (9) पिन्याकोर्णासमन्विता, a variant in K. M has an incomplete charaṇa—नागसमन्वितम्. (10) B reads पंचमं. (11) M has निष्पापचिक्कसः. (12) K reads छागीक्षीरेण. (13) वज्रपींडो तु कीर्त्तिताः, an incorrect variant in K. वज्रपिण्डीति कीर्त्तितः, a variant in M, wherein the last term is gram. inc. (14) M reads फल. (15) K reads काष्ठ. M reads काष्ठ. (16) B and M read ध्मात. (17) K and M read मुञ्चति.

एवं शिलाभ्यो जीवेभ्यो मृदुभ्य: सत्त्वं प्रजायते[1] ॥ ९५ ॥

॥ इत्युपरसा अष्टौ ॥[2]

एवं चोपरसा: प्रोक्ता: शृणु[3] लोहान्यत: परम् ॥ ९६ ॥
सुवर्णं रजतं ताम्रं तीक्ष्णं वङ्गं भुजङ्गमम्[4] ।
लोहन्तु[5] षड्विधं तच्च यथा पूर्व्वं तदक्षयम् ॥ ९७ ॥
तत्रादित: सुरेशानि सारं लोहद्वयं स्मृतम्[6] ।
साधारणे तीक्ष्णशुल्वे[7] वङ्गनागौ[8] तु पूतिकौ[9] ॥ ९८ ॥

रसजं[10] क्षेत्रजं चैव लोहसंकरजं[11] तथा ।
त्रिविधं[12] जायते हेम चतुर्थं नोपलभ्यते ॥ ९९ ॥
रक्ताभं पीतवर्णं च द्विविधं[13] देवि काञ्चनम् ।
दाहे[14] रक्तं सितं छेदे निकषे[15] कुङ्कुमप्रभम् ॥ १०० ॥
सगौरवं मृदु[16] स्निग्धं तार[17]शुल्वविवर्ज्जितम् ।

---

(1) B reads प्रद्रापयेत्. M reads प्रतापयेत्. (2) This is wanting in B and M. (3) M reads हृत, which is incorrect. (4) तीक्ष्णा वङ्गभुजंगमा:, a variant in K. तीक्ष्ण वर्णं तु जङ्गमा, an incorrect variant in M. [The term नाग=भुजङ्गम=शीष.] (5) तु is wanting in K. (6) K reads मतं. (7) B reads तिक्ष्णशुल्वे. K reads साधारणो, which is gram. inc. (8) M reads नागवङ्गौ. (9) B has पूनिकौ. K has यूनिकौ. M has पीतिकौ. We have adopted the above reading after collating all the texts. (10) M reads रजस्कं. (11) M has लोहसङ्करजौ, which is gram. inc. (12) M reads त्रिविधौ, which is not gram. correct. (13) M has विविधं. (14) M reads तापे. (15) K reads निकशे. (16) B has गुरु, which seems to be a tautology. (17) B reads शशि.

हेम षोड़शवर्णाढ्यं शस्यते देहलोहयोः ॥ १०१ ॥
मृत्तिका[1] मातुलुङ्गाम्लैः[2] पञ्चवासरभाविता[3] ।
सभस्मलवणा[4] हेम शोधयेत् पुटपाकतः ॥ १०२ ॥
शुक्लञ्च तारकृष्णञ्च[5] द्विविधं रजतं प्रिये ।
गुरु स्निग्धं मृदु श्वेतं तारमुत्तममिष्यते ॥ १०३ ॥
नागेन चारराजेन द्रावितं शुद्धिमिच्छति ।
तारं त्रिवारं निक्षिप्तं पिशाची[6]तैलमध्यतः ॥ १०४ ॥
ताम्रं च द्विविधं प्रोक्तं रक्तं[7] कृष्णं सुरेश्वरि[8] ।
घनघातसहं स्निग्धं[9] रक्तपत्रं[10] मृदूत्तमम्[11] ॥ १०५ ॥
सुह्यर्कचीरलवण[12]-चाराम्लपरिलेपितम्[13] ।
ताम्रपत्रं च निर्गुण्डी-रसमध्ये तु ढालयेत्[14] ॥ १०६ ॥

---

(1) M reads मृत्तिकां, which is gram inc. (2) B has मातुलुङ्गाम्लो, which is incorrect. (3) K reads पञ्चवारं सुभावितं. M reads पञ्चवासरभाविताम्, which is gram. incorrect. (4) M has सभस्मलवणे, which is not correct. (5) B reads तापकृष्णञ्च. K reads तायकृष्णञ्च. (6) B has पिश्चोचं, which is unintelligible. (7) रक्तं is wanting in B, thus destroying the metre. (8) K reads सुरेश्वरि, which is a palpable error of the scribe. (9) घनघातसहस्निग्ध, a variant in K, घनवातसहस्निग्धं, a variant in M, wherein वात seems to be inc. (10) K reads रक्तपीतं. M reads रक्तपात्रं. (11) Both B and K read मृदुत्तमम्, which is inc. (12) B reads चारलवण. The letter र्क after सुह्य is wanting in M. (13) K reads परिपेषितं. M reads चिरलेपितम्. (14) निर्गुण्डीरसमध्येन डालयेत्, a variant in M.

रोहणं वाजरं चैव[1] तृतीयं च पडालकम्[2] ।
इति तीक्ष्णं त्रिधा तच्च कान्त[3]लोहमिति स्मृतम् ॥ १०७ ॥
नीलं कृष्णमिति स्निग्धं[4] सूक्ष्मधारमयः[5] शुभम् ।
गुडूची[6] हंसपादी च नक्तमालः[7] फलत्रयम्[8] ॥ १०८ ॥
गोपालको[9] गोरसानं[10] तुम्बुरुर्लौहनिघ्नकः[11] ।
एषां रसे ढालयेत्तत्[12] गिरिदोषनिवृत्तये ॥ १०९ ॥
त्रपु च[13] द्विविधं ज्ञेयं श्वेत[14]कृष्णविभेदतः ।
श्वेतं[15] लघु मृदु स्निग्ध-मुत्तमं वङ्गमुच्यते ॥ ११० ॥
नागस्त्वेकविधो[16] देवि शीघ्रद्रावी[17] मृदुर्गुरुः ॥ १११ ॥
महिषस्यास्थिचूर्णेन वापात्तन्मूत्रसेचनात् ।
वङ्गं शुद्धं भवेत्तद्वत्[18] नागो नागास्थिमूत्रतः[19] ॥ ११२ ॥

---

(1) M reads राजकं चैव. (2) M reads पटोलकम्. (3) B reads कान्ती. M reads काश्री. (4) नीलं कृष्णं त्वतिस्निग्धं, a variant in K. (5) K has सूक्ष्मधारमयं. M has सूक्ष्मधारमधश्. The terms मयं and मधश् are not correct. (6) B reads गुड्ची. M reads गलूची. (7) B and K read नक्तमाला. M reads नक्तमाल. (8) M has पलत्रयम्, which seems to be the error of the scribe. (9) B reads गोपालिकी. K reads सेफालिका. (10) All the texts read गोरसानां, wherein the sixth case-ending cannot be accounted for. (11) K has तुंबुरुलोहविघ्नकः. M has तुम्बुलीहच्च निष्ककम्. (12) M reads डालयेत्तत्. (13) K reads त्रपुश्च. (14) B and M read सित. (15) K reads सितं. (16) M has नागमेकविधं. (17) K reads शीघ्रद्रावि. (18) K reads भवेद्ध्रौ. M reads भवेच्चेतत्. (19) The term नागो is wanting in B. K has वापास्थिमूत्रतः, which is incomplete as well as incorrect.

गौरीफलानि[1] क्षुरको रजनी तुम्बुरूणि च[2] ।
कुबेराक्षस्य वीजानि मल्लिकायाश्च सुन्दरि ॥ ११३ ॥
पलाशशुष्कापामार्ग[3]-क्षारस्नुक्क्षीरयोगतः[4] ।
सप्तधा परिवापेन शोधयन्ति भुजङ्गमम्[5] ॥ ११४ ॥
स्नुही[6]क्षीरसमायोगात् वङ्गं[7] चावापयेत्ततः ॥ ११५ ॥
स्नुह्यर्कक्षीरहलिनी-कञ्चुकी[8]कन्दचित्रकैः ।
गुञ्जाकरञ्जधुत्तूर[9]-हयगन्धाङ्घ्रितालकैः[10] ॥ ११६ ॥
नक्तमालेङ्गुदीशक्र[11]-वारुणीमूलसंयुतैः ।
पिष्टैर्माहिषतक्रे तु[12] सप्तरात्रोषितैस्ततः ।
निषिक्तः सर्व्वलोहानां मलं हन्ति न संशयः[13] ॥ ११७ ॥
देवदालीफलरजः-स्वरसैर्भावितं मुहुः ।

---

(1) B has गौरीफलानीत्. M has गौरीखलनी. Both the readings seem to be incorrect. (2) रजनि तु करुणि च, an incorrect variant in K. M reads रञ्जनी instead of रजनी. (3) पलाश शुष्कयामार्ग, a variant in B, which seems to be erroneous. (4) क्षारस्नुह्यर्कक्षीर-योगतः, a variant in K, which destroys the metre. (5) M reads भुजङ्गमाः, which is gram. incorrect. (6) B reads ऊंकू. M reads धुह्नी. Both are unintelligible. (7) M reads पाकं. (8) K has कंचुकी, which appears to be the error of the scribe. (9) B reads धत्तूर. K reads धर्त्तूर. M reads धुधूर. (10) B has तालजैः. K has घ्रि instead of ङ्घ्रि, which is not correct. (11) K reads नक्तमालां-गुदीशक्र, which is gram. inc. M reads वज्र instead of शक्र. (12) M reads तक्रैस्तु. (13) M reads निषिक्ततः, which is a tautology.

द्रावयेत् कनकं वापात्[1] भूयो न[2] कठिनं भवेत् ॥ ११८ ॥
अखिलानि च सत्त्वानि[3] द्रावयेत्तत्प्रभावतः[4] ॥ ११९ ॥
समांशं सुरगोपस्य सुरदाल्याश्च[5] यद्रजः ।
आवापात् कुरुते देवि कनकं जलसन्निभम् ॥ १२० ॥
मण्डूकास्थिवसाटङ्क-हयलालेन्द्रगोपकैः[6] ।
प्रतिवापेन कनकं सुचिरं तिष्ठति द्रुतम्[7] ॥ १२१ ॥
त्रिःसप्तकृत्वो[8] गोमूत्रे ज्वालिनीभस्म[9]गालितम् ।
शोषयेत्तस्य वापेन तीक्ष्णं मूषागतं[10] द्रवेत् ॥ १२२ ॥
त्रिःसप्तकृत्वो[11] निचुल-भस्मना भावितेन तु[12] ।
केतक्यास्तु रसैस्तीक्ष्णम्[13] आवापाद्द्रवतां व्रजेत् ॥ १२३ ॥
पक्वधात्रीफलरसैः शङ्खे[14] सप्ताहभावितम् ।

---

(1) K reads वापि. (2) M reads भूयेन, which is gram. inc. (3) अखिलि च सत्वानि, an incomplete variant in B. K reads सत्वानि. अखिलाचि च सत्वानि, an incorrect variant in M. (4) B has an incomplete charana—द्रावयेत् प्रयत्नतः. K has द्रावयेत्तत्प्रयत्नतः. (5) M reads सुदाराय यद्रजः, which is incorrect. (6) K reads गोपजैः. M reads हल्लालिजगोपकैः, which is unintelligible. (7) B has an incomplete charana—सुचिरं···ति द्रुतं. (8) B reads त्रिःसप्तकृत्वा. K and M read त्रिसप्तकृत्वो. Both are gram. inc. (9) K reads ज्वालिनि. M reads ज्वालिनीपत्र. (10) K has मूखागतं, which is inc. [Vide p. 39, note (11)]. (11) All the MSS. read त्रिसप्तकृत्वो, which is grammatically erroneous. (12) K reads विम्हतेन तु. (13) B reads रसैस्तीक्ष्णम्. K reads केतक्या सुरसैस्तीक्ष्णा. Both are gram. inc. (14) B reads संखे.

पुन: कञ्चुकितोयेन[1] भावितं सप्त[2]वासरम् ॥ १२४ ॥
शरावयुगलान्त:स्थं[3] सुदृढ़ं परिध्मापितम्[4] ।
तत्तीक्ष्णचूर्णं[5] देवेशि रसरूपं प्रजायते ॥ १२५ ॥
तालकं गन्धपाषाण[6]-शिलामाक्षिकगैरिकम् ।
काशीसं खण्डसौराष्ट्री[7]-तुत्थमभ्रकमेव च ॥ १२६ ॥
खमृगालतरच्चूर्णां[8] कुक्कुटस्य मलं[9] तथा ।
मयूरगृध्रमार्ज्जार-विष्ठा च समभागकम्[10] ॥ १२७ ॥
भावयेत्त्रि:[11] स्नुहीचोरै[12]र्देवदाली[13]रसेन च ।
तत्कल्क[14]मष्टमांशेन लोहपत्राणि[15] लेपयेत् ॥ १२८ ॥
धमे द्रुतं भवेल्लोहमेतैरेव निषेचयेत्[16] ।

---

(1) K reads कञ्चुकी. M reads पान in place of पुन:, which is inc. (2) M reads भावितसप्त. (3) शरावयुगलस्थं च, a variant in B. शरावयुगलिस्थ च, a variant in K. Both the readings seem to be incorrect. (4) B reads erroneously—परिध्मावापितं. M reads परिध्मापित:. (5) K has तीक्ष्णचूर्णानि, which is not gram. correct. (6) B and K read गन्धपाषाणं, which is not correct, as the term is in masculine gender. M reads तालगन्धकपाषाण, which is not accurate. (7) M has काशीसं खण्डसौराष्ट्र. (8) M reads खमृगालखरोष्ट्राणां. (9) B and K have मलन्तथा. (10) B and K read समभागिकम्. (11) B reads भावये त्रि. K reads भावये त्रि:. M reads भावयेत्त्. The first two readings are incorrect, and the last is incomplete. (12) M reads स्नुहिचोरै:. (13) M reads देवताली. (14) M has तत्कल्प, which seems to be inc. (15) B and M read लोहपात्राणि. (16) एतैरेतन्निर्शचये तु, an incorrect variant in K.

अङ्कोलस्य तु मूलानि काञ्जिकेन प्रपेषयेत् ।[1]
लोहलेपं ततो दद्याद्-अग्निस्थं धारयेत्[2] प्रिये ॥ १२९ ॥
पुनर्लेपं ततो दद्यात् परिच्छिन्ना[3]रसेन तु ।
मत्स्यपित्तेन[4] देवेशि वह्निस्थं धारयेत् प्रिये ॥ १३० ॥
पुनर्लेपं प्रकुर्व्वीत लाङ्गलीकन्दसम्भवम् ।
त्रिभिर्लेपैर्द्रुतं[5] लोहं निर्म्मलं स्वच्छवारिवत्[6] ॥ १३१ ॥
चूर्णितं देवि कूर्म्मास्थि मेषशृङ्गं शिलाजतु[7] ।
कुरुते प्रतिवापेन वलवज्जलवत् स्थिरम्[8] ॥ १३२ ॥
अर्कापामार्गमुसली[9] निचुलं चित्रकं तथा ।
कदली पीतकी दाली[10] क्षारमेषां तु साधयेत् ॥ १३३ ॥
गालयेन्माहिषे मूत्रे षड्वारान्[11] सुरवन्दिते ।
आवापाद्द्रावयेदेतदभ्रसत्त्वादिजं[12] रजः ॥ १३४ ॥
दन्तीदन्ती[13] विशेषेण द्रावयेत् सलिलं यथा ॥ १३५ ॥

(1) This hemistich is wanting in K. (2) M reads धामयेत्. (3) B reads परिच्छिन्न. (4) B and M have मत्स्यपित्तस्त. (5) M reads त्रिभिर्लेपे द्रुतं, which is not gram. correct. (6) B reads स्वःच्छवारिवत्, which is an error of the scribe. (7) K has शिलाजितुः, which seems to be erroneous. (8) B reads कांचीरं जलवत् स्थिरम्. M reads कांस्यपात्रे व्यवस्थितम्. (9) M reads कदली, which is incorrect, as the very same word is mentioned afterwards. (10) M reads कदल्यपीतकी माली. (11) M reads चत्वारः, which seems to be gram. inc. (12) K has अभ्रसत्वादिकं. M has अभ्रसत्वा.[illegible]. (13) K has दंती दंत (without विसर्ग). M has दन्तादन्ती.

रसेनोत्तरवारुण्याः[1] प्लुतं वैक्रान्तजं रजः[2] ।
प्रतिवापेन[3] लोहानि द्रावयेत् सलिलोपमम् ॥ १३६ ॥

॥ इति लोहद्रावविधिः ॥

रत्नानां द्रावणं वक्ष्ये गगनस्य द्रुतिं तथा ॥ १३७ ॥
त्रिफला च[4] त्रिकटुकं त्रिक्षारं कटुपञ्चकम्[5] ।
बला चातिबला चैव तृतीया च महाबला[6] ॥ १३८ ॥
अश्वगन्धा चैवो नारी[7] भूलता मातृवाहकः ।
गोपेन्द्रमण्डली चैव षड्बिन्दुर्द्विमुखी[8] तथा ॥ १३९ ॥
वीरा सूरणकन्दश्च[9] कञ्चुकी च पुनर्नवा[10] ।
स्नुह्यर्कोन्मत्तहलिनी पाठा चोत्तरवारुणी ॥ १४० ॥
अयस्कान्तो गोक्षुरश्च[11] मृदुदूर्वाम्लवेतसम्[12] ।
शिलाजतु च[13] सौवीरं विषगन्धकटङ्कणम्[14] ॥ १४१ ॥

---

(1) रसेनोत्तमवारुण्याः, a variant in M. (2) B reads रजं, which is evidently an error of the scribe. (3) M reads ऋचिवापेन, which is unintelligible. (4) K and M read तु. (5) M has पुटपञ्चकम्. (6) B reads महावचा. (7) B reads च दीनारी. (8) K reads षड्बिन्दूर्द्धमुखी. (9) M reads कन्दश्च. (10) B has कंचुकी सपुनर्नवा. (11) B has an incomplete charaṇa—अयस्कांजक्षुरश्च. (12) B reads मृगदूर्वाम्लवेतसम्. K reads मृदूद्रवाम्लवेतसम्. M reads मृगधूर्वाम्लवेतसम्. We have adopted the above reading after collating all the texts. [मृदुदूर्वा perhaps = नीलदूर्वा, as मृदूत्पल = नीलोत्पल.] (13) B has शिलाधातु च. K has शिलधातु च. M has शिलाजतुश्च. All the readings are gram. inc. (14) विषं गन्धकटङ्कणं, a variant in B. विषगन्धकटङ्कणैः, a variant in K.

पृथग्दशपलं[1] सर्व्वं सूक्ष्मचूर्णं तु कारयेत् ।
कुम्भद्वयं कुलत्थानां काष्ठेन तिनिशस्य च[2] ॥ १४२ ॥
क्वाथयेन्मृदुतापेन यावत् कुम्भावशेषितम् ।
तेन क्वाथेन तच्चूर्णं भावयेदेकविंशतिम्[3] ॥ १४३ ॥
रत्नानि तेन लिप्तानि तत्क्वाथस्थं धमेत्[4] पुनः ।
अहोरात्रेण तान्याशु द्रवन्ति सलिलं यथा ॥ १४४ ॥

॥ इति रत्नद्रावविधिः ॥[5]

अभ्रकादीनि लोहानि द्रवन्ति ह्यविचारतः ।
निर्म्मलानि च[6] जायन्ते हरबीजोपमानि च[7] ॥ १४५ ॥
मिलन्ति च रसेनाशु वह्निस्थान्यक्षयाणि च[8] ।
तैर्द्रुतैः स्पर्शमात्रेण[9] क्षणाद्बध्येत सूतकः[10] ॥ १४६ ॥
लोहानां मारणं[11] वक्ष्ये समाहितमनाः[12] शृणु ।

---

(1) B reads दशफलं, which is incorrect. (2) B has तिमिरस्य च. K has तिमरस्य च. M has काष्टेन तिमिशस्य च. We have adopted the above reading after collating all the texts. (3) B and M read एकविंशति. K reads एकविंशतिः. All the readings are inc. (4) तत्-क्वाथे तद्धमेत्, a reading in M, which has no sense. (5) This portion is not found in B and M. (6) B and M read निर्लेपानि च. (7) K has हरबीजोपयोनि च, which has no clear sense. (8) K reads वह्निस्थान्यचिराणि च, which seems to be inc. (9) तैर्द्रुतैः सर्वप-मात्रेण, an incorrect variant in K. (10) B reads क्षणाद्बध्येत. K reads क्षणाद्वेध्येत. M reads क्षणाद्बध्येत सूतकम्. (11) B has मारणे, which is gram. inc. (12) K has समाहितमना (without विसर्ग), which is gram. inc.

स्नुही[1]क्षीरेण सिन्दूरं[2] कनकं रजतं पुनः[3] ॥ १४७ ॥
तेनैव[4] माक्षिकं ताम्रमजाक्षीरेण गन्धकः[5] ।
स्तन्येन हिङ्गुलं[6] तीक्ष्णं वङ्गतालपलाशकम् ॥ १४८ ॥
नागं शिलार्कक्षीरेण स्वच्छपत्रीकृतं[7] प्रिये ।
मारयेत् पुटपाकेन[8] निरुत्थं[9] भस्म जायते ॥ १४९ ॥
न सोऽस्ति[10] लोहमातङ्गो यं न गन्धककेसरी ।
निहन्याद्गन्धमात्रेण[11] यद्वा माक्षिककेसरी ॥ १५० ॥
रसीभवन्ति[12] लोहानि मृतानि सुरवन्दिते ।
हरन्ति रोगान् सकलान्[13] रसयुक्तानि[14] किं पुनः[15] ।
शीलनान्नाशयन्त्येव[16] वलीपलितरुग्जराः[17] ॥ १५१ ॥

---

(1) B and M read स्नुहि. K reads स्नुही, which seems to be inc. (2) K has सिन्धूरं, which is erroneous. M has सप्राइं. (3) K reads तु वा. (4) B has मनैव, which is evidently an error. (5) K and M read गन्धकम्. (6) M has an incorrect reading—हिङ्गुद. (7) B reads स्वच्छ पत्रीकृतं. M reads स्वच्छपत्रन्तु तं. (8) B and M read पुटयोगेन. (9) B has निरुच्छ. M has निरुद्धं. Both of these readings appear to be inc. (10) B and M read रसास्ति, whereof the sense is not clear. (11) निहन्यात्कंधमात्रेण, a variant in B, which seems to be inc. (12) B has रसभवन्ति. K has रसीभवंती. M has रसं भवन्ति. We have adopted the above reading after collating all the texts. (13) M reads सकलान् रोगान्. (14) B reads समयुक्तानि. (15) K reads वै पुनः. (16) B has शीलनान्नांशयत्येव. M reads शिलानां नाशयन्त्येव. None of these texts is correct. (17) K reads रुगज्वरान्. M reads रुक्परान्.

वज्र[1]माक्षिकतीक्ष्णाभ्रं शस्यते देहकर्म्मणि[2] ।
नागं वङ्गं सुवीरञ्च[3] द्रव्यकर्म्मणि योजयेत् ॥ १५२ ॥
परिबालन्तु[4] यल्लोहं तथाच मलयोद्भवम् ।
एतल्लोहद्वयं देवि विशेषाद्देहरक्षणम् ॥ १५३ ॥
रागं[5] महारसादीनां ज्ञात्वा वीजानि साधयेत् ।
तन्ममाचक्ष्व देवेशि[6] किमन्यच्छ्रोतुमर्हसि ॥ १५४ ॥

इति श्रीपार्व्वतीपरमेश्वरसंवादे[7]
रसार्णवे रससंहितायां
महारसोपरसलोहलक्षणसंस्कार[8]-
रत्नद्रावणमारणनिर्णयो नाम[9]
सप्तमः पटलः ॥७॥

---

(1) B reads वज्रं. (2) M reads मेहकर्म्मणि, which appears to be incorrect. (3) वङ्गनागस्सुवीरञ्च, a variant in M. (4) B has पड़िबालन्तु. K has बिंदीबालं. (5) K reads नागं, which is incorrect; because the next Paṭala opens with the description of रागसंख्या. (6) तन्मयाचक्षि देवेशि, a variant in B. This charaṇa is wanting in M. (7) This portion is wanting in B and M. (8) K reads रत्न between महारसोपरस and लोह. The word महा is not found in M; it reads रसोपरससंस्कारलोहलक्षणमारणनिर्णयो नाम. (9) K reads only निर्णयो नाम, omitting रत्नद्रावणमारण.

## अष्टमः पटलः ।

श्रीदेव्युवाच ।[1]

महारसानां लोहानां रत्नानाञ्च सुरेश्वर[2] ।
रागसंख्यां[3] तथा बीजसाधनञ्च[4] वद प्रभो ॥ १ ॥

श्रीभैरव उवाच ।

महारसेषु द्विगुण[5]स्ताम्ररागः[6] सुरेश्वरि ।
गिरिदोषि क्षयं नीतेऽ[7] सूतकं रञ्जयन्ति ते[8] ॥ २ ॥
सस्यकश्चपलश्चैव राजावर्त्तश्च माक्षिकः[9] ।
विमलो[10] गैरिकश्चैषा[11]मेकैकं द्विगुणं भवेत् ॥ ३ ॥
भ्रामकादिषु कान्तेष्वप्येकद्वित्रिगुणो[12] हि सः ।
एकैकमभ्रके चैव[13] श्वेतपीतारुणः[14] सिते ॥ ४ ॥

---

(1) K reads देव्युवाच. This is wanting in M. (2) M has रत्नानां च सुरेश्वरि, which is erroneous. (3) B has not this word. K has रागसंख्या. M has रागसङ्ख्या. (4) M reads here सारणञ्च, but it reads साधनञ्च in its colophon. (5) B reads द्विगुणा. (6) M reads ताम्रे रागः. (7) गिरिदोषक्षयकरं, a variant in M. (8) स्याद्दीर्ज्जं रञ्जयन्ति ये, a variant in M. (9) M reads राजावर्त्तिश्च माक्षिकम्, which is incorrect. (10) K and M read विमला. (11) K has गैरिकश्चैषा. M has गैरिकश्चैव. (12) K reads कान्तेषु अप्येवं द्विगुणो. (13) एकैकमभ्रकश्चैव, a variant in K. (14) श्वेतपीतारुणो, an incorrect reading in M.

अष्टादशसहस्राणि स्थिता रागाश्च[1] गन्धके ।
अयुतं दरदे देवि[2] शिलायां द्विसहस्रकम्[3] ॥ ५ ॥
रसके[4] सप्तसाहस्रं कङ्कुष्ठे तु[5] चतुष्टयम् ।
रसगर्भे प्रकाशन्ते जारणं तु[6] भवेद्यदि ॥ ६ ॥
द्वादशाग्रं शतं[7] पञ्च नागे रागा[8] व्यवस्थिताः[9] ।
शतहीनं सहस्रं तु वङ्गे रागा[10] व्यवस्थिताः ॥ ७ ॥
रागाणां शतपञ्चाशत् शुल्वमध्ये व्यवस्थिताः ।
रक्तपीताश्च शुक्लाश्च[11] हेम्नि रागाश्च षोड़श ॥ ८ ॥
रागाः षष्टि[12]सहस्राणि शक्रनीले व्यवस्थिताः ।
महानीले च[13] देवेशि ते रागा द्विगुणाः[14] स्थिताः ॥ ९ ॥
माणिक्ये तु सुरेशानि रागा[15] लक्षत्रयोदश ।
गजवारिसमुत्पन्नं रत्नं[16] मुक्ताफलं विदुः ॥ १० ॥

---

(1) M reads नागाश्च, which seems to be incorrect. (2) अयुतं दरदे वेशि, a reading in M, which appears to be inc. (3) M reads शिलायाञ्च द्विपञ्चकम्. (4) K reads रक्तके. (5) M reads कुष्ठे चैव, which seems to be inc. (6) M has जारणान्तु, which is gram. inc. (7) द्वादशाभ्रशतं, a variant in M, which is inc. (8) M reads नागौ राग, which is gram. inc. (9) K reads व्यस्थिताः, which is an error of the scribe. (10) M reads वङ्गे राग, which is not correct. (11) K has शुल्वाश्च. M reads रक्तपीता च शक्ला च. (12) K reads षष्टी. M reads erroneously रागाष्पष्टि. (13) M has महानीलञ्च, which is gram. inc. (14) M reads त्रिगुणे, which is not grammatically correct. (15) K reads राग, which is not gram. correct. (16) M reads रक्त, which is inc.

गजे[1] त्रीणि सहस्राणि षट्सहस्राणि वारिजे[2] ।
नवलक्षं च रागाणां पद्मरागे व्यवस्थिताः ॥ ११ ॥
भेदयेत् सर्व्वलोहानि यच्च[3] केन न भिद्यते[4] ।
तद्वज्रं तस्य देवेशि रागं लक्षद्वयं[5] विदुः ॥ १२ ॥
षोडशैव सहस्राणि पुष्परागे व्यवस्थिताः ।
पादोनलक्षरागास्तु[6] प्रोक्ता मरकते[7] प्रिये ॥ १३ ॥
रागसंख्यां न जानाति[8] संक्रान्तस्य[9] रसस्य तु ।
अधिकं मारयेल्लोहं हीनं चैव प्रकाशयेत्[10] ॥ १४ ॥
मानवेन्द्रः[11] प्रकुर्व्वीत यो हि जानाति पार्व्वति ।
शतकोटिप्रमाणेन[12] रागसंख्यां प्रकल्पयेत् ।
स्पर्शनं चैवमालोक्य[13] शतकोटिस्तु विध्यति[14] ॥ १५ ॥
अतः परं प्रवक्ष्यामि बीजानां साधनं प्रिये ।
हेमतारवशाद्बीजं[15] द्विविधं तावदीश्वरि ॥ १६ ॥

---

(1) गत्ते is the reading in M, which is incorrect. [गजे = गजजे.] (2) M reads वारिते, which is not correct. (3) K and M read येन. (4) M reads येन केनापि विध्यते, which conveys the reverse sense. (5) M has लक्षत्रयं. (6) K has पादोन. M has पादेन लक्षं रागास्तु, which has no clear sense. (7) प्रोक्तं मरतके, an incorrect reading in M. (8) K reads जानंति, which is not accurate. (9) M reads साक्रान्तस्य, which has no clear sense. (10) M has प्रकारये त्. (11) मारयेच्च: is the reading in M. (12) शतकोटीप्रमाणेन, a variant in K. (13) चैवमालोक, a reading in M. (14) K reads विध्यति. M reads विद्यते. We have adopted the above text, after collating the MSS. (15) K reads वशावीजं, which is a palpable error.

पीतारुणं[1] हेमवीजं[2] तारवीजं सितैर्भवेत् ।
कल्पितं रञ्जितं पक्वमिति भूयस्त्रिधा भवेत् ॥ १७ ॥
कल्पितं द्विविधं तच्च[3] शुद्धमिश्रविभेदतः ॥ १८ ॥
रसोपरसलोहानां[4] वीजानां कल्पनं पृथक्[5] ।
शुद्धं मिश्रं तु[6] संयोगात्[7] यथालाभं[8] सुरेश्वरि ॥ १९ ॥
सत्त्वमावर्त्तितं व्योम्नि शोधितं काचटङ्कणैः ।
चिञ्चाफलाम्लनिर्गुण्डी[9]-पञ्चकल्कनिषेचनैः[10] ।
पक्वं निविड़ितं देवि[11] रसपिष्टिसमं भवेत् ॥ २० ॥
क्षेहक्षाराम्लवर्गैश्च[12] शिलायाश्च पुटत्रयात्[13] ।
मृताहि धूपनायन्त्रे[14] धूपगन्धानुलेपनात् ।
वङ्गस्यापि[15] विधानेन तालकस्य हतस्य[16] वा ॥ २१ ॥
ताप्यहिङ्गुलयोर्वापि हतं च[17] रसकस्य वा ।

---

(1) M has पीतारुणो. (2) K has हेमवीजे, which is gram. inc. (3) K reads तत्र. (4) रसोपरससलानि, a variant in K. (5) वीजानाञ्च पृथक्स्थिते, a variant in M. (6) M has शुद्धमिश्रञ्च. [रञ्जितं is described in the 41st śloka; and पक्व in the 50th.] (7) K reads योगाय. (8) पालभंग is the absurd reading in K. (9) K reads फलाम्लसिंहुण्ड. (10) K reads निश्चिचनैः. M reads पतिकल्क. Both are inc. (11) K has पक्वनिविड़ं सद्देवि. (12) M has स्नेहक्षाराम्लवर्णैः. (13) M reads शिलया च पुटत्रयात्. K reads पुटत्रयं. (14) धूपनायन्त्रे is wanting in K. (15) K reads वङ्गस्याभि, which seems to be inc. (16) K has हतेन. M has तालकेन. (17) M reads वातिनी, which is unintelligible.

रसगर्भे द्रवेत् क्षणां[1] पत्रं कनकतारयोः ॥ २२ ॥
सङ्कराख्यन्तु[2] दुर्मेल्यं प्रिये मृदुखराह्वयम्[3] ।
ततः संमर्दितं[4] देवि द्वन्द्वमेलापनं द्रुतम्[5] ।
भवेत् समरसं गर्भे[6] रसराजस्य च द्रवेत्[7] ॥ २३ ॥
अतः परं[8] प्रवक्ष्यामि द्वन्द्वमेलापनं शृणु ॥ २४ ॥
वर्षाभूकदलीकन्द काकमाचीपुनर्नवाः ।
स्वर्णं नरकपालं च[9] गुञ्जाटङ्कणसंयुतम्[10] ।
चोरतैलेन सुध्मातं हेमाभ्रं मिलति प्रिये ॥ २५ ॥[11]
अनेनैव विधानेन ताराभ्रमपि मेलयेत्[12] ॥ २६ ॥
वङ्गमावर्त्य[13] देवेशि पुनः सूतकयोजितम्[14] ।
कदलीकन्दतोयेन मर्दयेट्टङ्कणान्वितम् ।
अन्धमूषागतं[15] ध्मातं वङ्गाभ्रं[16] मिलति क्षणात् ॥ २७ ॥
चूर्णं नरकपालस्य स्त्रोस्तन्यं वनशिग्रुकम् ।

---

(1) K reads क्षणात्. M reads भवेत् क्षण. (2) K reads संगराख्यं तु. (3) K has an incomplete charaṇa—दुखराह्वयोः. M reads खराह्वयात्. (4) K reads सम्मिश्रितं. (5) K reads ततः. (6) सवेत् सरससंसर्गो, a variant in K, which is partially incorrect. M reads वरेत्, which is senseless. (7) K reads चेन्द्रवत्. (8) K reads अतएव. (9) M reads तु. (10) M has सम्मिलम्. (11) This hemistich is not found in K. (12) तालकाभ्रं विमेलयेत्, a variant in M. (13) K reads भंग, which is incorrect. M reads erroneously वङ्गमावल्य. (14) K has योगतः. (15) K reads अन्धमूखागतं. M reads अन्धमूत्रागतं. Both are inc. (16) M reads वङ्गाभ्रं.

शुक्लाटङ्कणसंयुक्तं वङ्गाभ्रं[1] मिलति क्षणात् ॥ २८ ॥
अभ्रकं चूर्णयित्वा तु काकमाचो[2]रसप्लुतम् ।
कपित्थतोयसंसृष्टं[3] रस[4]टङ्कणसंयुतम् ।
वङ्गपत्रान्तर[5]न्यस्तं ध्मातं वङ्गाभ्रकं[6] मिलेत् ॥ २९ ॥
आवर्त्त्य कटुतैलेन भस्मापामार्गजं क्षिपेत् ।
वङ्गाभ्रे[7] हरितालञ्च[8] नागाभ्रे तु[9] मनःशिलाः ॥ ३० ॥
हेमाभ्रं नागताप्येन[10] ताराभ्रं वङ्गतालकात् ।
गन्धकेन तु शुल्वाभ्रं[11] तीक्ष्णाभ्रं सिन्धु[12]हिङ्गुलात् ।
वङ्गाभ्रं[13] हरितालेन नागाभ्रं शिलया मिलेत् ॥ ३१ ॥
लाङ्गली च नरोकेश[14]-कार्पासास्थिकुलत्थकम् ।
भूलता चाश्मदलनी[15] स्त्रोस्तन्यं सुरगोपकः[16] ॥ ३२ ॥
एतत्प्रलिप्तमूषायां[17] सुध्मातास्तीव्रवह्निना[18] ।

---

(1) M reads वङ्गाभ्रं. (2) K reads काकमाचि. (3) M reads संस्पृष्टं. (4) M reads सूत. (5) K reads वङ्गपत्रांतले, [which is=वङ्गपत्रान्तरे.] M reads वङ्ग. (6) M reads वङ्गाभ्रक. (7) K reads वङ्गाभ्रं. M reads वङ्गाभ्रे. (8) K reads erroneously हरिमालञ्च. (9) K has नागाभ्रं तु. M has नाकाभ्रेण, which is inc. [नागाभ्रेण is correct.] (10) K reads नागतापेन. (11) M reads शुल्वौभ्रं, which is gram. inc. (12) K has शिंधु. (13) M has वङ्गाभ्रं. (14) M reads उरोकेश, which is inc. (15) K reads करयुग्मा च. (16) K and M read गोपकम्, which is incorrect, the term being used in the masculine gender. (17) एतत्प्रलिप्य मूखायां, a variant in K, which seems to be inc. (18) सुध्मातं तीव्रवह्निना, a variant in K, wherein the first term is gram. inc.

कान्ताभ्रशैलविमला मिलन्ति सकलान्[1] क्षणात् ॥ ३३ ॥
लताकुकुन्दरीमांसं[2] विषटङ्कणयोजितम् ।
मूषालेपेन[3] कुरुते सर्व्वद्वन्द्वेषु[4] मेलनम् ॥ ३४ ॥
अभ्रकं सुरसा शृङ्गं[5] मण्डूकस्य वसा विषम् ।
गुञ्जाटङ्कणयोगेन[6] सर्व्वसत्त्वेषु[7] मेलनम् ॥ ३५ ॥
टङ्कणोर्णाक्षिरिजतु-कर्णाख्यामलकर्कटैः[8] ।
मिलन्ति सर्व्वद्वन्द्वानि स्त्रीस्तन्यपरिपेषितैः ॥ ३६ ॥
धातकीगुग्गुलुगुड़[9]-सर्जयावकटङ्कणैः[10] ।
स्त्रीस्तन्यपेषितैः सर्व्वं[11] द्वन्द्वजं तु रसायने ॥ ३७ ॥
खसत्त्वं सूक्ष्मचूर्णं तु[12] पूर्व्वकल्केन संयुतम् ।
अन्धमूषागतं[13] ध्मातं सङ्करं मिलति क्षणात् ॥ ३८ ॥
वापितं[14] ताप्यरसक[15]-सस्यकैर्दरदेन च ।
खसत्त्वं स्याग्निबद्धं च[16] दृढं ध्मातं मिलेत्ततः ॥ ३९ ॥
रसोपरसलोहानि सर्व्वाण्येकत्र ध्मापयेत् ।

---

(1) K reads सकल. (2) M reads चुचुन्दरीमांस. (3) मूखालिपेन, an incorrect reading in K. (4) M reads सर्वं द्वन्द्वेषु. (5) आराम्भं. खुरशृङ्गञ्च, a variant in M. (6) M reads लेपेन. (7) M reads सर्वं सर्वेषु. (8) कर्णाचीमीमकर्कटी, a variant in K. (9) धातु-गुग्गुलुगुडं, a variant in K. (10) सर्जायवकटङ्कणैः, a variant in M. (11) M reads शस्त्रा. (12) सूक्ष्मचूर्णेन यत्किञ्चित्, a variant in K. (13) K reads अन्धमूखागतं, which is inc. (14) M reads पावितं, which is not technical. (15) K reads ताप्यरसकं. (16) खसत्व-चाग्निबन्धञ्च, a variant in M.

अन्योन्यं इन्द्वतां यान्ति[1] द्रवन्ति[2] सलिलं यथा ॥ ४० ॥
बीजानि कल्पितान्येवं[3] रञ्जितानि परं[4] शृणु ॥ ४१ ॥
घनं[5] माक्षिकचूर्णेन शुल्वचूर्णेन रञ्जितम् ।
इन्द्वितं ताप्यसत्त्वेन[6] रसराजस्य रञ्जनम् ॥ ४२ ॥
आरक्तवल्लीगोमूत्रैः[7] बहुधा परिभावितैः[8] ।
कुनटीगन्धपाषाणै[9]र्हेममाक्षिकहिङ्गुलैः[10] ॥ ४३ ॥
वापितं सेवितं रक्त[11]गणैः स्नेहैर्मृतं[12] ततः ।
रञ्जनं रसराजस्य तीक्ष्णताम्रौ[13] विशेषतः ॥ ४४ ॥
केवलं विमलं ताम्रं वापितं[14] दरदेन च[15] ।
कुरुते त्रिगुणं जीर्णं लाक्षारसनिभं रसम्[16] ॥ ४५ ॥
रसकं द्विगुणं[17] दत्त्वा ताम्रं सुध्मातमीश्वरि ।
कृष्णाभ्रकस्य चूर्णं च रक्तवर्गैर्मुहुः[18] पुटैः ॥ ४६ ॥

---

(1) अन्योन्यद्वन्द्वतामिति, a variant in M. (2) M reads द्रवतौ, which is gram. incorrect. (3) M has कल्पितान्येव. (4) M reads वरं, which is not correct. (5) M reads वन, which has no clear sense. (6) इन्द्वतं ताप्यसत्वेन, a reading in K, which seems to be erroneous. (7) आरक्तवल्लीभिर्मूत्रैः, a variant in K. आरक्तवर्गगलित, a variant in M. (8) गोमूत्रं बहुभावितैः, a variant in M. (9) M reads पाषाण. (10) M reads हिङ्गुलम्. (11) M reads रक्तं. (12) M reads गणस्नेहमृतं. (13) M reads तीक्ष्णताम्रं. (14) K reads वापीतं, which is inc. (15) M reads वा. (16) K reads रसः, which is grammatically inc. (17) द्विगुणं रसकं, a reading in K. (18) M reads रक्तवर्णं मुहुः.

ताप्येन वा मृतं हेम त्रिगुणेन निवापितम्[1] ।
भाण्डिकायां[2] तु रसकं ताप्य[3]सैन्धवसंयुतम् ॥ ४७ ॥
इन्द्रगोपनिभं यावत् सर्व्वं द्विगुणजारणात् ।
द्रुतं[4] हेमनिभं सूतं कुरुते नात्र संशयः ॥ ४८ ॥
अभ्रकं हेम ताम्रं च शिलया[5] माक्षिकेण च ।
गैरिकेण च मुख्येन रसकेन च रञ्जयेत् ॥ ४९ ॥
बीजानि रञ्जितान्येवं[6] पक्वबीजान्यतः[7] शृणु ॥ ५० ॥
महारसानुपरसान्[8] तीक्ष्णलोहानि च चयेत्[9] ।
समांशं सममाक्षीकं गन्धकावापयोगतः ॥ ५१ ॥
शतशो वापयेदेतत्[10] अक्षीणं सावशेषितम्[11] ।
समांशं रसराजस्य गते द्रवति निश्चितम्[12] ॥ ५२ ॥
तदेतद्द्विविष्टिकास्तम्भे जारणायां सुरेश्वरि ।
रञ्जने रसराजस्य सारणायां च शस्यते ॥ ५३ ॥
तदेवं[13] शतशो रक्तगणैः स्नेहनिषेचितम्[14] ।

---

(1) M reads विपाचितम्. (2) क्षुल्लिकायां, a reading in K. (3) K reads रसकताप्य. M reads रसकान्तनप्य, which is unintelligible. (4) M reads मृत. (5) M reads शिलायां. (6) बीजानां रञ्जनान्येवं, a variant in M. (7) M reads पक्वबीजस्ततः. (8) M has महारसान्नुपरसा. (9) K reads वचायते, which is gram. inc. M reads कार्णलोहानि, which is unintelligible. (10) शतशो वा भवेदेतत्, a variant in M. (11) K has an incomplete charaṇa—अक्षी सावशेषितं. (12) This charaṇa and the next three charaṇas are not found in K. (13) M reads तदेव. (14) K has निषेश्रित. M has रक्तगणस्नेहनिषेचितम्.

अधिकं[1] शस्यते तेषु सहस्रांशेन वेधकृत्[2] ॥ ५४ ॥
निर्व्यूढं नागवङ्गाभ्यां क्रियायां हेमतारयोः ।
खसत्त्वं रविणा योज्यं द्रुतं स्याद्रसायने ॥ ५५ ॥
सस्नेहक्षारपञ्चाम्लैः[3] रसैस्तैस्तालकादिभिः[4] ।
समद्वित्रिगुणान् ताम्रे[5] वाहयेद्वङ्गपन्नगान् ॥ ५६ ॥
रक्तस्नेहनिषिक्तं तद्रसाकृष्टिरिति[6] स्मृतम् ॥ ५७ ॥
माक्षिकं गन्धपाषाणं हरितालं मनःशिलाम्[7] ।
वैक्रान्तकं कान्तमुख्यं[8] सस्यकं विमलाञ्जनम् ।
रसकं वापितं शश्वत्[9] चूर्णितं हेम्नि वाहयेत् ॥ ५८ ॥
लोहपर्पटिकाताप्य[10]-कङ्कुष्ठविमलाभ्रकैः ।
मृतशुल्व[11]शिलासूत-मुद्यर्कक्षारहिङ्गुलैः ।
नागो निर्जीवतां[12] याति पुटयोगैः पुनः पुनः ॥ ५९ ॥
रसतालकशङ्खाभ्र[13]-चिञ्चाक्षारैस्तथा त्रपुः[14] ।
मृतं नागं मृतं वङ्गं शुल्वं तीक्ष्णञ्च वा मृतम् ।

---

(1) K reads अंधकं. (2) M reads वेधयेत्. (3) सस्नेहक्षारक-द्राम्लैः, a variant in K. (4) अरिभिस्तालकादिभिः, a variant in M. (5) समद्वित्रिगुणास्ताम्रे, a variant in M. (6) M reads तद्रवाभिरिति च, which seems to be gram. incorrect. (7) M reads erroneously मनशिला. (8) M has काकमुखं. (9) K reads वापि शतशः. (10) K reads लोहपर्पटिकां ताप्य. (11) M reads शिल्प. (12) K reads नाम्न्यं निर्जीवतां, which is inc. (13) रसतालकशंखाभ्रं, a variant in K. (14) K reads त्रपुं.

एकैकमुत्तमे हेम्नि[1] वाहयेत् सुरवन्दिते[2] ॥ ६० ॥
निरुत्थे[3] पन्नगे हेम्नि निर्व्यूढे[4] शतसद्गुणे[5] ।
गोरोचनानिभं धाम[6] भास्करे तारसन्निभम्[7] ॥ ६१ ॥
तीक्ष्णाभ्रकं रविसमं[8] माक्षिकं द्विगुणं तथा[9] ।
आवर्त्तितं चूर्णितं च मारितं[10] सप्तभिः पुटैः ॥ ६२ ॥
व्यूढे शतगुणे[11] हेम्नि तद्बीजं जारयेत् समम् ।
चन्द्रार्क[12]पत्रलेपेन शतभागेन वेधयेत् ॥ ६३ ॥
ऊर्द्ध्वाधो माक्षिकं दत्त्वा शुल्वं हेमसमं भवेत्[13] ।
एवं दशगुणं व्यूढं बीजं कारणसन्निभम्[14] ॥ ६४ ॥
रसकाभ्रं कान्तताम्रे[15] भागवृद्ध्या धमेत्ततः[16] ।
माक्षिकेण हतं तच्च बीजे[17] निर्वाहयेत् प्रिये ॥ ६५ ॥
द्वात्रिंशद्गुणितं[18] हेम्नि नागं ताप्यं हतं[19] वहेत् ।

---

(1) एकैकमुत्तमेहेम्नि, a variant in M. (2) M reads सुरसुन्दरि. (3) K reads निरुत्थ. (4) K reads निर्व्यूढे, which appears to be inc. (5) शतसद्गुणे is the reading in M, which is unintelligible. (6) K reads हेम. M reads गोरोचननिभं. (7) K has त्वारसन्निभं [तु + आरसन्निभ]. (8) तीक्ष्णाभ्रकरवी हेमं, a variant in K. M reads तीक्ष्णाभ्रके. (9) M reads यथा. (10) M reads मारिता, which is gram. inc. (11) M has व्यूढं शतगुणं. (12) M reads चर्पाक, which is inc (13) M reads भमेत्. (14) M reads किरणसन्निभम्. (15) रसकाभ्रकताम्रं, a variant in M. (16) M reads समेत् ततः. (17) K reads बिजे, which is an error of the scribe. (18) द्वात्रिंशतगुणं, a reading in K. (19) M reads गतं.

त्रिंशद्गुणशिलावाहं[1] नागवीजमुदाहृतम् ॥ ६६ ॥
ताप्यतालकवापेन[2] सत्त्वं पीताभ्रकस्य तु।
वीजे निर्वाहयेदेतत् घोषाकृष्टस्य[3] वेधकम् ॥ ६७ ॥
नागः करोति मृदुतां निर्व्यूढ़स्तां च रक्तताम्।
खादति[4] पीततां तीक्ष्णं कान्तस्थां कालिकां विना ॥६८॥[5]
हेमवोजमिति प्रोक्तं—तारवीजमतः शृणु ॥ ६८ ॥
तीक्ष्णाभ्रताप्यविमल[6]-रसकं समभागिकम्[7]।
वङ्गभागास्तु चत्वारः[8] सर्व्वं ध्मातं विचूर्णितम् ॥ ७० ॥
पुटेन निहतं कार्य्यं[9] व्यूढ़ं तारन्तु वेधयेत्।
द्वात्रिंशत्सद्गुणं[10] तारे वङ्गे[11] ताप्यं हृतं वहेत्।
त्रिंशद्गुणात्तालवापात्[12] वङ्गवीजमुदाहृतम् ॥ ७१ ॥
कुटिलं[13] विमलं तीक्ष्णं खसत्त्वं चापि वाहयेत्।
वङ्गाभ्रं ताप्यसत्त्वं वा[14] ताल[15]माक्षिकवापतः।

---

(1) K reads वाद्यां instead of वाहं, which seems to be incorrect. (2) M reads वाचेन or पाचेन. Both are gram. inc. (3) K has घोषाकृष्टस्य. (4) K reads खादते, which is gram. inc. (5) This śloka is wanting in M. (6) K reads विमला. (7) K reads समभागीकम्, which is not gram. correct. (8) M reads erroneously वङ्गवीजमिति प्रोक्तं भागास्तु चत्वारः. (9) M reads भाव्ये, which has no clear sense. (10) K reads सगुणं. (11) M reads वङ्गं. (12) त्रिंसद्गुणात्तलकावापात्, a variant in M, which has no meaning. (13) K reads कुटील, which is inc. (14) वङ्गाद्यताप्यकल्कं वा, a variant in M, which appears to be inc. (15) M reads त.ल.

शुक्लपुष्पगणैः सेकं स्नेहयुक्तैस्तु कारयेत् ॥ ७२ ॥
उक्तानि तारबीजानि—बीजानां रञ्जनं शृणु ॥ ७३ ॥
तीक्ष्णमाक्षिकशुल्वञ्च[1] नागञ्चपलमारितम्[2] ।
सिन्दूरसन्निभं यावत्[3] तेन बीजानि रञ्जयेत् ॥ ७४ ॥
निधाय खर्परे नागं ब्रह्मबीजदलैः सह ।
दग्धमग्निमधो[4] दत्त्वा वह्निवर्णं यदा[5] भवेत् ॥ ७५ ॥
वासकेन विभीतेन[6] काक[7]किंशुकशिग्रुभिः ।
कोरण्डकस्य[8] पुष्पेण वकुलस्यार्ज्जुनस्य[9] च ॥ ७६ ॥
अहिमारेण[10] नागिन्या[11] कुमार्य्या नागकन्यया ।
शिलया[12] च त्रिगुणया क्वथितेनाजवारिणा[13] ॥ ७७ ॥
भावितं खर्परस्थञ्च वापयित्वा[14] पुनः पुनः ।
सप्तभिर्दिवसैरेव मारितं सुरवन्दिते[15] ॥ ७८ ॥
पुटयेद्गन्धकेनादा[16]वाम्लैश्च तदनन्तरम् ।

---

(1) K has तीक्ष्णं माक्षीकशुल्वञ्च. (2) नागं धवलमारितं, a variant in K, which has no clear sense. (3) K reads सन्निभां याते. M reads सिन्धूर. (4) दग्धमग्निमधो, a variant in M. (5) M reads यथा. (6) वाशकेन समूलेन, a variant in M. (7) K reads शाक. (8) M reads कोरण्डस्य च. (9) M has वल्कलेनार्जुनस्य. (10) K reads अहिमारेण, which seems to be inc. (11) M reads नाभिन्या, which is incorrect. (12) K reads सिलया. (13) K reads क्वाथितेन. (14) M reads स्रावयित्वा. (15) M has सुरसुन्दरि. (16) पुरयेद्गन्धकेनाद्य, a variant in M.

कृवं दलानां[1] वीजानां रसराजस्य रञ्जने ।
उद्घाटे क्रामणे[2] योज्यं पिष्टीस्तम्भे[3] विशेषतः ॥ ७९ ॥
मञ्जिष्ठाकिंशुक[4]रसे खदिरं रक्तचन्दनम् ।
करवीरं देवदारुं[5] सरलं रजनीद्वयम्[6] ॥ ८० ॥
अन्यानि रक्तपुष्पाणि पिष्ट्वा लाक्षारसेन तु ।
तैलं विपाचयेद्देवि[7] तेन वीजानि रञ्जयेत्[8] ॥ ८१ ॥
द्विगुणे रक्तपुष्पाणां[9] रक्तपीतगणस्य च[10] ।
क्वाथे चतुर्गुणे चीरे[11] तैलमेकं सुरेश्वरि ॥ ८२ ॥
ज्योतिष्मतीकरञ्जाख्य[12]-कटुतुम्बीसमुद्भवम् ।
पाटलीपिप्पलीकाम-काकतुण्डी[13]रसान्वितम् ॥ ८३ ॥
भेकशूकरमेषाहि[14]-मत्स्यकूर्म्मजलौकसाम्[15] ।
वसया[16] चैकया युक्तं षोड़शांशैः सुपेषितैः[17] ॥ ८४ ॥
भूलतामलमाचीक द्वन्द्वमेलापनौषधैः ।

---

(1) M reads उद्देंदशानां, which is unintelligible. (2) M reads कामठे, which is incorrect. (3) M reads पिष्टस्तंभे. (4) K reads किंसुक. (5) M reads देवदारु. (6) सरसे रञ्जनीद्वयं, a variant in M. (7) M reads व्यापातयेत्तेन. (8) कुर्य्याद्वीजादिरञ्जनम्, a variant in M. (9) द्विगुणं रक्तपुष्पाणि, a variant in K, which is not gram. correct. (10) M reads तु. (11) K reads क्वाथं. M reads चतुर्गुणं चीरं. (12) M reads करञ्जाच. (13) M reads काकसुण्डी. (14) K reads मांहिष instead of मेषाहि. (15) मत्स्यं कर्म्म जलूकसाम्, an incorrect variant in M. (16) M reads वयसा, which is gram. inc. (17) M has षोड़शांशे सुपेषितम्.

पाचितं गालितं चैतत् सारणा[1]तैलमुच्यते ॥ ८५ ॥
रसतुल्यं यथा वीजं[2] गतं गर्भद्रुतिं[3] प्रिये ।
व्यापकत्वेन सर्व्वं[4] च समभागास्तथेष्यते ॥ ८६ ॥
पक्वं श्रेष्ठं समं गर्भे यद्द्रवेद्रञ्जयेच्च तम्[5] ॥ ८७ ॥
एवमुक्तानि वीजानि जारयेद्विड़[6]योगतः ।
तन्ममाचक्ष्व देवेशि[7] किमन्यच्छ्रोतुमिच्छसि ॥ ८८ ॥

इति श्रीपार्व्वतीपरमेश्वरसंवादे[8]
रसार्णवे रससंहितायां
वीजसाधनो[9] नाम
अष्टमः पटलः ॥८॥

---

(1) M reads सारणं. (2) K reads यदा जीर्णं. (3) M reads गर्भद्रुति, which is incorrect. (4) व्यापतकेण सर्वत्र, a variant in M, which is not intelligible. (5) यद्रवेद्रञ्जयेद्रसे, a variant in M, wherein the first term is inc. (6) K reads जारयेद्दीन, which is incorrect. (7) This charaṇa is not found in M. (8) This portion is not found in M. (9) K and M read वीजसाधनं ; but as it qualifies पटलः, which is in masculine gender, it ought to be also in the same gender. The neuter gender may be supported by the rule of विधेय-विशेषण. But in order to keep up the uniformity we have adopted the masculine gender.

## नवमः पटलः ।

श्रीदेव्युवाच ।[1]

वीजानां कल्पनं[2] प्रोक्तं विशेषेण च साधनम्[3] ।
जार्य्यन्ते[4] तानि यैः सूते[5] तान् विड़ान् वक्तुमर्हसि ॥ १ ॥

श्रीभैरव उवाच ।[6]

काशीसं[7] सैन्धवं काञ्ची[8] सौवीरं व्योषगन्धकम् ।
सौवर्च्चलं सर्जिका च[9] मालतीनीरसम्भवम्[10] ।
शिग्रुमूलरसैः[11] सिक्तो विड़ोऽयं सर्व्वजारणः ॥ २ ॥
निर्दग्धं शङ्खचूर्णन्तु रविक्षीरशतप्लुतम् ।
पुटितं[12] बहुशो देवि प्रशस्तो जारणाविड़ः[13] ॥ ३ ॥
शतशो वा प्लुतं चूर्णं गन्धकस्य गवां जलैः ॥ ४ ॥
निर्दग्धं शङ्खचूर्णं तु[14] शिग्रुमूलाम्बुभावितम् ।

---

(1) M reads श्रीदेवी. (2) K reads प्रथमं. (3) K has विशेषरससाधनं. (4) K reads जायन्ते. (5) M reads सूता, which is gram. incorrect. (6) M has श्रीभैरवः. (7) M reads कासीसं. (8) K reads माची. (9) K has व्यापका च, which creates a tautology. (10) K reads मालतीरससम्भवः. We find also मालतीतीरसम्भवम् in the medical lexicons. (11) K reads शिग्रुमुलरसैः, which is inc. (12) K reads erroneously पुटीतं. (13) K has प्रशस्ती जारणे विदुः, wherein the first term is gram. inc. (14) M reads शाकचूर्णं तु.

शतशो विषसिन्धूत्थ[1]-संयुतं[2] वड़वामुखम् ॥ ५ ॥
टङ्कणं शतशो देवि भावयेत् किंशुकद्रवैः ।
विड़ो वह्निमुखाख्योऽयं[3] लोहानां जारणे प्रिये ॥ ६ ॥
चूलिका गन्धपाषाणः[4] कान्तस्य च मुखं प्रिये ।
एकैकमेव[5] पर्य्याप्तं लोहचूर्णस्य जारणे[6] ॥ ७ ॥
गन्धतालकसिन्धूत्थं[7] चूली[8]टङ्कणभूखगम्[9] ।
चारैर्मूत्रैश्च विपचेदयं[10] ज्वालामुखो विड़ः[11] ॥ ८ ॥
एकविंशतिपर्य्यायं देवदालीदलद्रवैः[12] ।
भावितो निचुलचारः सर्व्वसत्त्वानि जारयेत् ॥ ९ ॥
वास्तुकैरण्डकदली[13]-देवदालीपुनर्नवम्[14] ।
वासा[15]पलाशनिचुलं तिलकाञ्चन[16]माचिकम् ॥ १० ॥

---

(1) K reads विश्वसौन्धूत्थं. M reads विषसिन्धूत्थं. (2) K reads सन्मुखं. M reads संयुतं. We have adopted the above reading, after collating the texts. (3) M has वह्निविड़ाख्योऽयं. (4) K reads पाषाणं, which is gram. incorrect. M reads भवपाषाण. (5) तेष्वेवमेकं is the reading in M, wherein the last term is inc. (6) K has an incomplete charaṇa—लोहचूर्णंजारणे. M has लोहचारणजारणे. (7) M reads सिन्धूत्थ. (8) K reads चुल्लि. (9) K has मूखगं or correctly मूषणं. (10) M reads विपचेदय, which is evidently an error. (11) K reads विड्ःः, which is inc. (12) देवदालिद्रवोद्वैः, a variant in K. (13 M reads वास्तुकैरण्डकदली, which is not gram correct. (14) K reads पुनर्नवा. M reads देवतालीपुनर्णवम्. (15) M reads वाशा. (16) M reads तिलकाञ्चन.

सर्व्वाङ्गं खण्डशश्छिन्नं[1] मातिशुष्कं[2] शिलातले[3] ।
दग्धकाण्डेस्तिलानां तु पञ्चाङ्गं मूलकस्य च ॥ ११ ॥
प्लावयेन्मूत्रवर्गेण जलं तस्मात् परिस्नुतम्[4] ।
लोहपात्रे पचेद्यन्त्रे हंसपाकेऽग्निमानवित्[5] ॥ १२ ॥
वाष्पाणां[6] बुद्बुदानाञ्च बहूनामुद्गमो यदा ।
तदा काशीससौराष्ट्री-क्षारत्रयकटुत्रयम् ॥ १३ ॥
गन्धकञ्च[7] सितं हिङ्गु-लवणानि च षट् तथा ।
एषां चूर्णं क्षिपेद्दिष[8] लोहसम्पुटमध्यग:[9] ।
सप्ताहं भूगत: पश्चाद्धान्यस्थ: प्रवरो विड: ॥ १४ ॥
जम्बीराम्लेन पचनं[10] शिग्रुमूलद्रवेण च ।
चूलिकागन्धकासिक्तौ[11] द्वौ विडौ शतश: क्रमात् ॥ १५ ॥
कोषातकी[12]दलरसै: क्षारैर्वा निचुलोद्भवै:[13] ।

---

(1) खण्डशश्छिन्नां is the incorrect variant in M. (2) M has मातिशुष्कां, which seems to be inc. (3) K reads शिलातलं, which is gram. inc. (4) K reads परिस्नुतं, which destroys the metre. M has मातिस्तस्मात् परिप्लुतम्, which has neither grammar nor sense. (5) हंस-पाकाग्निमानवित्, a variant in K. (6) K reads ब्राष्पाणां, which is incorrect. (7) K and M read गन्धकस्य, which is inc. (8) M reads क्षिपेद्दितत्, which is not gram. correct. (9) M reads मध्यगम्, which is not gram. correct. (10) M reads च वन, which is inc. (11) K reads सिक्तो. M reads सिक्ता. Both the readings are not correct. (12) M reads कोशातकी. (13) K has क्षारी वा. M has क्षारी वा निचुलद्रवैः.

देवदालीशिवाबीजं[1] गुञ्जासैन्धवटङ्कणम्[2] ।
भावयेदम्लवर्गेण[3] बिड़ोऽयं हेमजारणः[4] ॥ १६ ॥
मूलकार्द्रक[5]चित्राणां क्षारैर्गोमूत्रगालितैः ।
गन्धकः शतशो भाव्यो बिड़ोऽयं हेमजारणे ॥ १७ ॥
हरितालशिलाक्षारो[6] लवणं[7] शङ्खशुक्तिका[8] ।
हंसपाकविपक्वोऽयं बिड़ः स्याद्धेमजारणे ॥ १८ ॥
एवं संगृह्य सम्भारान् रसकर्म्म समाचरेत् ।
तत्समाचक्ष्व देवेशि किमन्यच्छ्रोतुमिच्छसि ॥ १९ ॥

इति श्रीपार्व्वतीपरमेश्वरसंवादे[9]
रसार्णवे रससंहितायां
बिड़कथनो नाम[10]
नवमः पटलः ॥९॥

---

(1) K reads शिलाबीजं. M reads देवतालीशिवा, which is incomplete. (2) M reads गुञ्जाटङ्कणसैन्धवम्. (3) भावयेदाम्लवर्गेण, a variant in M. (4) बिड़ायां हेमजारणे, a variant in M, wherein the first term is incorrect. (5) M reads erroneously मूलकाद्रक. (6) K reads क्षारैः. (7) K reads भावनं. (8) K has शरसुक्तीका, which destroys the metre. (9) This portion is not found in M. (10) M reads बिड़कल्पो नाम.

## दशमः पटलः ।

श्रीदेव्युवाच ।

रसस्य लक्षणं किंवा रसकर्म्म च कीदृशम् ।
तन्न जानामि देवेश वक्तुमर्हसि तत्त्वतः ॥ १ ॥

श्रीभैरव उवाच ।

प्रागेवोक्ता रसोत्पत्तिस्तल्लक्षणमतः[1] शृणु ॥ २ ॥
तस्य नामसहस्राणि अयुतान्यर्बुदानि च ।
शक्यते न मया वक्तुं संक्षेपात् कथ्यते शृणु ॥ ३ ॥[2]
रसो रसेन्द्रः सूतश्च पारदश्चाथ मिश्रकः[3] ॥ ४ ॥
रसं सिद्धरसं विद्यात् सिद्धक्षेत्रसमाश्रयम् ।
नाशयेत् सकलान् रोगान् वलीपलितमेव सः[4] ॥ ५ ॥
देहलोहकरं शुद्धं[5] रसेन्द्र[6]मधुना शृणु ।
शरीरे हेम्नि कर्त्ता च जारणे सारणासु च ॥ ६ ॥

---

(1) K reads रसोत्पत्तिसल्लक्षणमतः, which is grammatically incorrect. (2) This śloka is not found in M. (3) M reads मिश्रकम्. [Vide रस.स. Chap. I. v. 68.] (4) K reads वलि. M reads फलितनाशनम्, which is inc. [Vide रस.स. Chap. I. vs. 69 and 77.] (5) M reads सिद्धं. (6) But vide रस.स. Chap. I. vs. 70—72 and 78, which state सूत instead of रसेन्द्र.

ईषत्पीतश्च रूक्षाङ्गो दोषयुक्तश्च सूतकः ॥ ६ ॥ (क)[1]
यो वाह्याभ्यन्तरे श्वेतो[2] बहुलं[3] कञ्चुकावृतः ।
तं विद्यात्[4] पारदं देवि तारकर्म्मणि योजयेत् ।
यथा काञ्जिकसंस्पर्शात् चीरभाण्डं[5] विनश्यति ।
तथा हेम शरीरञ्च[6] पारदेन विनश्यति ॥ ७ ॥
मयूरपत्रिकाभासं[7] मिश्रकञ्च विदुर्बुधाः ।
धूम्रवर्णं रसं[8] दृष्ट्वा विशेषेणोपलभ्यते ।
मिश्रकन्तु[9] विजानीयादुद्दाहकर्म्मकारकम्[10] ॥ ८ ॥
एवं पञ्चविधा देवि रसभेदा निरूपिताः ॥ ९ ॥[11]
स्वेदनं मर्दनं चैव चारणं[12] जारणं तथा ।

---

(1) After the 6th śloka we do not find in any of our MSS. a śloka, which defines सूत. Hence we have inserted the above hemistich from रस.स. [Chap. I. v. 72] in order to complete the list of 5 different sorts of quicksilver, i.e. रस, रसेन्द्र, सूत, पारद and मिश्रक. (2) M has वाह्याभ्यन्तरस्वेदो. (3) K reads बहुल. M reads बहुलः. (4) M reads विन्द्यात्. [Vide रस.स. Chap. I. v. 73.] (5) M reads चीरे भाण्डं, which seems to be inc. (6) K reads शरीरस्तु, which is not correct. (7) मयूरपत्रकाभासं, a variant in M. [Vide रस.स. Chap. I. v. 74, which states—"मयूरचन्द्रिकाच्छायः स रसो मिश्रको मतः."] (8) M reads धूम्रवर्णं-रसं. (9) K reads मिषकन्तु, which is inc. (10) K reads कारकः, which is gram. incorrect. M has an incomplete charaṇa—कर्मकारकम्. (11) This hemistich is wanting in M. (12) K reads सारणं. [Vide रस.स. Chap. VIII. v. 78.]

द्रावणं रञ्जनं चैव सारणं[1] क्रामणं क्रमात्।
इति यो वेत्ति तत्त्वेन तस्य सिध्यति सूतकः॥ १०॥
तीव्रत्वं जायते[2] स्वेदात् अमलत्वञ्च मर्दनात्।
चारणेन[3] बलं कुर्य्यात् जारणादिन्धनं भवेत्[4]॥ ११॥
एकत्वं द्रावणात्[5] तस्य रक्तत्वं रक्तकाञ्जनात्[6]।
व्यापित्वं सारणात्[7] तस्य क्रामित्वं क्रामणात्तथा॥ १२॥
जलगो जलरूपेण त्वरितो[8] हंसगो भवेत्।
मलगो मलरूपेण सधूमो धूमगो भवेत्॥ १३॥
अन्या[9] जीवगतिर्देवि जीवोऽण्डादिव निष्क्रमेत्[10]।
स तावज्जीवयेज्जीवं[11] तेन जीवो रसः[12] स्मृतः॥ १४॥
चतुष्टयो गतिस्तस्य निपुणेन तु लभ्यते[13]।

---

(1) K reads चारणं. [Vide रस.स. Chap. VIII. v. 70.] (2) M reads जनयेत्. (3) K reads सारणेन. (4) K reads विभोः. (5) K has an incomplete charaṇa—स्तुत्वं द्रावणात्तस्य. M reads द्रावणं. (6) K reads रक्तांजनात्, which mars the metre. (7) K has चारणात्. M has सारणं. (8) K has जलंगोजलकरूपेण तारीतो, which seems to be inc. M has कारितो in lieu of त्वरितो. [Vide रस.स. Chap. I. vs. 82–85, the readings whereof mostly agree with the above texts (13 to 16).] (9) M reads अन्या, but रस.स. reads अन्धा. (10) K reads ऽण्डादिवि, which is incorrect. M reads जीवोऽङ्गदिव निष्क्रमेत्, which is senseless. (11) सञ्जीवं जीवयेज्जीवं, a variant in M. Cf. रस.स. Chap. I. v. 84:—स तांश्च जीवयेज्जीवान्. (12) M reads जीवरसः, which is not correct. (13) M reads रच्यते.

चतस्रो गतयो दृश्या अदृश्या[1] पञ्चमी गतिः ॥ १५ ॥
मन्त्रध्यानादिना तस्य च्चीयते[2] पञ्चमी गतिः ॥ १६ ॥
धूमश्चिटिचिटिश्चैव[3] मण्डूकप्लुतिरेव च ।
अकम्पश्च विकम्पश्च[4] पञ्चावस्था रसस्य तु ॥ १७ ॥
मथ्यमानस्य[5] कल्केन सम्भवेद्धि गतित्रयम्[6] ।
जले गतिर्मलगतिः पुनर्हंसगतिस्ततः[7] ॥ १८ ॥
हेम[8] दत्त्वा ततः शुद्धं तत्तु स्तम्भेन्नियामकैः[9] ।
नियामकगणौषध्या[10] रसं दत्त्वा विपाचयेत् ॥ १९ ॥
नियमितो[11] न प्रयाति तथा धूमगतिं[12] शिवे ॥ २० ॥
कणिकाचालरहितो बुद्बुदैश्चापवर्जितः[13] ।
नियमितो भवत्येष[14] चूल्लिकाग्निसहस्तथा[15] ॥ २१ ॥

---

(1) M reads न दृश्या. Cf. रस.स., which exactly agrees with the above. (2) रस.स. reads कृष्यते. [Vide Chap. I. v. 85.] (3) K reads धूमश्चिरीचिटिश्चैव. M reads धूम्र instead of धूम. (4) K has सपक्षश्च विपक्षश्च. (5) M reads मथ्यमानेन, which appears to be inc. (6) K reads erroneously संभवेद्धौ गतित्र्यंत्रे. M reads सम्भवेद्दे गतित्रयम्, which is not perfectly correct. (7) M has जलेन विमलगतिस्तथा हंसगतिः पुनः. (8) K reads हंसं. (9) K has ततस्तम्भो नियामयेत्. M has स्तम्भस्तम्भे नियामकैः. (10) नियामकगणो विध्यो, a variant in M. (11) K reads नियमानीतो, which destroys the metre. All the texts read नियामितो, which is gram. inc. (12) K reads धूमगतिः. (13) K has बुद्बुदस्यापवर्जितः. M has बुद्बुदश्चापवन्दितः, which is inc. (14) M reads भवत्येव. (15) चूल्लिकाग्निसहस्तथा, a variant in K.

अनियम्य यदा[1] सूतं जारयेत् काञ्जिकाश्रये[2] ।
जायते निश्चितं भद्रे तदा[3] तस्य गतित्रयम् ॥ २२ ॥
दोलास्वेदेन चावश्यं[4] स्वेदितो हि दिनत्रयम्[5] ।
वसुभण्टादिभि[6]र्देवि रसराजो न[7] हीयते ॥ २३ ॥
अजीर्णं तु रसं दृष्ट्वा दद्या[8]द्ग्रोमादिकं ततः ।
स्वेदनं च[9] ततः कर्म्म दीयमानस्य मर्दनम् ॥ २४ ॥
रसालिङ्गित आहारः[10] पिष्टिकेत्यभिधीयते ।
तद्द्रुतं रसगर्भे तु जारणं परिकीर्त्तितम् ॥ २५ ॥
जारणा तत्समाख्याता तदेवच्चोपलभ्यते[11] ।
जीर्णान्ते रञ्जनं कार्य्यं रक्तवर्ग[12]गणेन च ॥ २६ ॥
जीर्णे जीर्णन्तु[13] संरक्तं[14] समहेम्ना तु सारयेत् ।
सारणायन्त्रयोगेन बध्यते सारितो[15] रसः ॥ २७ ॥

---

(1) M reads यथा, which seems to be incorrect. (2) जालयेत् काञ्जिकाश्रयं, a variant in K. (3) M reads यथा, which is not correct. (4) K reads दालास्वेदनतोऽवश्यं. M reads डोला in place of दोला. (5) The portion commencing from दिनत्रयम् and ending in रसराजो न ही is wanting in K. (6) M reads वसुभट्टादिभि. (7) M has रसराजेन, which is not accurate. (8) K reads दैया, which is gram. inc. (9) K reads तु. (10) रसं लिङ्गीतकाहार, an incorrect variant in K. (11) K has नान्येवं नोपलभ्यते. (12) K reads रक्तवर्ण. (13) M reads जीर्णाजीर्णं तु. (14) M reads संरक्त (without अनुस्वार). (15) M has सारता, which seems to be the error of the scribe.

सारित: सारितश्चैव[1] यथा भवति सूतक: ।
क्रामणेन समायुक्तं तच्च[2] वेधे नियोजयेत् ॥ २८ ॥
आरोट:[3] पारदो ब्रह्मा मूर्च्छितस्तु जनार्द्दन: ।
बद्धस्तु रुद्ररूप: स्यात्[4] कर्म्मयोगबलाद्रस: ॥ २९ ॥
शृणु देवि प्रवक्ष्यामि कर्म्मयोगस्य विस्तरम् ॥ ३० ॥
पारदस्य त्रयो दोषा विषं वह्निर्मलस्तथा[5] ।
विषेण सविषं विद्यात्[6] वह्नौ कुष्ठी भवेन्नर: ।
मलेनोदररोगो स्यात् म्रियते च रसायने ॥ ३१ ॥
षट्चुल्यश्चैकलिक्षा स्यात्[7] षट्लिक्षा यूक एव च[8] ।
षट्यूकास्तु रज:संज्ञा:[9] कथितास्तव सुव्रते ॥ ३२ ॥

---

(1) चारीतं चरितश्चैव, an incorrect variant in K. सारितस्मरितश्चैव, a variant in M, wherein the middle term is incorrect. (2) K and M read तच्च, which is gram. incorrect. (3) M reads अघाट:. [रस.स. defines आरोट thus :—"सुशोधितो रस: सम्यगारोट इति कथ्यते." Chap. XI. v. 60. Cf. "मलहीनो यदा सूत: पितामहसमो भवेत् । स बद्धो विष्णुराख्यातो रञ्जित: शिव उच्यते ॥" रससार, 1st Paṭala, v. 5.] (4) K has an incorrect reading—बद्रूपं स्यात्. (5) M reads विषवह्निजलस्तथा, wherein the term जल is incorrect. [Vide रस.स. Chap. XI. v. 14.] (6) K reads दद्यात्. M reads विन्द्यात्. [Vide रस.स. Chap. XI. v. 15.] (7) M reads लक्षा. [रस.स. agrees closely with the texts in vs. 32, 33 and 34. Vide Chap. X. vs. 102–105.] (8) K reads incompletely the whole hemistich thus :—ष···द्यश्चैव···क्षा स्यात् षड्लिक्षायुमेव च. M reads यूकमेव षट्. (9) आकरस्य रज:संज्ञं, a variant in M, which seems to be inc.

षड्रजः सर्षपः साक्षात्[1] सिद्धार्थः स च कीर्त्तितः[2] ।
षट्सिद्धार्थैश्च देवेशि यवस्त्वेकः प्रकीर्त्तितः ॥ ३३ ॥[3]
षड्यवैरेकगुञ्जा स्यात्[4] षड्गुञ्जाभिरेकमाषकः ।
माषा द्वादश तोलः स्यात्[5] अष्टौ तोलाः पलं भवेत्[6] ॥३४॥
द्वात्रिंशत्पलकं देवि शुभन्तु[7] परिकीर्त्तितम् ।
शुभस्य तु सहस्रे द्वे भार एकः प्रकीर्त्तितः ॥ ३५ ॥
द्वे सहस्रे पलानान्तु सहस्रं शतमेव वा ।
अष्टाविंशत् पलानान्तु दश पञ्चकमेव वा ॥ ३६ ॥[8]
पलार्द्धेनैव[9] संस्कारः कर्त्तव्यः सूतकस्य तु ॥ ३७ ॥
महाबला-नागबला-मेघनादा-पुनर्णवम्[10] ।
मेषशृङ्गी[11] च तत्सारैः[12] नवसारसमन्वितम्[13] ।

---

(1) M reads षड्रकः, which is an error of the scribe. रस.स. reads स स्यात्. (2) K has सिद्धार्थः स च प्रकीर्त्तितः, wherein प्र is redundant. (3) This hemistich is wanting in K. रस.स. reads षट्सिद्धार्थैर. (4) रस.स. has तु instead of स्यात्. After this charana we find in रस.स. "त्रिगुञ्जा वल्ल उच्यते । षड्भिरेव तु गुञ्जाभिर्माष एकः प्रकीर्त्तितः ।" (5) माष-द्वादश तोला स्यात्, a variant in K. (6) K has तच्चतुर्भिः पलं भवेत्, thus differing from other texts as well as from रस.स. [Vide Chap. X. v. 105.] (7) K reads शुभ्रन्तु. M reads शुभस्तु. (8) This śloka nearly agrees with रस.स. [Vide Chap. XI. v. 21.] (9) M reads पलाद्रूनं न. (10) K reads पुनर्णवा. (11) K reads मेषशृङ्गा. (12) K reads तत्सारे. (13) M reads एव सारसमन्वितम्, which appears to be incorrect.

पारदं देवदेवेशि स्वेदयेद्दिवसत्रयम् ॥ ३८ ॥

॥ इत्यौषधस्वेदनम् ॥[1]

गिरिकर्णी च मोनाक्षी सहदेवी पुनर्णवा ।
उरगा त्रिफला कान्ता[2] लघुपर्णी[3] शतावरी ॥ ३९ ॥
तुषवर्जं तु धान्याम्ले[4] सर्व्वं संक्षुभ्य[5] निक्षिपेत् ।
एकादशगुणे[6]ऽम्लेऽस्मिन् षोडशांशैर्विमर्द्दितम् ॥ ४० ॥
आसुरीलवणव्योष-चित्रकार्द्रकमूलकैः[7] ।
दोलायां[8] स्वेदयेद्देवि त्रिदिनं मृदुनाग्निना ॥ ४१ ॥

॥ इति सन्धानाम्लस्वेदनम् ॥

अङ्कोलस्तु[9] विषं हन्ति वह्नि[10]मारग्वधः प्रिये ।

---

(1) K has इत्यौषधिस्वेदनं तु कथितं तव सुव्रते । After this we find in K the following verses, which we have rejected, as these seemed to us incongruous, incorrect and unconnected with the text :—

षड्तर्वंपसाचा सिद्धार्थं स च ।
स्वेदनं मर्दनं मूर्छा स्थापनं पातनं त्रिधा ।
निरोधनं नियामं च दीपनं चानुवासनम् ।
चारणं जारणं चैव गर्भं बाह्या इति तथा ।
रंजनं चारणं चानुसारणा प्रतिसारणा ।
क्रामणं···देहस्य कर्त्तव्यं रससाधकैः । ४०

(2) K reads क्रान्ता. (3) K reads लघुपर्णा. (4) तुषवर्ज्यांसुधान्याम्लैः, a variant in K. (5) K reads सद्यः. M reads सुचौक्ष्य. (6) एकांश-ह्रीगुणे, an incorrect variant in K. (7) Vide रस.स. Chap. XI. v. 23. (8) M reads डालायां. (9) M reads अङ्कोलैस्तु, which is gram. inc. (10) K reads वज्री, which is inc.

चित्रकस्तु[1] मलं हन्यात् कुमारी सप्तकञ्चुकम् ॥ ४२ ॥[2]
तस्मादेभिः समोपेतै[3]र्मर्दयेत् पातयेद्बुधः[4] ॥ ४३ ॥
विद्याधरेण यन्त्रेण भावयेद्दोषवर्जितम्[5] ।
ततस्त्रिगुणवस्त्रस्थं[6] तं रसं देवि गालितम्[7] ॥ ४४ ॥
त्रिफलावह्निमूलत्वात्[8] गृहकन्या[9]रसान्वितम् ।
निरुद्गारे[10] तु पाषाणे मर्दयेत् पातयेत् पुनः ॥ ४५ ॥
धूमसारगुड़[11]व्योष-रजनीसित[12]सर्षपैः ।
इष्टिकाकाञ्जिकोर्णाभिः[13] त्रिदिनं मर्दयेत्ततः[14] ॥ ४६ ॥
निर्मलो जायते सूतः[15] सत्प्रभावं प्रकाशयेत्[16] ॥ ४७ ॥
वासकेन[17] विभीतेन मर्दयेत् पातयेत् पुनः ।
नागवङ्गादिका दोषा यान्ति नाशमुपाधिजाः[18] ॥ ४८ ॥

---

(1) M reads चित्रकश्च. (2) But compare रसं.स. Chap. XI. v. 28, which differs from the above in certain points. (3) K reads समोल्पेते, which is incorrect. M reads तस्मादेतत्. (4) K reads पुनः. After this śloka we find नागशुद्धिः in the MS. M. (5) K has वर्जितः, which is gram. erroneous. (6) K has ततस्त्रीगुणनेत्रस्थं, which is partly inc. [नेत्र=वस्त्र.] (7) M reads भावितम्. (8) त्रिफलामूत्रवह्नित्वात्, a variant in K. (9) K reads erroneously हृहकन्या. (10) K reads निरुद्धारे, which has no clear sense. (11) K has गुड़ा. M has कुल. (12) K reads श्वेत. (13) K reads इष्टका. M reads काञ्चिकोर्णाभिः. (14) K has मर्दितं ततः. (15) K and M read सत्वं. (16) M reads आत्मभागात् प्रकाशयेत्. (17) M reads पाशकेन. (18) K reads नाशमुपाधिया. M reads नाशमुपाधिकाः.

सप्तवारं काकमाच्या गतदोषं[1] विमर्दयेत् ।
पातयेत्[2] सप्तवारं च गिरिदोषं त्यजेद्रसः[3] ॥ ४९ ॥
चित्रदोषं त्यजेद्देवि गोकर्णरसमूर्च्छितः ॥ ५० ॥
कार्पास[4]पत्रनिर्यासे स्विन्नस्त्रिकटुकान्विते[5] ।
सप्तकञ्चुक[6]निर्मुक्तः सप्ताहाज्जायते रसः ॥ ५१ ॥
काकमाची[7] जया ब्राह्मी[8] गाङ्गेरी[9] रक्तचित्रकः[10] ।
मण्डूकी[11] मुद्गपर्णी च शृङ्गवेरं रसाङ्कुशः[12] ॥ ५२ ॥
देवदाली[13] शङ्खपुष्पी काकजङ्घा शतावरी ।
कुमारी भृङ्गराजश्च निर्गुण्डी ग्रीष्मसुन्दरः[14] ॥ ५३ ॥
शूलिनी शूर्पपर्णी च[15] गोजिह्वा चीर[16]कञ्चुकः ।
तद्रसैर्मर्दितः[17] पात्यः[18] सप्तधा निर्मलो भवेत् ॥ ५४ ॥
ताम्रेण[19] पिष्टिकां कृत्वा पातयेदूर्ध्वपातने[20] ।

---

(1) K has मलदेहं, which has no clear sense. (2) M reads पाचयेत्. (3) M reads जयेद्रसः. (4) K reads कर्पास. (5) K reads त्रिकटुकान्वितः. स्विन्नं स्त्रिकरकान्विते, a variant in M. (6) M reads काञ्चुकि. (7) K reads काकमाचि. (8) M reads ब्रह्मी. (9) K reads मार्जारी. (10) M reads रक्तचित्रकम्. (11) K reads मंडूका. M reads मण्डाकी. (12) K has रसांकुशः. M has शृङ्गिवेर. (13) देवताली is the reading in M. (14) ग्रीष्मसुन्दरम् is the variant in M. (15) च is wanting in K. M reads शूर्पपाली च. (16) K reads चिर, which is inc. (17) K reads सर्वतः. M reads मर्दितं, which is gram. inc. (18) K reads पात्यं. M reads पात्य. Both are gram. inc. (19) K reads ग्रामेन. रस.स. reads गुल्वेन. (20) K reads ऊर्ध्वपातते, which is an error of the scribe. But रस.स. reads ऊर्ध्वभाजने.

वङ्गनागौ परित्यज्य शुद्धो भवति सूतकः ॥ ५५ ॥[1]
मर्दित[2]स्त्रिफलाशिग्रुराजिका[3]पटुचित्रकैः।
ऊर्द्ध्वभाण्डगतः पाच्यः प्रदीप्तैरुपलैरधः[4] ॥ ५६ ॥
स्वच्छाम्बुजनिरोधेन लब्धापायो भवेद्रसः।
कर्कोटी[5]कञ्चुकीबिम्बी-सर्पाक्ष्यम्बुजसंयुतम् ॥ ५७ ॥
रसं नियामके दद्यात् तेजस्वी निर्म्मलो भवेत्।
एवं विशोधितः सूतो भद्राष्टांशविशोषितः ॥ ५८ ॥[6]
क्षुद्राम्ललवणक्षार[7]-भूखगोषणशिग्रुभिः[8]।
राजिकाटङ्कणयुतैरारनाले[9] दिनत्रयम्।
स्वेदनाद्दीपितो देवि ग्रासार्थी[10] जायते रसः ॥ ५९ ॥[11]
व्योमसत्त्वादिबीजानि रसजारणशोधने[12]।
तत्समाचक्ष्व देवेशि[13] किमन्यच्छ्रोतुमिच्छसि ॥ ६० ॥

---

(1) This hemistich closely agrees with रस.स. (vide Chap. XI. v. 31.) (2) M reads मर्दितं, which is gram. inc. (3) M reads रासका. (4) प्रदीप्तरुक्फलैरध, a variant in M, which appears to be inc. (5) M reads कर्कटी. [Vide रस.स. Chap. XI. vs. 41 and 42.] (6) The ślokas 57 and 58 are not found in K. (7) क्षौद्रं-सलवणक्षारः, a variant in M. (8) यूषगोषणशिग्रुभिः, a variant in K. (9) K reads आरनालैः. (10) K reads ग्रासार्थि, which is gram. inc. M reads ग्रासाची. (11) The 43rd śloka in रस.स. Chap. XI. mostly agrees with the 59th śloka of this text. (12) रसे जारण-शोधने, a variant in K. रसो जारय शोधिते, a variant in M. Both of these readings do not convey a clear sense. (13) This charaṇa is not found in M.

इति श्रीपार्व्वतीपरमेश्वरसंवादे[1]
रसार्णवे रससंहितायां
रसशोधनो नाम[2]
दशमः पटलः ॥१०॥

---

## एकादशः पटलः ।

श्रीदेव्युवाच[1] ।

लक्षणं शोधनं चैव पारदस्य श्रुतं मया ।
चारणं जारणं चैव श्रोतुमिच्छामि भैरव ॥ १ ॥

श्रीभैरव उवाच[2] ।

सर्व्वपापक्षये जाते[3] प्राप्यते रसजारणा[4] ।
तत्प्राप्तौ प्राप्तमेव स्याद्विज्ञानं[5] मुक्तिकारणम् ॥ २ ॥
मोक्षाभिव्यञ्जकं[6] देवि जारणं साधकस्य तु ।
यावन्न जार्य्यते[7] सूतः तावत्तु न च निर्वृतिः[8] ॥ ३ ॥

---

(1) This is wanting in M. (2) K and M read रसशोधनं नाम.

---

(1) M has only देवी. (2) M has only भैरवः. (3) K reads सर्वपापक्षयं तस्य. (4) K reads रसजारणात्. (5) M has द्विजानां. (6) M reads मोक्षाभिव्यञ्जनं. (7) यावत् सुजीर्य्यते, a variant in K. यावन्न जायते, a variant in M. (8) K has an incomplete charaṇa—तावन्न च तिष्ठति.

खल्लस्तु पीठिका[1] देवि रसेन्द्रो लिङ्गमुच्यते।
मर्द्दनं वन्दनं[2] तस्य ग्रासः पूजा[3] विधीयते॥ ४॥
यावद्दिनानि वह्निस्थो जार्य्यते[4] धार्य्यते रसः।
तावद्युगसहस्राणि शिवलोके महीयते॥ ५॥
दिनमेकं रसेन्द्रस्य यो ददाति हुताशनम्[5]।
द्रवन्ति तस्य पापानि कुर्व्वन्नपि न लिप्यते॥ ६॥
जारणा द्विविधा बाल[6]-जारणा वृद्धजारणा[7]।
तत्रादौ परमेशानि वक्ष्यते बालजारणा॥ ७॥[8]
गगनं जारयेदादौ सर्व्वसत्त्वमतः परम्।
ततो माक्षिकशुद्धं च[9] सुवर्णं तदनन्तरम्॥ ८॥
गर्भस्थं द्रावयित्वा तु[10] ततो वाह्यद्रुतिं[11] द्रवेत्।

(1) K reads खल्लं तु पिण्डिका. M reads खल्लन्तु. (2) M has चर्द्दनं, which is incorrect. (3) K reads पूजो, which is incorrect. (4) M reads जारणा, which seems to be gram. inc. (5) M has सिताशनम्, which has no clear sense. (6) K reads बाला, M reads विविधा बाल. (7) K reads जारणाद्भगुपातना, which is unintelligible. वृद्धजारणा will be explained in the 13th Paṭala. (8) This hemistich is not found in M. [Vide रस.स. Chap. VIII. vs. 65 and 66, which state जारणा first as त्रिरूपा, and next as द्विविधा.] (9) K has माक्षिकशुद्धे च. We do not find this charaṇa and the next in M. (10) गर्भे संद्रावयित्वा तु, a variant in K, which is gram. inc. (11) M reads छायाद्रुतिं, which seems to be inc. [Vide रस.स. Chap. VIII. v. 72, wherein वाह्यद्रुति is explained.]

सितं सितेन द्रव्येण रक्तं रक्तेन रञ्जयेत् ॥ ९ ॥
सारणं क्रामणं ज्ञात्वा ततो वेधं प्रयोजयेत् ॥ १० ॥[1]

॥ चारणजारणमन्त्रः ॥

ॐ नमोऽमृतलोहाय परामृतरसोद्भवाय हुं स्वाहा ॥११॥
सर्व्वसत्त्वोपकाराय भगवन् त्वदनुज्ञया ।
जारणं कर्त्तुमिच्छामि ग्रासं गृह्ण[2] मम प्रभो ॥ १२ ॥
कुरुष्वेति शिवेनोक्तं ग्राह्यमेव[3] सुबुद्धिना ॥ १३ ॥
शृणु देवि प्रवक्ष्यामि व्योमजारणमुत्तमम् ।
पत्राभ्र[4]जारणं सत्त्वजारणञ्चेति तद्द्विधा[5] ॥ १४ ॥
निर्मुखं समुखं[6] चैव वासनामुखमेव च ।
एकैकं त्रिविधं तच्च तद्वक्ष्याम्यानुपूर्व्वशः[7] ॥ १५ ॥
वैक्रान्त[8]वज्रसंस्पर्शात्[9] दिव्यौषधिबलेन वा ।
निर्मुखो भक्षयेद्देवि[10] चर्णेन गगनं रसः[11] ॥ १६ ॥

---

(1) This hemistich is wanting in M. (2) K reads ग्राह्य. M reads गृह्यं. Both the readings are gram. inc. [गृह्ण is generally used by Rishis, though the correct form is गृहाण.] (3) भावमेव सुबुद्धिमान्, a variant in K. वाह्यमेव, a variant in M. (4) M reads पत्राभ्रू, which appears to be incorrect. (5) K reads erroneously तद्विधा. (6) K has निमुखं. M has सम्मुखं. रस.स. reads—"समुखा निर्मुखा चेति जारणा द्विविधा पुनः ॥" "इयं हि सम्मुखा प्रोक्ता जारणा मृगचारिणा ॥" (Chap. VIII. vs. 66 and 69.) (7) K and M read तद्वक्षाम्यनुपूर्वशः. (8) M reads वैक्रन्तं, which is inc. (9) K and M read संस्पर्शं (without any suffix), which seems to be inc. (10) लक्षयेद्देवि, a reading in K. (11) M reads रसम्, which is gram. erroneous.

हेमकर्म्मणि हेमैव तारे तारो मुखं[1] भवेत् ॥ १७ ॥
तप्तखल्लकृता पिष्टिः[2] श्लक्ष्ण[3]मल्पाल्पमभ्रकम् ।
अम्लवेतस[4]जम्बीरबीजपूराम्लभूखगैः[5] ।
मर्द्दितं[6] चरति देवि सेयं समुखजारणा[7] ॥ १८ ॥
क्षारत्रयं[8] पञ्चपटु[9] काञ्ची[10]-काशीसगन्धकम् ।
माक्षिकं चाम्लसंयुक्तं ताम्रपात्रे तु जारयेत्[11] ॥ १९ ॥
एतच्चाभिषवाद्[12]दिव्यं कारयित्वा विचक्षणः ।
जारणार्थञ्च बीजानां[13] वज्राणाञ्च विशेषतः ॥ २० ॥
तस्मिन्नावर्त्तितं नागं वङ्गं[14] वा सुरवन्दिते ।
निषिञ्चयेच्छतं वारं न रसायनकर्म्मणि ॥ २१ ॥
अनेन सकलं देवि[15] चारणावस्तु भावयेत्[16] ।
क्षाराम्ले[17] भावितं व्योम रजसा प्रथमेन च ॥ २२ ॥

---

(1) रस.स. defines मुख thus :—"शुद्धं स्वर्णं च रूप्यं च बीजमित्यभिधीयते ॥६७॥ चतुःषष्टांशतो बीजप्रक्षेपो मुखमुच्यते । ६८ ।" (Chap. VIII.) (2) तप्त खल्ले कृतापिष्ट, a variant in K. M reads कृतापिष्टि. (3) K reads सूक्ष्म. (4) M reads आम्लवेतस. (5) K has बीजपूराम्लभूखगै, which is gram. inc. (6) M reads मृदितं. (7) K has जारणात्. M has सम्मुखजारणा. (8) K reads क्षारद्वयं. (9) K reads पञ्चलवणं. M reads पञ्चवटुः, which seems to be incorrect. (10) K has कांजि. M has काचि. (11) K reads सारयेत्. (12) एतच्चाभिषवं, a variant in K. (13) जारणार्थे तु बीजानि, a variant in K. (14) M reads वङ्गं. (15) अनेन स चारणां वस्तु, a variant in K. (16) भावयेद्विचक्षणः, a variant in K. (17) K reads क्षाराम्ल.

सृष्टित्रयोदककणा[1]-तुम्बुरुद्रवमर्दितम्[2] ।
चरेज्जरिद्रा पुटितं[3] यवचिञ्चारसेन च ॥ २३ ॥
शतावरी गदा रम्भा मेघनादा पुनर्नवा ।
शिग्रुकी यवचिञ्चा च भावितं तद्रसैः क्रमात् ॥ २४ ॥
मूलं ह्विलमुचायास्तु[4] कौवेरीमूलमेव च ।
कदलीमुसलीशिग्रु-ताम्बूलीवाणपीलुकम्[5] ॥ २५ ॥
अलम्बुषा बला कोल मास्फोटः खरमञ्जरी ।[6]
तुम्बुरुस्तिक्तशाकं वाप्येषामेकरसेन तु ।
राजिकाव्योषयुक्तेन त्रिदिनं स्विन्नमभ्रकम् ॥ २६ ॥
काशीसतुवरीसिन्धु[7]-टङ्कणक्षारसंयुतः[8] ।
पूर्व्वाभिषव[9]योगेन सूतकश्चरति क्षणात् ॥ २७ ॥
गोलको[10] भवति क्षिप्रं सर्व्वसिद्धिप्रदायकः[11] ॥ २८ ॥
गृहीत्वा देवि धान्याभ्र-मम्लवर्गेण[12] संयुतम् ।

---

(1) K reads शृष्टी. M reads सष्ट. Both the readings are incorrect. (2) M reads तुम्बुरुरसमर्दितम्. (3) योजयेद्वी पटी चैक, a variant in K, which seems to be unconnected with the text. (4) K reads erroneously ह्विलमुचायास्तु. (5) K has बालपीलुका. (6) This hemistich and the next two are not found in K. (7) K reads कौशीसतुवरीसैंधू, which is inc. (8) K has संयुतं, which is gram. inc. M has टङ्कणं चारसंयुतः, which is partly inc. (9) K reads पुर्वाभिषया, which is inc. (10) K has गोलकं. (11) सर्वसिद्धीप्रदायकं, a variant in K. M reads प्रदायकम्, which is gram. inc. (12) अम्लवर्णेन is the reading in K, which is not correct.

क्षाथयित्वाभ्रकं तत्तु[1] स्नुहीक्षीरेण[2] मर्दयेत् ॥ २९ ॥
आरण्य[3]गोमयेनैव कपोताख्यं पुटं[4] ततः ॥ ३० ॥
कदलीकन्दनिर्यासे[5]र्मूलकन्दरसेन च ।
काकमाची च मीनाची अपामार्गो मुनिस्तथा[6] ॥ ३१ ॥
एरण्डमार्द्रकञ्चैव[7] मेघनादा[8] पुनर्नवा ।
एकैकस्य द्रवैरेव[9] पुटैकैकं प्रदापयेत्[10] ॥ ३२ ॥
वज्रीक्षीरेण संयुक्तं दोलायन्त्रेण[11] पाचयेत् ।
छायाशुष्कं ततः कृत्वा चणकाम्लेन संयुतम्[12] ॥ ३३ ॥
नवसारं च काशीसं वचा[13] निम्बं तथैव च ।
अभ्रस्य[14] षोड़शांशेन एकैकं तत्र[15] निक्षिपेत् ॥ ३४ ॥
निधाय[16] ताम्रपात्रे तु घर्षयेत्तत्र[17] सुव्रते ।
नववारं[18] ततो देवि लोहपात्रे तु जारयेत् ॥ ३५ ॥
रसेन सह देवेशि चणकाम्लेन काञ्जिकम् ।

---

(1) K reads क्षाथयित्वा भ्रम्रं तं तु. (2) M reads स्नुहिक्षीरेण. (3) M reads अरण्ये. (4) M reads कपोताख्यपुटं. (5) M has निर्यासै. (6) K reads अपामार्गमुनी तथा. (7) K reads मार्द्रकथैव. (8) M reads मेघनाद. (9) एकैकरसद्रवैकेन, a variant in K. (10) K has पुटकैकं. M has सुदापयेत्. (11) M reads डोलायन्त्रेण. (12) K reads भैरवि. (13) M reads वसा. (14) K reads अभ्रकात्. (15) M reads तत्तु. (16) M reads विडारी, which is unintelligible. (17) पर्वतं ये च, a variant in K, which has no sense. M reads घर्षयेत्तथ. (18) K has निववारीं, which is absurd.

मृदग्निना तु निःक्वाथ्यं प्रहरार्द्धेन जायते ॥ ३६ ॥
सोमवल्लीरसैः पिष्ट्वा व्योम सौवर्चलान्वितम् ।
शनैः शनैर्हंसपाद्या[1] दापयेच्च पुटत्रयम् ॥ ३७ ॥
सोमवल्लीरसेनैव सप्तवारञ्च दापयेत्[2] ।
पातयेन्मृन्मये भाण्डे[3] रसेन सह संयुतम् ॥ ३८ ॥
मूलं वल्लीषुपुङ्खाया[4] गव्यक्षीरेण घर्षयेत्[5] ।
कल्केन लेपयेत् सूतं गगनञ्च तदूर्द्धगम्[6] ॥ ३९ ॥
तापयेद्रवितापेन निर्मुखं ग्रसते क्षणात् ।
जायते पिष्टिका शीघ्रं नात्र कार्य्या विचारणा ॥ ४० ॥
तिलपर्णीरसेनैव गगनं भावयेत् प्रिये[7] ।
मर्दनाज्जायते पिष्टी[8] नात्र कार्य्या विचारणा ॥ ४१ ॥
मुण्डीनिर्यासके नागं[9] बहुशस्तु निषिचयेत् ।[10]
तेनाभ्रकं तु संप्लाव्य[11] भूयोभूयः पुटे दहेत् ॥ ४२ ॥

---

(1) The portion commencing from रसेन सह and ending in हंसपाद्या is not found in M. (2) K reads तापयेत्. (3) दापयेन्मृन्मये पात्रे, a variant in K. (4) K has श्वितेषुपुङ्खाया. (5) गोक्षीरे सह पेषयेत्, a variant in K, which is gram. inc. (6) K reads गगनं तदधोर्द्धगं. (7) गगनं तेन भावयेत्, a reading in K. (8) M reads पिष्टिः. (9) K reads नापि. (10) After this charana we find in K the following hemistich :—कल्केन लेपयेत् सूतं गगनं तदधोर्ध्वगं, which we have not adopted, seeing it to be the repetition of the latter half of the 39th śloka. (11) K reads संभाव्य.

चित्रकार्द्रकमूलाना[1]मेकैकेन तु सप्तधा।
प्लावितव्यं[2] प्रयत्नेन गन्धकाभ्रकचूर्णकम् ॥ ४३ ॥
नागमुण्डीरसस्तन्य[3]रजो[4]लुङ्गाम्लभावितम् ।
षोड़शांशेन तद्दत्तं दोलायां[5] तु चरेद्रसः ॥ ४४ ॥
चतुःषष्टि[6]गुणं देवि द्वात्रिंशद्गुणमेव वा[7] ।
अथवा षोड़शगुणं तथाष्टगुणमेव वा[8] ।
चतुर्गुणं वा[9] द्विगुणं समं वा चारयेत्[10] प्रिये ॥ ४५ ॥
परमभ्रकसत्त्वस्य[11] जारणं शृणु पार्व्वति ॥ ४६ ॥
व्योमसत्त्वं समांशेन ताप्यसत्त्वेन संयुतम्[12] ।
स खल्वेदं[13] चरेद्देवि गर्भद्रावो[14] भवेद्रसः ॥ ४७ ॥
नागाभ्रं देवि वङ्गाभ्रं[15] तीक्ष्णाभ्रं[16] करकाभ्रकम्[17] ।
ताराभ्रं देवि[18] हेमाभ्रं[19] रसगर्भेण[20] जारयेत् ॥ ४८ ॥

---

(1) K reads मूलानि. (2) All the texts have this reading, which is gram. erroneous, the correct form being प्लावयितव्यं. (3) K reads नागं मुण्डीरसस्तन्यं. (4) K reads रसं लुङ्गाम्लभावितम्. (5) M reads डोलायां. (6) K reads चतुषष्टि, which is inc. (7) K reads च. (8) K and M read च, which is not accurate. (9) M reads च. (10) K has समं जारयते. (11) K reads पत्रस्य. (12) K reads erroneously पुंसकं. (13) K has संकल्पेन. (14) K reads गर्भद्रावि. M reads गर्भद्रावं. Both the readings are gram. incorrect. (15) M reads वङ्गाभं. (16) K reads तिक्ताभं. (17) K reads भास्कराभकम्. (18) K reads तु, which mars the metre. (19) M reads शुल्वाभं. (20) K reads रसगर्भे, thus wanting one letter.

पूर्व्वाभिषेक[1]योगेन गर्भे द्रवति मर्दनात् ॥ ४८ ॥
चतु:षष्ट्यंशक: पूर्व्व:[2] द्वात्रिंशांशो द्वितीयक:[3] ।
तृतोय: षोड़शांशस्तु[4] चतुर्थोऽष्टांश एव च[5] ॥ ५० ॥
पञ्चमस्तु चतुर्थांश:[6] षष्ठो द्व्यंश: प्रकोर्त्तित:[7] ।
ग्रासो रसस्य दातव्य:[8] ससत्त्वस्याभ्रकस्य च[9] ॥ ५१ ॥
चतु:षष्ट्यंशके[10] ग्रासे दण्डधारी भवेद्रस: ।
जलौकावद्द्वितीये च[11] ग्रासयोगे सुरेश्वरि ॥ ५२ ॥
ग्रासेन तु तृतीयेन[12] काकविष्ठासमो भवेत्[13] ।
ग्रासेन तु चतुर्थेन दधिमण्डसमो भवेत् ॥ ५३ ॥
पञ्चमे चार्पिते ग्रासे नवनीतसमो[14] भवेत् ।
षष्ठे तु गोलकाकार:[15] क्रमाज्जीर्णस्य लक्षणम् ॥ ५४ ॥
काञ्जिकेन निषिक्तेन रक्तव्योम शतप्लुतम्[16] ।

---

(1) K reads पुर्वाभिश्रिक, which is incorrect. (2) चतुषष्टांशकं पूर्वं, an incorrect variant in K. (3) द्वाचिंशांशं द्वितीयकं, a variant in K. (4) तृतीयं षोड़शांशेन, a variant in K. (5) चतुर्थाष्टांशमेव च, a variant in K, which is inc. (6) पञ्चमोपि चतुर्थांशो, a variant in K. (7) षष्ठो विश्वाग्न्यकीर्त्तित:, a variant in M. (8) K reads ग्रासा रसस्य दातव्या:. M reads ग्रासो रसस्य दातव्यं, wherein the last term is inc. (9) K has सत्वस्याभ्रकजस्य वा. (10) K reads चतुषष्टांशतो. M reads चतुष्षष्टांशता. Both are inc. (11) जलूकवद्वितीये तु, a variant in M. (12) M reads तृतीयस्य. (13) येन काकविषा भवेत्, a variant in M. (14) K reads नवनीत: समो, which is not correct. (15) K reads गोलकाकारं. (16) K reads रक्ते व्योमस, which is inc. तेन व्योम is the reading in M.

खल्वान्तश्चारयेत्तच्च[1] शुल्ववासनया[2] सह ॥ ५५ ॥
हेम तारञ्च संघृष्य[3] खल्ले तत्र रसं न्यसेत्[4] ।
काञ्चीसहितकाशीसं[5] सिन्धुना चरते रसः ॥ ५६ ॥
हेम सीसन्तु संघृष्य[6] रसं तत्र प्रदापयेत् ।
नागहेमयुतं व्योम समजीर्णं द्रुतं[7] भवेत् ।
अभ्रकोपरसान्[8] क्षिप्रं सुखेनैव चरत्ययम् ॥ ५७ ॥
तारं वङ्गं च संघृष्य[9] रसं तत्र प्रदापयेत् ।
नागहेमयुतं व्योम समजीर्णं द्रुतं भवेत् ।[10]
सुखेन चरते व्योम तारकर्म्मणि शस्यते[11] ॥ ५८ ॥
समुखं निर्मुखं[12] वापि यत्नतश्चारयेन्नभः[13] ॥ ५९ ॥
चारणां त्रिविधामेवं[14] कृत्वा गर्भद्रुतिं रसे ।
जारयेत् स्वेदयेत् पिण्डं[15] परिणामक्रमैस्त्रिभिः[16] ॥ ६० ॥
कट्वम्ल[17]क्षारगोमूत्र-स्नुहीक्षीरैः प्रलेपितम्[18] ।

---

(1) खल्ले तु चालयेत्तच्च, a variant in K. (2) K reads शुल्व वासनया. M reads वासनाया, which is inc. (3) K reads संस्थाप्य. (4) खल्ले तत्र च संन्यसेत्, a variant in K. (5) कांचीसहितकाशीस, a variant in M. (6) K reads संगृह्य. (7) M has समजीर्णद्रुतं. (8) M reads अभ्रकोल्यरसान्. (9) K reads संगृह्य. M reads संघृष्य. (10) This hemistich is not found in K. (11) K reads संमुखं. (12) निर्मुखं संमुखं is the reading in K. सम्मुख निर्मुख is the reading in M. (13) K reads ततः, which is not accurate. (14) M reads जारणां त्रिविधामेव. (15) K reads incompletely—जारयेत् पिण्डे. (16) M reads incompletely—परिक्रमैस्त्रिभिः. (17) M reads पट्वम्ल. (18) स्नुहि-क्षीरे प्रलेपिते, a variant in M.

वह्निस्थ बद्धं वस्त्रेण[1] भूयो ग्रासं निवेदितम्[2] ।
क्षाराम्लनालतैलेषु स्वेदयेन्मृदुनाग्निना ॥ ६१ ॥
क्रमेणानेन देवेशि जायते दिवसैस्त्रिभिः[3] ।
यन्त्रादुद्धृतमात्रं तु[4] लोहपात्रे स्थितं रसम्[5] ॥ ६२ ॥
साम्लेन[6] काञ्जिकेनादौ क्षालितं वस्त्रगालितम् ।
पात्रे सुखोष्ण[7]हस्तेन यावत् शेषं विमर्दयेत् ॥ ६३ ॥
चतुर्गुणेन वस्त्रेण पीड़ितो निर्मलश्च सः[8] ॥ ६४ ॥
गालनक्रियया ग्रासे सति निष्पेषनिर्गते[9] ।
स[10] भवेद्दण्डधारी च जीर्णग्रासस्तथा रसः[11] ॥ ६५ ॥
अजीर्णे पाचयेत् पिष्टीं[12] स्वेदयेन्मर्दयेत्तथा ।
वासवास्त्र[13]प्रयोगेण जीर्णे ग्रासं तु दापयेत्[14] ॥ ६६ ॥
इष्टिकागुड़दुग्धोर्णा[15]-राजीसैन्धवधूमजैः[16] ।

---

(1) K has वह्निवस्त्रेण. M has वन्हे वस्त्रेण. (2) भूर्जे क्षारं निवेध्यताम्, a variant in M. (3) M has वा त्रिभिस्त्रिभिः. (4) M reads मात्रे तु. (5) M has रसः, which is gram. inc. (6) M reads सोष्णेन, which is perhaps कोष्णेन. (7) M has सुखोष्णे. (8) विड़तो निम्मलं रसः, a variant in M, wherein the second term is inc. (9) सति विशेषनिर्गते, a variant in K. (10) M reads न, which is an error of the scribe. (11) We do not find तथा रसः in K. (12) K reads त्याजयेत् पिष्टीं. M reads पिष्टं. (13) K has वासनास्त्र. (14) M reads तापयेत्. (15) B reads दुग्धार्णं. M reads इष्टकागुड़दिग्धोर्णं. (16) M reads धूमकैः.

षोड़शांशैः स धान्याभ्रैः[1] मर्द्दैः स्वेद्यश्च पारदः[2] ॥ ६७ ॥
निर्म्मलीकरणार्थं तु[3] ग्रासे ग्रासे[4] पुनः पुनः।
जीर्णाभ्रो जीर्णवीजोऽपि रागान् गृह्लाति[5] निर्म्मलः ॥ ६८ ॥
क्रमेणानेन दोलायां[6] चार्य्यं[7] ग्रासचतुष्टयम्।
ततः कच्छपयन्त्रेण ज्वालनं बन्धनं[8] क्रमात् ॥ ६९ ॥
ऊर्द्धाधश्चाष्टमांशेन विड़ं दत्त्वापि जारयेत्[9]।
समजीर्णाभ्रकः सूतः शतवेधी[10] भवेत् प्रिये ॥ ७० ॥
सहस्रवेधी द्विगुणे त्रिगुणेऽयुतवेधकः।
चतुर्गुणे लक्षवेधी स भवेद्भूचरो रसः ॥ ७१ ॥
जीर्णे पञ्चगुणे[11] देवि ब्रह्मायुर्जायते रसः[12]।
आयुस्तु[13] षड़्गुणे[14] विष्णोः कोटिवेधी भवेद्रसः ॥ ७२ ॥
रसस्य सर्व्वदोषास्तु[15] षड़्गुणेनाभ्रकेन तु[16]।

---

(1) B has an incomplete charana षोड़शांशैः स धाभ्रैः. M has षोड़शांशैः सधान्याभ्रैः. (2) B reads स पारदः. K reads श्वेद्यः, which is incorrect. (3) K reads करणार्थं तु. (4) The second ग्रासे is omitted in B. (5) रागानाश्नाति is the variant in B. नागादगृह्लाति is the variant in M. (6) M reads डोलायां. (7) B reads चार्थं. K reads वार्य्यं. Both are inc. (8) B has ज्वालनं वर्द्धनं, which is inc. M has मर्द्दनं. (9) B reads तत्रापि instead of दत्वापि. पिण्डौ दत्वापि कोष्ठिते, a variant in K. दत्वा विचारयेत्, a reading in M. (10) B reads शतवेधि, which is inc. (11) M reads पञ्चगुणं, which is not correct. (12) B and M read नरः. (13) B reads आयुश्च. (14) K reads षट्गुणे. M reads षड़्गुणी. (15) M has सर्व्वदोषांस्तु, which seems to be incorrect. (16) K reads षट्गुणेन. M reads षड़्गुणेनाभ्रकस्य तु.

जीर्णेन नाशमायान्ति[1] नात्र कार्य्या विचारणा ॥ ७३ ॥
रसराजि[2] यदा जीर्णं[3] षड्गुणं गगनं[4] प्रिये ।
तदा[5] ग्रसति लोहानि त्वजेच्च मतिमात्मनः[6] ॥ ७४ ॥
धूमश्चिटिचिटिश्चैव[7] मण्डूकप्लुतिरेव च[8] ।
सकम्पश्च विकम्पश्च[9] पञ्चावस्था रसस्य तु ॥ ७५ ॥
कपिलोऽथ निरुद्गारि[10]-विप्लुषश्चैव मुञ्चति[11] ।
अग्नौ तिष्ठति[12] निष्कम्पो व्योमजीर्णस्य लक्षणम् ॥ ७६ ॥
समजीर्णो भवेद्बालो[13] यौवनस्थ[14]श्चतुर्गुणम् ।
वृद्धस्तु षड्गुणं जीर्णः[15] कुर्य्यात्[16] कर्म्म पृथक् पृथक् ॥७७॥

---

(1) K has जीर्णं जीर्णं समायांति. M has जीर्णेन नाशका यान्ति. The sense of these readings is not clear. (2) B reads रसराज्ञी. (3) K reads जीर्णं. M reads यथा जीर्णं. (4) M has गगनं षड्गुणं. (5) B has यदा, which is inc. (6) Both B and K read मतिमात्मरः, which has no clear sense. (7) धूमं विश्चि चिटिश्चैव, a variant in K. (8) मेण्डुकप्लुतिरेव च, a variant in B. K has मंण्डुकस्तुतिमेव च. Both the readings seem to be inc. (9) K reads सकंपं च श्किंपं च. (10) M reads कपिलोत्थनिरुद्गानि. (11) B reads विप्रुषश्चैव. In K, the whole hemistich seems to be incorrect, which is as follows—कपिलं त्वनिपिप्लुतिमेव चषं चैव मुञ्चति. (12) K reads तिष्ठंति, which is gram. incorrect. (13) समौवर्णो वभेद्बालो, an incorrect variant in K. (14) B reads यौवनर्थ, which has no sense. K reads यौवनस्थ (without विसर्ग), which is gram. inc. (15) B has वृद्धं षड्गुणजीर्णस्तु. K has वृद्धः षड्गुणजीर्णस्तु. M has वृद्धस्तु षड्गुणो जीर्णं. We have adopted the above reading after collating all the texts. (16) Both B and K read सदा.

बालस्तु पत्रलेपेन कल्कयोगेन यौवनः[1] ।
वृद्धो[2] विध्यति लोहानि जारितः सारितोऽथवा ॥ ७८ ॥
कुमारस्तु रसो देवि न समर्थो रसायने ।
यौवनस्थो रसो[3] देवि क्षमो देहस्य रक्षणे ॥ ७९ ॥
जरावस्थो रसो यत्र देहे लोहेन संक्रमेत्[4] ।
अभावेऽभ्रकसत्त्वस्य[5] कान्तसत्त्वं प्रदापयेत् ॥ ८० ॥
कान्तस्य चाप्यभावे[6] तु तीक्ष्णलोहन्तु दापयेत् ।
अनेन क्रमयोगेन सर्व्वसत्त्वानि जारयेत्[7] ॥ ८१ ॥
एकोऽपि हेमसंयुक्तश्चामीकरकरः क्षणात् ।
गन्धकात् परतो नास्ति रसेषूपरसेषु वा[8] ॥ ८२ ॥
पूर्व्वोक्तसन्त्रयोगेन[9] द्विरष्टगुणगन्धकम्[10] ।
अथवा द्वादशगुणं षड्गुणं[11] वापि जारयेत्[12] ॥ ८३ ॥
माक्षिकं[13] सत्त्वमादाय पादांशेन तु[14] जारयेत् ।
ततोऽपि सर्व्वसत्त्वानि द्रावयेत् सूतगर्भतः ॥ ८४ ॥

---

(1) M reads यौवनः, which is incorrect. [Here अर्शआदित्वात् अच्.]
(2) K reads वृद्धौ, which is incorrect. (3) K reads यौवनस्थरसो.
(4) K reads संक्रमे, which is an error of the scribe. M reads देहलोहस्य.
(5) अभावे अभ्रसत्वस्य, a reading in M. (6) K reads वाप्यभावे.
(7) M reads रञ्जयेत्. (8) K reads च. From this hemistich, some portion is wanting in B. (9) M has पूर्व्वोक्तयागयन्त्रेण.
(10) K reads द्विरष्टगुणं गन्धकं, which is incomplete. (11) K has षट्गुणं. (12) M has वा विजारयेत्. (13) M reads माक्षिक.
(14) तु is wanting in K.

हेमपावकयोः सख्यं तथा[1] काञ्चनसूतयोः ।
वह्निसूतकयोर्वैरं तयोर्मित्रेण मित्रता[2] ॥ ८५ ॥
अग्निको[3] यवचिञ्चा च स्वणभट्टश्च रागिणी[4] ।
दोलास्वेदेन[5] तत् पक्वं हेमजारणमुत्तमम् ॥ ८६ ॥
पलाशभस्मापामार्गौ[6] यवक्षारश्च काञ्जिकम्[7] ।
सौवर्चलं च काशीसं[8] सामुद्रं सैन्धवं तथा ॥ ८७ ॥
आसुरी टङ्कणश्चैव[9] नवसार[10]स्तथैव च ।
कर्पूरश्चैव माक्षीकं[11] समभागानि कारयेत् ॥ ८८ ॥
स्नुह्यर्कदुग्धैर्देवेशि[12] मूषा[13]लेपस्तु कारयेत् ।
विड़चूर्णं ततो दत्त्वा कनकं जारयेत् प्रिये ॥ ८९ ॥
शृणु देवि प्रवक्ष्यामि भूचराख्यन्तु[14] जारणम् ॥ ९० ॥

---

(1) M reads सूत, which creates a tautology. (2) तयोर्मित्रेण मित्रता, a variant in M. (3) K reads अंकोलं. (4) K reads incompletely—सुभटेन नाकिनी. The meaning of स्वणभट्ट is unintelligible. (5) M reads डोलास्वेदेन. (6) K reads पमार्ग, which seems to be incorrect. (7) M reads काञ्चिकम्. (8) K reads कौशीसं, which is an error of the scribe. M reads कासीसं. (9) K has आ······री टङ्कणं चैव, which is incomplete. (10) M reads नागसार. (11) कर्पूरं चैव माक्षिकं, a variant in K. (12) K reads स्नुह्यर्कदुग्ध-देवेशि, which appears to be inc. M reads स्नुह्यर्कदुग्धं, which is not also accurate here. (13) K reads मूखा, which is inc. (14) K has भूधराख्यान्तु. M has भूजंराख्यान्तु. Both seem to be inc. ; since we see afterwards (in śloka 98) भूचरी जारणा and not भूधरी or भूजंरी जारणा.

कृष्णं पीतं[1] तथा रक्तं[2] शुल्वे तीक्ष्णे च मेलयेत् ॥ ८१ ॥
शुल्वे तीक्ष्णं यदा चूर्णं[3] द्वाविंशतिगुणं प्रिये[4] ।
गन्धनागं ततोऽर्द्धं तु[5] क्रमेणैव तु मेलयेत् ॥ ८२ ॥
हेम्ना तु सह दातव्यं सूतकेकेन षोड़श[6] ।
गन्धनागं यदा जीर्णं[7] तदा[8] बद्धो[9] भवेद्रसः ।
हेम्नि जीर्णे ततोऽर्द्धेन[10] मृत[11]लोहेन रञ्जयेत् ॥ ८३ ॥
गन्धकेन हतं शुल्वं[12] माक्षिकं दरदायसम् ।
पुटेन मारयेच्छुद्धं हेम दद्यात् तु षड्गुणम्[13] ॥ ८४ ॥
सूतके हेमबीजं च यदा जीर्णं[14] चतुर्गुणम् ।
बद्धरागं विजानीयात् हेमाभो जायते रसः ॥ ८५ ॥
सारणायन्त्रमध्यस्थं तेनैव सह सारयेत्[15] ।
त्रिभाग[16]सारितं कृत्वा पुनस्तत्रैव[17] जारयेत् ॥ ८६ ॥

---

(1) K reads कृष्णपीतं. (2) M reads रक्तशुभ्रं. (3) शुद्धं यदा भवेज्जीर्णं, a variant in K ; after this, one charaṇa is wanting in it. (4) K reads द्वाविंशतिगुणं चैव न सारतयैव च, which is incomplete. (5) M reads ततोर्थे तु, which is unintelligible. (6) सूतके चैव षोड़शं, a reading in K. (7) M reads यथा चूर्णं. (8) M reads तथा. (9) K reads मद्रो, which seems to be incorrect. (10) K has an incomplete charaṇa—हेमजीर्णे ता···न. (11) M has मृता, which is inc. (12) K reads सुल्वं. (13) हेमं दद्यात् षड्गुणं, an incomplete variant in K. (14) K reads यदार्णं, which is an error of the scribe. M reads यथा जीर्णं. (15) M reads कारयेत्. (16) M reads त्रिभागं. (17) K reads पुनस्तेनैव.

जारितः सारितश्चैव पुनर्जारितसारितः[1] ।
सप्तशृङ्खलिका[2]योगात् कोटिवेधी[3] भवेद्रसः ॥ ९७ ॥
भूचरी जारणा प्रोक्ता—खेचरीं[4] जारणां शृणु ॥ ९८ ॥
हीरमुख्यानि रत्नानि[5] रसोच्छिष्टानि कारयेत् ।
कटुतुम्बस्य बीजानि तस्यार्द्धेन[6] तु दापयेत् ॥ ९९ ॥
महाजारसमायुक्तं[7] कल्कं कुर्याद्विचक्षणः ।
वज्रमूषामुखे[8] चैव तन्मध्ये स्थापयेद्रसम् ॥ १०० ॥
कतकं कनकं चैव[9]-मेकीकृत्य[10] च मर्द्दयेत् ।
पद्मरागप्रलेपेन[11] रसे ग्रासं तु दापयेत्[12] ॥ १०१ ॥
एकादशगुणं यावत् पद्मरागं तु सूतके ।
रागजीर्णस्तु[13] देवेशि लिङ्गाकारो भवेद्रसः ॥ १०२ ॥
रक्षितव्यं[14] प्रयत्नेन लोकपालाष्टकेन च[15] ।

---

(1) K has an incomplete charaṇa पुनर्जारितः. (2) K reads शृङ्खलिका. (3) K has an incorrect reading—कोटिवेधि. (4) K reads खेचरी. (5) K has an incomplete charaṇa—हीमरागानि. M has भीरसुख्यानि, which seems to be an error of the scribe. (6) M reads तस्योर्ध्वेन. (7) K reads महाजारणयद्युक्तं, which seems to be महाजारणसंयुक्तं, (8) K has वज्रमूख···खे. M has वज्रमूषासुखे. Both are inc. (9) K reads कनकं कनकं च, which is incomplete as well as tautological. (10) M reads मिलीकृत्वा, which is not grammatical. (11) K has पद्मरागं प्रयत्नेन. (12) K reads जायते. M reads रसो in lieu of रसे. (13) M reads रागचूर्णन्तु. (14) K reads रंजितव्यं. (15) K has three letters only of this charaṇa—ना······या······प्र······.

षड्भागं सूतकेन्द्रस्य तेषु सर्व्वेषु दापयेत् ॥ १०३ ॥
भक्षितव्यं प्रयत्नेन[1] नत्वा च गुरुदेवयोः ।
सर्व्वसिद्धान्नमस्कृत्य देवताश्च विशेषतः ॥ १०४ ॥
मूर्च्छाङ्गदाहश्च[2] ततो जायते[3] नात्र संशयः ।
आत्मानमुत्थितं पश्येत् दिव्यतेजो[4]महाबलम् ॥ १०५ ॥
शङ्खकाहल[5]निर्घोषैः सिद्धविद्याधरैः सह ।
इच्छया विचरेल्लोकान् कामरूपो[6] विमानगः ॥ १०६ ॥
देवाश्च[7] यत्र लीयन्ते सिद्धस्तत्रैव लीयते ॥ १०७ ॥

पुनरन्यं प्रवक्ष्यामि जारणा[8]योगमुत्तमम् ॥ १०८ ॥
सुघृष्टं पातितं[9] सूतं सर्व्वदोषोज्झितं ततः[10] ।
शाकपल्लवसारेण विष्णुक्रान्ता[11]रसेन च ॥ १०९ ॥
पलाश[12]पुष्पतोयेन भावितं गन्धकं समम् ।
समं[13] कृष्णाभ्रसत्त्वञ्च रसकञ्चाष्टकं गुणम् ॥ ११० ॥
तीक्ष्णशुल्वोरगञ्चैव कूर्म्मयन्त्रेण जारयेत् ।

---

(1) After this we find two redundant charaṇas in K, which are as follow—रसे ग्रासं तु दापयेत् । रक्षितव्यं प्रयत्नेन. (2) मूर्च्छांगदाहं च, an incorrect reading in K. मूर्च्छांदाहश्च, an incomplete reading in M. (3) K reads जायंते, which is gram. inc. (4) M reads incorrectly दिव्यतीजो. (5) K reads संखकाहल, which appears to be incorrect. (6) K reads कामरुपो. (7) K reads देवा वै. (8) K reads जारणं. (9) K has सुहष्टं पाचितं. (10) This charaṇa is wanting in K. (11) M reads विष्णुकान्त. (12) K reads पाषाश. (13) K reads सेव्यं.

काञ्चनं जारयेत् पश्चात् विड़योगेन पार्व्वति[1] ॥ १११ ॥
ततः सिद्धं[2] विजानीयात् द्वैधं[3] शुल्वस्य दापयेत् ।
कर्म्मसंख्याप्रमाणेन नागो भवति काञ्चनम् ॥ ११२ ॥
अतः परं प्रवक्ष्यामि जारणाक्रममुत्तमम् ॥ ११३ ॥
बीजचूर्णानि तैलेन भावयित्वा पुनः पुनः ।
षोड़शांशेन तद्ग्रास[4]मङ्गुल्या मर्द्दयेच्छनैः ॥ ११४ ॥
आर्द्रकादि ततो योगाद्[5]-दातव्यं षोड़शांशतः[6] ।
भूर्जे[7] दत्त्वा ततो देयं दोलायन्त्रे[8] विनिक्षिपेत् ॥ ११५ ॥
अहोरात्रेण तद्बीजं सूतको ग्रसति[9] प्रिये ।
तमुद्धृत्य[10] रसं देवि खल्ले[11] संमर्द्दयेत्ततः ॥ ११६ ॥
ततो यन्त्रे विनिक्षिप्य दिवारात्रं विड़ाग्निना[12] ।
तप्तं समुद्धृतं[13] यन्त्रात् तप्तखल्ले[14] विमर्द्दयेत् ॥ ११७ ॥
मर्द्दयित्वाभ्रके[15] पिण्डे क्षिप्त्वा तत्र पुटं ददेत् ।
ततो गर्भे पतत्याशु जारयेत् तत्[16] सुखेन तु ॥ ११८ ॥

---

(1) K reads पार्व्वती, which is not gram. correct. (2) K reads शुल्वं. (3) K reads द्वन्द्वं. (4) K reads तं ग्रासं. (5) K has योगं. (6) K has षोड़शं ततः. (7) K reads भूर्य्ये. (8) M reads डोलायन्त्रे. (9) सूतकै ग्रसते is the reading in K, which is gram. incorrect. (10) K reads समुद्धृत्य, which is not gram. correct. (11) All the MSS. spell खल्वे, which is not corroborated by any lexicon. (12) K reads दीपाग्निना, which mars the metre. (13) M reads समुद्दितं. (14) K has तदा खल्वे. (15) K reads मर्द्दयित्वा रसैः (16) This is wanting in K.

दोलायन्त्रे ततो दत्त्वा[1] आर्द्रपिण्डे नपुंसकम्[2]।
ग्राहयेद्[3]दिवसे सूतो जरते ग्रसते ततः[4] ॥ ११९ ॥
समजीर्णं ततो यावत् दोलायन्त्रविचक्षणः[5]।
पश्चात् कच्छपयन्त्रेण समजीर्णं[6] तु पार्व्वति।
तं ग्रासद्वादशांशेन[7] कच्छपेन तु जारयेत् ॥ १२० ॥
यावदार्द्रक[8]योगं च गर्भद्रावणमेव च।
पश्चात्तं[9] देवि निक्षिप्य पुटं दद्याद्विचक्षणः ॥ १२१ ॥
अष्टांशेन ततो ग्रासं गर्भद्रावञ्च पूर्व्ववत्[10]।
कन्दोदरे[11] सूरणस्य तं विनिक्षिप्य सूतकम्।
पुटेत्तु जारितस्तावत्[12] यावत् कन्दो न दह्यते[13] ॥ १२२ ॥
पादांशेन तु मूषाया[14] ग्रासः सूते[15] विधीयते।
पूर्व्ववच्च विड़ं दद्यात् गर्भद्रावणमेव च ॥ १२३ ॥
एवं[16] चतुर्गुणे जीर्णे सूतको बलवान् भवेत्।

---

(1) K reads दत्वा, which is inc. M reads डोलायन्त्रे. (2) This charana is wanting in M. (3) K has हतीय. (4) जारते ग्रसते रसः, a variant in K. (5) दोलायन्त्रेण विचक्षणः, a reading in K. M reads डोलायन्त्र. (6) K has an incomplete reading—सजीर्णं. (7) K reads ग्रासं द्वादशांशेन. (8) M reads प्रासादार्द्रक, which is not intelligible. (9) K reads यश्चाभ. M reads पश्चन्नं. Both are unintelligible. (10) M reads पूर्वकम्. (11) M reads कन्दोदके. (12) पुटयेज्जारितस्तावत्, a variant in M. (13) यावत् कंदो न ह्यत्, an incorrect variant in K. (14) मूखायां is the reading in K. (15) M reads सूतो. (16) K reads पश्चे.

ततः शलाकया ग्रासान्[1] अग्निस्थो ग्रसते रसः[2] ॥ १२४ ॥
ततो रत्नानि जार्य्याणि[3] वक्ष्यमाण[4]क्रमेण तु ॥ १२५ ॥
अभ्रकं भ्रामकञ्चैव[5] शंखनाभिं[6] तथैव च ।
रसानुपरसान् दत्त्वा[7] महाजारसमन्वितान्[8] ॥ १२६ ॥
वज्रकन्दं वज्रलता[9] मेषशृङ्गमृतायसम्[10] ।
कटुतुम्बस्य बीजानि मृतलोहानि पाचयेत्[11] ॥ १२७ ॥
सर्व्वाणि समभागानि शिखिशोणितमाचितम्[12] ।
तावत्तं मर्दयेत् प्राज्ञो यावत् कर्म्म दृढ़ं भवेत् ॥ १२८ ॥
मूषा वज्राकृतिश्चैव[13] कर्त्तव्या छादनैः सह ।
तन्मध्ये स्थापयेत् सूतम् अधोवातेन धामयेत्[14] ॥ १२९ ॥
आदौ तत्रैव दातव्यं[15] वज्रमौषधलेपितम्[16] ।
स्फुटति कोऽत्र[17] सन्देहो यथा तीव्रे हुताशने[18] ॥ १३० ॥

---

(1) K reads ग्रासम्. (2) This charaṇa is wanting in M. (3) K reads नानानि, which is gram. incorrect, the word नाना being an indeclinable. (4) K has वत्नमान. (5) K reads भामकञ्चैव. (6) M reads मुखनाभिः. (7) K has रसानुपरसा दत्वा. M has रसानवरसान्दत्वा. (8) K has महाजारणमन्वितम्. M has महाजारसमन्वितम्. (9) कंदलभा व्रच्च, an incomplete variant in K. (10) K reads मतायसं, which seems to be an error of the scribe. (11) M reads सेचयेत्. (12) शिखिशोणितसमन्वितं, a variant in K. (13) मूखा वज्राकृतीचैव, a variant in K. मूषामंत्याकृतिश्चैव, a variant in M. (14) M reads वयोवातेन धारयेत्. (15) K has आदौ तावत् प्रदातव्यं. (16) K reads लेपनं. (17) K reads नात्र. (18) यथापूर्वं हुताशनं, a variant in K.

कुलिशेन पुटे दग्धे[1] कर्षांग्नौ[2] तेन मर्दयेत् ।
यावदेकादशगुणं कुलिशं[3] जारयेत् पुनः ॥ १३१ ॥
सुदग्धशंखनाभिश्च[4] मातुलुङ्गरसप्लुतः[5] ।
मुक्ताफलं[6] ततो देयं वज्रजीर्णे तु सूतके[7] ॥ १३२ ॥
अनेन क्रमयोगेन ह्येकादशगुणं[8] भवेत् ।
केवलं शिखिपित्तञ्च[9] नीली[10]निर्य्यासमिश्रितम् ॥ १३३ ॥
नीलोत्पलानि[11] लिप्तानि प्रक्षिप्तानि तु सूतके[12] ।
रसे कल्पेन्महारागान् हीनरागान् परित्यजेत्[13] ॥ १३४ ॥
रक्तानि शिखिपित्तञ्च[14] महारत्न[15]समन्वितम् ।
सद्रत्नं[16] लेपयेत्तेन प्रद्रवेत्[17] रसमध्यतः ॥ १३५ ॥
रजनीं चैव कुष्ठं च[18] ब्रह्मनिर्य्यासभावितम् ।
जारणं पुष्परागस्य तेनैव सह दापयेत् ॥ १३६ ॥

---

(1) कुलसारिपुटे दग्धे, a variant in K. कुलिशनिपुटेदग्धे, a variant in M. (2) K reads कर्षांग्नि. (3) K reads कुलीशं. (4) K has नाभिस्तु. M has सुदग्धं शंखनाभिश्च. (5) M reads रसप्लुतम्. (6) M has मुक्तापलं. (7) वज्रमते सुजीर्णके, a variant in K. (8) K reads एकादशगुणं. (9) M reads पित्तं तु. (10) K has निलि. M has नीलि. (11) K reads निलिमधानि, which is unintelligible. (12) K reads भूतले. (13) In lieu of this hemistich, K has अनेन क्रमयोगेन एकादशगुणं भवेत्. (14) K has an incomplete charana रक्ता शिखिपित्तं च. (15) K reads महारत्नं, which seems to be incorrect. (16) K has सरक्त (without any suffix.) (17) प्रक्षिपेत् is the reading in K. (18) रजनी चैव क्रमुकी, a variant in M.

बहुरत्नेषु[1] जीर्णेषु भृङ्गरागेषु[2] सुव्रते ।
रसेन्द्रो दृश्यते देवि नीलपीतारुणच्छविः ॥ १३७ ॥
शुद्धानि हेमपत्राणि शतांशेन तु लेपयेत्[3] ।
पुटेन मारयेदेतदिन्द्रगोपनिभं[4] भवेत् ॥ १३८ ॥
संस्पर्शाद्वेधयेत्सर्व्वमिदं हेम मृतं[5] प्रिये ।
त्रिभागं सूतकेन्द्रस्य तेनैव सह सारयेत् ॥ १३९ ॥
मूषामध्यस्थिते[6] तस्मिन् पुनस्तेनैव जारयेत् ।
धूमवेधी भवेद्देवि पुनः सारितजारितः[7] ॥ १४० ॥
अनेन क्रमयोगेन यदि जीर्णा त्रिशृङ्खला[8] ।
वेधयेन्नात्र[9] सन्देहो गिरिपाताल[10]भूतलम् ॥ १४१ ॥
पार्श्वज्योतिः[11] प्रहृश्येत चोर्द्धं[12] नैव तु दृश्यते ।
भूचरं तं विजानीयात् रसेन्द्रं[13] नात्र संशयः ॥ १४२ ॥
तेनाश्रान्तगतिर्देवि[14] योजनानां शतं व्रजेत् ।
दिव्यतेजा[15] महाकायो दिव्यदृष्टि[16]र्महाबलः ॥ १४३ ॥

---

(1) K reads बज्ररत्नेषु. (2) K reads भृङ्गराजेषु. (3) शतांशेनानुलेपयेत्, an incorrect variant in K. (4) K reads नीभं, which is unusual. (5) मदं हेम तं is an incomplete reading in K. (6) K has मूखामध्ये स्थिते. (7) पुन: सारितसारित:, a variant in M. (8) K reads त्रिसंकला. (9) वैधयेनात्र is an incorrect reading in K. (10) K reads पाषाण. M reads भूतल:, which is gram. inc. (11) K has an incomplete reading पा⋯⋯ज्याति. (12) K reads ऊर्ध्वं. (13) M reads रसेन्द्रो, which is inc. (14) K reads गतिं देवि. M reads तेनाश्रागमतिर्देवि. (15) K has दिव्यतेजो. (16) K reads दिव्या दृष्टि.

सर्व्वरोगविनिर्मुक्तो जीवेदाचन्द्रतारकम्[1] ।
लक्ष्य मूत्रपुरीषं तु सर्व्वलोहानि विध्यति ॥ १४४ ॥
समजीर्णेन वज्रेण हेम्ना च सहितेन च ।
अग्निस्थो जारयेल्लोहान्[2] बन्धमायाति सूतकः ॥ १४५ ॥
सारयेत्तेन वीजेन सहस्रमपि[3] वेधयेत् ।
सारितं जारयेत्[4] पश्चात् लेप्यं क्षेप्यं सहस्रशः[5] ॥ १४६ ॥
सारयेत्[6] तेन वीजेन लक्षवेधमवाप्नुयात् ।
अनेन क्रमयोगेन कोटिवेधी भवेद्रसः ॥ १४७ ॥
केवलं तु यदा वज्रं समजीर्णं तु जारयेत् ।
बद्धः[7] सूतस्तदा ज्ञेयो निष्कम्पो निरुपद्रवः ॥ १४८ ॥[8]
अग्निस्थो जायते सूतः शलाकां[9] ग्रसते क्षणात् ।
हठाग्निना धाम्यमानो[10] ग्रसते सर्व्वमादरात्[11] ॥ १४९ ॥
चरति जरति सूत[12] आयुर्द्रव्य[13]प्रदायकः ।

---

(1) जीवेच्चंद्रार्कतारकं, a variant in K. (2) K reads जारयेल्लोहं. M reads जायते लोहात्. (3) समस्तमपि is the reading in K. (4) K reads जारितं. (5) लेप्ये क्षेप्यं सहस्रशः, a variant in K. लेप्यं क्षिप्रसहस्रतः, a variant in M. [For the explanation of लेप्य and क्षेप्य vide रस.सु. Chap. VIII. v. 80.] (6) K reads सासयेत्, which seems to be incorrect. M reads धारयेत्. (7) B reads बद्ध (without विसर्ग). (8) This śloka is not found in M. (9) M reads शलाका. (10) B and M have धाम्यमाने. K has हठाग्निधाम्यमानेन. None appears to be gram. correct. (11) M has सर्वपारदात्. (12) जरते जरते सूत, a variant in B. रसते जारते सूते, a variant in K. (13) B reads आयुर्द्रव्यः, which is incorrect.

मूषास्थं धमयेत्[1] सूतं हठाग्नौ नैव कम्पते[2] ॥ १५० ॥
जारयेत् सर्व्वरत्नानि बद्धः[3] खेचरतां[4] नयेत् ।
इति[5] लोहेऽष्टगुणिते[6] जीर्णे स्याद्रसबन्धनम् ॥ १५१ ॥
लोहानि सत्त्वं त्रिगुणं द्विगुणं[7] कनकं तथा ।
धूमावलोकवेधी[8] स्यात् भवेन्निर्वाणदो रसः[9] ॥ १५२ ॥
आदावष्टगुणं जार्य्यं व्योमसत्त्वं महारसम्[10] ।
समं हेमदशांशेन वज्ररत्नानि जारयेत् ॥ १५३ ॥
सर्व्वं[11] च जारयेद्वज्रं तदासौ[12] खेचरो रसः ।
भ्रमेत् प्रदक्षिणावर्त्तः कोटिवेधी च जायते ॥ १५४ ॥
समे तु पन्नगे जीर्णे दशवेधी भवेद्रसः ।
द्विगुणे शतवेधी स्यात् त्रिगुणे तु सहस्रकम्[13] ॥ १५५ ॥
चतुर्गुणेऽयुतं[14] देवि क्रमेणानेन[15] वर्द्धयेत् ।

---

(1) K reads धमते. M reads धामयेत्. (2) B has नैव कल्पते. M has वावकम्पते. (3) M reads बद्ध. (4) K reads खचरतां. (5) The portion commencing from इति and ending in जारयेत् (153) is not found in K; only the following portion is found after भवेद्रसः (155),—गुणोता जीर्णे स्याद्रसबंधनं लोहसत्त्वं त्रिगुण त्रिगुणकनकं तथा ४९ धमलोहकवेधी स्याद्भवेन्निर्वाददो रसः । M reads इष्ट in lieu of इति. (6) B reads गुणोता, which is inc. (7) M reads त्रिगुणं. (8) धूमलोहकवेधी is the reading in B. (9) B reads वरः. (10) Two slokas are wanting in B, beginning from this word. (11) K reads समं. (12) M reads तथासौ. (13) सहस्रं च त्रिसंगुणे, a variant in B. सहस्रं तु चतुर्गुणे, a variant in K. (14) K reads पंचगुणेऽयुतं. (15) K reads incompletely क्रमेणाने वर्धयेत्.

उत्तरोत्तरवृद्धत्र तु[1] जारयेत्[2] तत्र पन्नगम् ॥ १५६ ॥
कुटिलं पन्नगं जार्य्यं तत्र[3] संख्याक्रमेण तु ।
तद्वादमेति देवेशि[4] कोटिवेधी भवेद्रसः ॥ १५७ ॥
करुणा दानवेन्द्रेण[5] भक्षितो भस्मसूतकः[6] ।
जारितं द्वादशगुणं[7] यत्र तीक्ष्णं सुरेश्वरि ॥ १५८ ॥
भक्षयित्वा[8] पलैकं तु दानवो बलदर्पितः ।
जगदुत्पाटितं[9] तेन कैलासोऽपि च चूर्णितः[10] ॥ १५९ ॥
तत्र मया चर्णं ध्यात्वा[11] दृष्टा तन्मायया कृतम्[12] ।
जारितं पन्नगे सूतं[13] समांशं शिलया हतम्[14] ॥ १६० ॥
तेन सूतेन संलिप्तं त्रिशूलं हिमशैलजे[15] ।
तेन शूलेन निहतो दानवो बलदर्पितः ॥ १६१ ॥

---

(1) M has उत्तरोत्तरवृद्धार्थं. (2) B reads जायते. (3) B reads जावतेऽत्र. (4) तत्वातिमेतु देवेशि, a variant in B. दत्वा तु······देवि is an incomplete variant in K. (5) K reads दानवेनापि. M reads क्रूरिणा दानवेन्द्रेण. (6) K reads भक्ष्यपूतकः, which is evidently the error of the scribe. M reads सूतकम्. (7) K has वा दशगुणं. M has जारितद्वादशगुणं. (8) M reads रचयित्वा. (9) B reads जगदुत्प्लावितं. K reads जगदुत्प्लावितं, which is not intelligible. (10) कैलासमपि चालितः, an incorrect variant in K. (11) तत्र काले मयातुल्ला, a variant in B. तद्वचिकाद्वममयं, a variant in M. Both the readings are unintelligible. (12) B reads महद्दृश मायया कृतं. K reads हतं. M reads कृत्वा दृष्टा मायया कृतम्, which mars the metre. (13) K reads पन्नगे सूतैः. M reads पन्नगं सूतं. (14) M reads सह. (15) B reads रसवे जले. K reads शूलयूरसि शैलजे. M reads रसवज्जलम्.

हेम शुल्वं[1] तथा तीक्ष्णं वाजरं च पडालकम्[2] ।
रोहणं कान्तलोहं च[3] जारयेत्तत्त्वसंख्यया ॥ १६२ ॥
एकैके[4] रसराजोऽयं बद्ध:[5] खेचरतां नयेत्[6] ।
गन्धनागे द्रुतिं[7] देवि जारणां सुकरां शृणु[8] ॥ १६३ ॥
आदौ[9] संशोधितं सूतं रजनीचूर्णसंयुतम्[10] ।
मर्दयेद्यावदाकृष्णं[11] क्षालयेदुष्णकाञ्जिकैः ॥ १६४ ॥
एवं मुहुर्मुहुर्घृष्टो गन्धनागो द्रुतिं चरेत्[12] ॥ १६५ ॥
नागस्य मूत्रे[13] देवेशि वत्सस्य माहिषस्य वा[14] ।
आवर्त्यावर्त्य भुजगं[15] सप्त वारान् निषिञ्चयेत्[16] ॥ १६६ ॥

---

(1) B. reads रामशुल्वं. K reads समशुल्वं. (2) वाजरं च पटालगं, a variant in B. नारसत्वं पडालगं, a variant in K. [Vide ante 7th Paṭala, v. 107.] (3) Both B and M read काञ्चिलोहं च. (4) K reads एकैक (without any suffix). (5) M reads बद्ध, which is incorrect. (6) B reads नयम्, which is inc. (7) B has गंधनागे द्रुतं. K has गंधानागद्रुतं. M has गन्धनागद्रुते. (8) कुरुपां भ्रण, an incorrect reading in B. कुरया शृणु, a reading in K, which has no sense. (9) M reads अथ. (10) रंजनीचूर्णसंयुतं, a variant in K. रजनीचूर्णमिश्रितम्, a variant in M. (11) B reads यावदोक्रष्णं, which seems to be the error of the scribe. (12) गंधनागद्रुतिं चरेत्, a variant in B. गंधनागद्रुतिं वरे, a variant in K. Both the texts are inc. (13) K reads सूत्र, which is not correct. M reads नरस्य मूत्रे. (14) M has च. (15) B reads तजगं, which is incorrect. आवर्त्यावर्त्तनं नागं, a variant in K. (16) B reads सप्तवारं. K reads सप्तवारं निशिचयेत्, wherein the last term is incorrect.

कृत्वा[1] कण्टकविध्यानि तस्य पत्राणि सुन्दरि ।
चतुर्थांशप्रमाणेन[2] गन्धकस्य तु योजयेत् ॥ १६७ ॥
प्रसार्य लाक्षापटलं[3] रोमाणि[4] तदनन्तरम् ।
ऊर्द्धं गन्धकचूर्णं च[5] ततो नागदलं तथा[6] ॥ १६८ ॥
गन्धकं नरलोमानि लाक्षायाः पटलं[7] क्रमात् ।
ऊर्द्धं प्रसार्य संस्थाप्य[8] सूत्रैर्वर्त्तिं[9] तु कारयेत् ॥ १६९ ॥
करञ्जतल[10]मध्ये तु दशरात्रं निधापयेत्[11] ।
दीप्ताग्रभागां तां वर्त्तिं[12] संडश्या तु विधारयेत्[13] ॥१७०॥
तां द्रुतिं पातयेत् पात्रे सौवीरटङ्कणान्विते[14] ।

---

(1) K reads एवं. (2) B reads चतुर्थांशप्रमाणेन. M reads चतुर्थांशे प्रमाणेन. Both are incorrect. (3) B reads लाक्षापट्टं, which seems to be the error of the scribe. (4) B reads रोमाणि, which is inc. M reads रामाणि, which is also inc. (5) B reads गंधकचूर्णं च. K reads तु. M reads ऊर्ध्वं. (6) नागादलत्वथ, an incorrect reading in B. K reads त्वथा, which is inc. (7) B has लक्षायाः. M has पाटलं. Both the readings are inc. (8) This charaṇa and the next are wanting in K. M reads सञ्स्थाप्य instead of संस्थाप्य. (9) B has सूत्रै वर्त्तिं. (10) K reads कारंजतैल. (11) K has नियोजयेत्. M has दशरात्रेण दापयेत्. (12) B reads वा वर्त्तिं. K reads दीप्तमग्रगतां वर्त्तिं. M reads दीप्तौ ग्रयाया तावर्त्तिं, which is unintelligible. (13) संडस्या तु विधारयेत्, a variant in B. संडंस्य तु विधारयेत्, a variant in K. तस्याथ विविधारयेत, a variant in M. (14) सौचोद्वटिकान्विते, an incomplete reading in B. सौवीरषटिकान्विते, a reading in M.

काचकूप्यांश[1] मध्ये तु तत्तैलं स्थापयेत् प्रिये[2] ॥ १७१ ॥
कृत्वा गोस्तनमूषायां[3] लिप्तायां शिलया रसम् ।
चतुःषष्ठ्यादिभागेन[4] ज्ञात्वा देवि बलाबलम् ॥ १७२ ॥
गन्धनागद्रुतिं दत्त्वा तां मूषां सुरवन्दिते[5] ।
गर्त्ते गोमयसंपूर्णे विन्यस्य पुटपाचनम् ।
दद्यात् करीषतुषयोः[6] प्रसृतिद्वितयेन च[7] ॥ १७३ ॥
दद्यादजीर्णशंकायां[8] सिद्धवज्रीरसस्य तु[9] ।
चतुर्बिन्दून् पुटे[10] प्राग्वद्देवं[11] प्रतिदिनं भवेत् ॥ १७४ ॥
जारणात्रिगुणात् सूतो[12] भवेज्जम्बूफलप्रभः[13] ॥ १७५ ॥
माक्षिकं सत्त्वमल्पाल्पं मृतनागसमन्वितम् ।
मूषागतं भवेद्यावत्[14] काचं[15] दत्त्वाधरोत्तरम् ।

---

(1) Both B and K read काचकूपस्य. (2) K reads पुनः. (3) B has गोस्तनमूषायां. K has गोस्तनमूखायां. (4) B reads पातेन. (5) K reads तु मुखमुद्रिते. (6) करीषुतुषये, an incorrect reading in B. करीषतुषयोः, a reading in M, which seems to be the error of the scribe. (7) प्रसृतिर्द्वितयेन वा, a variant in K, which is gram. inc. M has प्रसृत instead of प्रसृति. (8) B reads संकायां, which is gram. incorrect. (9) K reads शौंहवज्रीरसेनं तु. M reads सिद्धवज्रीरसस्य तु. (10) B and K read चतुर्बिंदुपुटे. (11) K has प्राग्वद्देयं, which has no sense. (12) जारणा त्रिगुणा सूतो, a variant in B. जारणाद्विगुणे सूतो, a variant in M. (13) भवेजंबूफलं प्रभः, an incorrect reading in B. (14) भवेद्ग्रासं, a reading in B. भवेद्द्रुतं, a reading in K. (15) The word काचं is not found in K.

एवं द्वादशवारांस्तु[1] सुध्मातं रञ्जितं[2] भवेत् ॥ १७६ ॥
तेन पक्वं बीजचूर्णं पारदे पादभागिकम्[3] ।
मर्दितं चणकाम्लेन चीर्णाद्गर्भद्रुतिर्भवेत्[4] ॥ १७७ ॥
गर्भद्रुतिर्न चेद्देवि[5] वर्णिकाद्वयगन्धयोः[6] ।
रक्तसिन्धूद्भवालकं[7] टङ्कणाशुगपुंखतः[8] ।
कल्केन लिप्तं पुटितं[9] बीजं गर्भे द्रुतं[10] भवेत् ॥ १७८ ॥
बीजे पादार्द्ध[11]तुल्यांशे जीर्णे वेधं करोति सः ।
दशषोड़शभागेन द्वाविंशांशेन[12] च क्रमात् ॥ १७९ ॥
संयोज्य त्रिगुणां रीतिं[13] तारे तारावशेषितैः[14] ।

(1) K reads द्वादशवारैस्तु. M reads द्वादशवारस्तु, which is incorrect. (2) B reads रजतं. K reads रंजनं. (3) B reads पारभागिकं. M reads पारदं बीजभागिकम्. (4) B has गर्भे द्रुतिर्भवेत्. K has an incomplete text—चणाद्गर्भवेत्. (5) गर्भद्रुतिर्भवेद्देवि, a variant in K, which is partly incorrect. (6) K has वानकाद्वयगंधयोः. M has यन्त्रिकागधगन्धयोः. Both seem to be inc. (7) रक्तसिंधूभवालकं, an incorrect variant in B. सुसैंधवयालाकं, a variant in K. रक्तसिद्धिभयालकं, a variant in M. (8) B reads पूङ्खतः. M reads कङ्काशरपुङ्खतः. (9) M has खल्वे न लिप्तं घुटितं, which seems to be inc. (10) B reads गर्भद्रुतिं. K reads बीजगर्भे द्रुतं. M reads बीजगर्भद्रुतं. All are, gram. inc. (11) B reads पादार्थं, which is not correct. (12) B reads द्वाविंशांशेन. (13) The portion beginning from this charana and ending in मनःशिलां (vs. 180 & 181) is wanting in B. M reads त्रिगुणं, which is gram. inc. (14) K reads तारावशेषितं.

तारारिष्टमिदं लिप्ता[1] तेन सूतेन वेधयेत् ॥ १८० ॥

अतः परन्तु संस्कारं[2] वक्ष्ये नागाभ्रजारणम् ।
करवीरारुणां[3] देवि चूर्णयित्वा मनःशिलाम् ॥ १८१ ॥
भावयेद्विंशतिं वारान्[4] यवचिञ्चारसेन तु ।
तेन कल्केन संलिप्य नागपत्रं प्रयत्नतः[5] ।
कर्ष्वनलेन[6] विपचेत् यावत्तत् चूर्णितं भवेत् ॥ १८२ ॥
रसकस्य च भागांस्त्रीन्[7] भागैकं दरदस्य च[8] ।
पेषयेन्मातुलुङ्गेन पादगन्धं[9] शिलाविषम् ॥ १८३ ॥
कल्केनानेन लिप्तायां[10] मूषायां[11] पुटपाचितम् ।
तं नागं धमयेद्देवं[12] सप्तधा हेमवद्भवेत् ॥ १८४ ॥
पीताभ्रकं त्वेकदलं[13] लिप्तायां[14] मरिचेन तु ।
मूषायां ध्मातमग्न्याभं सौभाञ्जनरसे[15] क्षिपेत् ॥ १८५ ॥

---

(1) तारारीष्टमिदं लिप्त, a variant in K. (2) K reads सुलभं. (3) K reads करवीरारुणं, which is incorrect. (4) K reads विंशति-वारं. M reads विंशतीन् वारान्, which is inc. (5) K reads संलिप्तं नागपत्रं प्रवर्त्तते. (6) B reads कर्षानलेन. K reads कर्षानलने. M reads कर्षानलेन. [But the real word is कर्ष् + अनल = कर्ष्वनल = करीषाग्नि. Vide ante कर्ष्वग्नौ, v. 131.] (7) B reads भागास्त्रीन्. K reads रसकस्य तु भास्त्रीन्. M reads रसकस्य चतुर्भागाः. All the readings are incorrect. (8) M has त्रिभागे कन्दरस्य च. (9) B reads पादगंध. K reads पादगंध. (10) M reads लिप्तायाः. (11) K reads मूखायां, which is incorrect. M reads मूषायाः. (12) K reads धमयेद्देय, which is inc. (13) त्वेक-दलौ is the reading in M. (14) M reads लिप्तायां, which is gram. inc. (15) B reads सौतोऽञ्जनरसे.

पातयेत् पूर्व्वविधिना तत् सत्त्वं हेमभासुरम्[1] ॥ १८६ ॥
एवं रञ्जितनागस्य सत्त्वं पीताभ्रकस्य च[2] ।
स्रोस्तन्यकाचधूमोत्थ[3]-गुञ्जायस्कान्तटङ्कणैः ।
तुल्येन संयुतैर्नैतन्नागाभ्रं[4] इन्धितं[5] भवेत् ॥ १८७ ॥
क्षिंवारनाल[6]सिद्धार्थ-धूमसारेष्टकागुडैः[7] ।
मर्दयेत्त्रिदिनं सूतं[8] दोलायां[9] स्वेदयेत् त्र्यहम् ॥ १८८ ॥
पुनर्नवामेषशृङ्गी-सर्पाक्षीकल्कसंयुतम् ।
अथासुरी[10]सिन्धुविषं मरिचैः परिपेषितैः[11] ।
दोलायन्त्रे पुनरपि[12] स्वेदयेद्दिवसत्रयम्[13] ॥ १८९ ॥
अष्टमांशेन नागाभ्रं चारयित्वा[14] सुरेश्वरि ।
शिलाभागद्वयं चैकं सिन्धुसौवर्च्चलं[15] भवेत् ॥ १९० ॥
टङ्कार्द्धं विषपादञ्च[16] विड़ः पिण्डाष्टमांशतः[17] ।

---

(1) तत् सत्त्वं हेमभास्वरम्, a variant in M. (2) K reads तु. (3) B reads धूमोत्थं. K reads धूमोथ. M reads धमंाथं. All the texts appear to be incorrect. (4) B has संयुतैरेतन्नागाभ्रं. M has सिन्धुजैरेतैर्नागाभ्र. (5) K reads बंधितं. (6) M reads क्षिप्वारनाल. (7) धूमसारेष्टिकागुड़ः, a variant in K. धूमसारेष्टकाङ्गुणैः, a variant in M. (8) K has an incorrect reading—मर्दयेत् त्रिदिनं भूतं. (9) M reads डोलायां. (10) B reads अथासुरि. (11) मरीचैः परिवेष्टितैः, a variant in M. (12) दोलायन्त्रेण च रसं, a variant in K. M reads डोलायन्त्रे. (13) B has an incorrect reading—स्वेदयेद्दीवसं त्रयं. (14) K reads जारयित्वा. (15) B has सिन्धुसोवर्चलात्. (16) K reads टङ्कणार्धविषं पादः. (17) M has विड़पिण्डाऽष्टमांशकम्, which seems to be incorrect.

त्रिदिने[1] कच्छपे जार्य्यमेवं[2] जार्य्यन्तु षड्गुणम्[3] ॥ १८१ ॥
शैलं तुत्थोरगं[4] ताम्रं तीक्ष्णघोषारकाञ्चनम्[5] ।
क्रमवृद्धमिदं तुल्यं ताप्यसत्त्वनिपातनात्[6] ॥ १८२ ॥
हेमावशेषं तद्वीजं पादांशं[7] मातुलाश्मना ।
चारयेद्रसराजस्य जारयेत् कनकान्वितैः[8] ॥ १८३ ॥
ताप्यसौवर्चलशिला-गन्धकासीस[9]टङ्कणैः ।
पद्मयन्त्रे[10] निवेश्याथ कोलं दत्त्वा सुरेश्वरि ॥ १८४ ॥
घर्मेह्निनवयं[11] मन्दं यावद्वीजं द्रुतं[12] भवेत् ।
तमेव समजीर्णन्तु[13] वह्नौ निष्कम्पनं रसम्[14] ॥ १८५ ॥
ततः षड्गुण[15]वीजेन सारणा[16]क्रमयोगतः ।
तारारिष्टमहिं शुल्वं[17] सहस्रांशेन वेधयेत् ॥ १८६ ॥
विषगन्धकताप्याभ्र[18]-काकविष्ठा घनध्वनिः ।

---

(1) K reads त्रिदिनं. (2) B reads मेंव. M reads मेव. (3) K has षट्रसं. (4) K reads शैलं तुत्थारजः. M reads शैलं दुत्थारगं. (5) तीक्ष्णघोषारकक्रमात्, a variant in B. (6) Both K and M read निवापनात्. रस.स. says "निर्वापणं पातनसंज्ञमुक्तम्" Chap. VIII. v. 60. (7) K reads पंचांशे. (8) K reads कन्ययान्वितैः. (9) K reads काशीस. (10) K reads पद्मपत्रे. (11) K reads erroneously घमेदिनत्रयं. (12) B reads erroneously द्रुतं. (13) B has सजीर्णं तु, which is defective. K has समजीर्णं तु. (14) K reads निः-कंपितं रसं. निष्कृपनं रयः is the reading in M, which is unintelligible. (15) K reads षट्गुण. (16) The letter क्र is wanting in K. (17) B reads महिशुल्वं. K reads तारारीष्टमहिशुल्वं. (18) B reads ताप्यभ्र. K reads ताप्योभ्रं. M reads तालाभ्र.

सहदेवी वा[1]ऽग्निशिला कल्केन क्रमते रसः[2] ॥ १९७ ॥

मूर्च्छितो मृतसूतश्च[3] जलूकाबन्ध एव च[4] ।
चतुर्थो मूर्त्तिबन्धस्तु[5] पट्टबन्धस्तु[6] पञ्चमः ।
भस्मसूतश्च खोटश्च संस्कारात्[7] सप्तधा रसः ॥ १९८ ॥
नागवर्णो[8] भवेत् सूतं विहाय घनचापलम् ।
लक्षणं दृश्यते यस्य मूर्च्छितं तं वदन्ति हि ॥ १९९ ॥
आर्द्रत्वञ्च घनत्वञ्च[9] तेजोगौरवचापलम्[10] ।
यस्यैतानि न दृश्यन्ते[11] तं विद्यान्मृतसूतकम्[12] ॥ २०० ॥
नानावर्णं तथा स्वच्छं[13] द्रुतं योनौ जलूकवत्[14] ।
बध्यते[15] सूतकं यत्र[16] जलूकाबन्ध[17]लक्षणम् ॥ २०१ ॥

---

(1) The letter वा is wanting in B. (2) B reads रसं. (3) B reads मृतसूतस्य, which is incorrect. M reads मृतसूरश्च, which is evidently an error of the scribe. (4) B reads बन्धमेव च, which is incorrect. (5) B and K read मूर्त्तिबद्धस्तु. (6) K reads पटबद्धश्च. (7) M reads घोटश्च संस्काराः. (8) B and K read नानावर्णं. (9) आर्द्रत्वं चपलत्वं च, a variant in K. M reads आद्यत्वञ्च, which seems to be inc. (10) M reads चापलः, which is gram. inc. (11) रसस्यैतानि दृश्यन्ते, a variant in M, which conveys just the opposite sense. (12) विद्यात्तं मृतसूतकं, a variant in K. तं विन्द्यान्मृतसूतकम्, a variant in M. (13) B reads सूच्छं, which appears to be inc. (14) B has द्रुतं योनौ, which is inc. K has यौनौ पातकवत्, which seems to be incorrect. M has योन, which is also inc. (15) B reads वर्द्धन्ते, which is inc. K reads बर्द्धते. (16) K reads यावत्. Another reading is सूतको यत्र. (17) K reads जलूकाबद्ध.

गुरुत्वमरुणत्वञ्च[1] तेजसा सूर्य्यसन्निभम् ।
शिखिमध्ये धृतं[2] तिष्ठेत् मूर्त्तिबन्धस्य[3] लक्षणम् ॥ २०२ ॥
शलाकाजारणाद्वापि[4] मूर्त्तिबन्धत्वमिष्यते ॥ २०३ ॥
श्वेतं पीतं गुरु तथा मृदु सिक्थक[5]सन्निभम् ।
अग्निमध्ये यदा[6] तिष्ठेत् पट्टबन्धस्य[7] लक्षणम् ॥ २०४ ॥[8]
कृष्णं श्वेतं तथा पीतं[9] नीलं[10] भस्मनिभं तथा ।
चपलत्वं यदा[11] नष्टं भस्मसूतस्य[12] लक्षणम् ॥ २०५ ॥
कुक्कुटाण्डनिभं[13] सूतं यदा लवणभेदि च[14] ।
आवर्त्तते[15] रसस्तद्वत् खोटकस्य च[16] लक्षणम् ॥ २०६ ॥
अथवा छेदने स्निग्धं[17] रश्मिना मृदुना द्रवेत् ।

---

(1) K has गुरुत्वं मरणत्वं च, which is incorrect. (2) B reads ध्रुवं. M reads द्रुतं. (3) K reads मूर्त्तिबद्धस्य. (4) This charaṇa and the next are not found in K. M reads शलाकाधारणाद्वापि. (5) B reads सिक्थक. M reads सिद्धक. (6) M reads यथा. (7) B has पटबद्धस्य here; but it has mentioned पट्टबन्ध in the 198th śloka. (8) This śloka is not found in K. (9) B reads रक्तपीतं instead of पीतं, which mars the metre. K reads भेदिश्वेतं instead of कृष्णं श्वेतं. M reads कृष्णश्वेतं. (10) M reads नील (without any suffix). (11) M reads यथा. (12) B and M read भस्मसूतक. (13) B has an erroneous reading—कुक्कुटांगंडभिन्नं. (14) K reads लवणसैंधवं. M reads लक्षणभेदि च. Another reading is पटु भेदि भवेद्यदा. (15) K and M read आवर्त्तितं. Another reading is आवर्ज्जितं पुनस्तद्वत्. (16) B reads खोटबद्धस्य. M reads चोटबन्धस्य. (17) B reads स्निग्ध.

अक्षयं कठिनं श्वेतं[1] खोटबन्धस्य लक्षणम् ॥ २०७ ॥[2]
खोटादयस्तु ये पञ्च[3] विहाय जलुकाकृति[4] ।
हठाग्नौ धामिताः सन्ति[5] न तिष्ठत्येव[6] मूर्च्छितः ॥२०८॥
तरुणादित्यसंकाशो नानावर्णः[7] सुरेश्वरि ।
वेधयेद्देहलोहानि रञ्जितो रसभैरवः ॥ २०९ ॥
शोधनं सूतकस्यादौ ग्रासमानमतः परम् ।
जारणं व्योमसत्त्वस्य सर्व्वसत्त्वस्य[8] जारणम् ॥ २१० ॥
गर्भवाह्यद्रुतिः पश्चात् सुवर्णस्य तु जारणम् ।
दिव्यौषधिपुटः[9] पश्चात् रत्नबन्धमतः परम्[10] ॥ २११ ॥
रञ्जनञ्च ततो देवि जारणा चानुसारणा[11] ।
क्रामणञ्च ततो देयं[12] सूतकस्य विचक्षणैः ॥ २१२ ॥
एवं क्रमं तु यो वेत्ति तस्य सिद्धिर्न संशयः ॥ २१३ ॥

---

(1) B reads कठिनश्वेतं. (2) This śloka is not found in M. (3) खाटायदेस्तु ये पंच, a variant in K. खोटादिय,स्तु ये पञ्च, a variant in M. Both the readings are incorrect. (4) विहाया जलुकाकृतिः, a variant in K. विहाया जुलुकाकृतिः, a variant in M. Both of them are incorrect. (5) हठाग्नौ धामिताऽसंति, an erroneous reading in B. अग्नौ धामितः, an incomplete reading in K. हंसाग्नौ धामितस्त्सन्धिः, a reading of unintelligible sense. (6) K reads संतिष्ठत्येव, which is just the opposite in sense. (7) B reads नानवर्णं. (8) K reads सर्वं सत्वस्य, which is inc. (9) B reads पुटं. K reads दिव्यौषधीपुटे. M reads दिव्यौषधपुटः. (10) K reads रत्नबद्धमतः परं. M reads रत्नबन्धमतः परम्. (11) K reads चानुसारणात्. M reads जारणाद्यानुजारणौ. Both seem to be inc. (2) K reads क्रामणन्तु. M reads देयः, which is gram. inc.

वेधकं यस्तु जानाति[1] देहे लोहे[2] रसायने ।
तस्य जन्म[3] जरा व्याधिर्नश्यत्येव न संशयः ॥ २१४ ॥
देहे तु पञ्चरत्नानि[4] नागं वङ्गं तथायसम्[5] ।
क्रामणं रसराजस्य भेषजं व्याधिनाशनम्[6] ॥ २१५ ॥
औषधैः[7] क्रमते सूतो योगशक्तिक्रमेण[8] तु ।
क्रमते[9] व्याधिसंघातं ग्रसते दुष्टमामयम् ॥ २१६ ॥
तस्य तु क्रामणं ज्ञात्वा[10] ततो वैद्यैरुपाचरेत्[11] ।
क्रामणेन विना सूतो न क्रमेत्[12] न च वेधयेत् ।
देहलोहामयान् सर्व्वान्[13] तथा स्यात् केवलं[14] श्रमः ॥२१७
यस्य रोगस्य यो योग[15]स्तेनैव सह[16] योजयेत् ।
रसेन्द्रो हरति व्याधीन्[17] नरकुञ्जरवाजिनाम् ॥ २१८ ॥

---

(1) वेधकं यो न विजानाति, a variant in B, wherein न is incorrect. (2) M reads देहदहे, which is incorrect. (3) The word जन्म is not found in B. (4) B reads दहे, which is inc. M reads पञ्चरत्नाणि, which is also inc. (5) नागवंगं तथायसे, a variant in M. (6) B has व्याधिनाशने. (7) K reads औषधिः. (8) B has योगसुक्ति-क्रमेण. M has याग उक्तः क्रमेण. (9) M reads क्रामतो, which appears to be inc. (10) B reads तस्मात्. K reads क्रामणां. M reads तत्तत् क्रामणकं वाद्य. (11) वैद्यैरुपाचयेत्, a reading in B. (12) B reads क्रामेत्. K reads कार्य्यां. (13) K has देहलोहमयान् संघान्. M reads देवलोहमयान् सर्वान्. (14) K reads केवलः. M has रसः स्यात् केवलाश्रयः. (15) M reads यो योगैः, which is gram. inc. (16) K reads स instead of सह. (17) B reads व्याधिं. K reads हरते व्याधिं.

आरोटी बलमाधत्ते[1] मूर्च्छितो व्याधिनाशनः ।
बद्धेन खेचरोसिद्धिः[2] मारितेनाजरामरः[3] ॥ २१९ ॥
विशेषाद्व्याधि[4]शमनो गन्धकेन तु[5] मूर्च्छितः ।
ओषध्या घातितः[6] सूतो यथा भूयो[7] न जीवति ॥ २२० ॥
सहि क्रामति लोहेषु[8] तेन[9] कुर्य्याद्रसायनम् ।
तन्ममाचक्ष्व देवेशि किमन्यच्छ्रोतुमिच्छसि[10] ॥ २२१ ॥

इति श्रीपार्व्वतीपरमेश्वरसंवादे[11]
रसार्णवे रससंहितायां
बालजारणो नाम[12]
एकादशः पटलः ॥११॥

---

(1) K reads अरोगे. M reads आढ़ो चपलंमाधत्ते, which is senseless. [For the explanation of आरोट vide रस.स. Chap. XI. v. 60.] (2) बद्धस्तु खेचरीसिद्धिं, a variant in K. बन्धेन खेचरीसिद्धिः, a variant in M. (3) मारितेन जरामरः, a reading in B and M. मारीतेनाजरामरं, a reading in K. Both the readings seem to be incorrect. (4) B reads विशेषाव्याधि. K reads विशेषव्याधि. (5) The letter तु is not found in K. (6) K has औषध्या पातितः. M has आषध्ये (without any suffix). (7) M reads पतेद्भूयो. (8) स सहि क्रमति लोहेषु, a variant in B, wherein the first स is redundant. K reads देहेषु. (9) K reads न instead of तेन. (10) K reads मर्हसि. (11) This is wanting in B and M. (12) B, K and M read बालजारणं नाम ; but this is not strictly correct.

## द्वादशः पटलः ।

श्रीदेव्युवाच ।[1]

ओषधी[2] कीदृशी नाथ रसमूर्च्छाकरी शुभा ।
केन वा भस्मसूतः[3] स्यात् केन वा खोटबन्धनम्[4] ॥ १ ॥

श्रीभैरव उवाच[5] ।

शृणु भैरवि यत्नेन[6] रहस्यं रसबन्धनम् ।
ब्रह्मविष्णुसुरेन्द्राद्यै[7]र्न ज्ञातं वीरवन्दिते[8] ॥ २ ॥
गङ्गायमुनयोर्मध्ये प्रयोगो नाम[9] राक्षसः ।
तस्यासने[10] वरारोहे क्षणाद्बध्येत[11] सूतकः ॥ ३ ॥
निशाचरस्य पत्राणि[12] गृह्णीयात् साधकोत्तमः[13] ।
अधो निष्पीड़ितं[14] देवि रसो[15] भवति चोत्तमः ॥ ४ ॥

---

(1) This is wanting in M. (2) K reads औषधी. M reads औषधीः, which is gram. incorrect. (3) K reads सूतभस्म. (4) K reads बंधनः, which is incorrect. M reads कोट्टबनम्, which is senseless. (5) M reads only भैरवः. (6) B reads शृणु देवि प्रयत्नेन. (7) K has महेंद्राद्यै. M has शिविन्द्राद्यै. (8) अज्ञातं सुरवन्दिते, a variant in M. (9) K reads प्रयोग नाम. M reads प्रायोगो नाम. (10) K has तस्यासन्ने. This charana and the next are wanting in M. (11) K reads erroneously क्षणाद्बध्येद. (12) K reads पत्रास्नि, which is incorrect. (13) M reads सायकात्तमः, which is absurd. (14) B reads चर्ती. K reads निपिड़ितं, which is inc. M reads निष्पीड्यति. (15) M has रासो, which is not correct.

रसं संमर्द्य[1] तेनैव दिनानि त्रीणि वार्त्तिकः[2]।
आरोटं[3] बन्धयेत् क्षिप्रं गगनं तत्र जारयेत् ॥ ५ ॥
तेन[4] पत्ररसेनैव साधयेद्गगनं पुनः।
सप्तधा भावितं तेन त्रूषणेन[5] सद्वैकतः।
यन्त्रे विद्याधरे देवि गगनं तत्र जारयेत् ॥ ६ ॥
मासमात्रेण देवेशि[6] जीर्य्यति तत् समं समे[7]।
समजीर्णे रसे देवि शतवेधी भवेद्रसः ॥ ७ ॥[8]
निशाचररसे देवि गन्धकं भावयेत्ततः।
भावयेत् सप्तवारं तु द्विपद्यास्य[9] रसेन तु ॥ ८ ॥
तारस्य पत्रलेपेन[10] अर्द्धार्द्धकाञ्चनोत्तमम्[11]।
गन्धके समजीर्णेऽस्मिन्[12] शतवेधी रसो भवेत्[13] ॥ ६ ॥

---

(1) B reads समर्प, which is gram. incorrect. (2) M reads वाम्मिकः, which is evidently an error of the scribe. (3) K reads आखिटं. (4) The following three hemistichs commencing from तेन are wanting in K. (5) M reads त्रुषणेन. (6) मासमात्र तु देवीशी, an incorrect variant in M. (7) जीयते तु समे सम, a variant in B. जिर्णोति तत् समे समः, a variant in K. जीयते तु समं समे, a variant in M. (8) This hemistich is not found in M. (9) K reads द्विपद्यास्य. M reads द्विवद्यास्य. Both the readings are inc. [The first seems to be द्विपाद्यास्य; and the second द्विपद्यास्य. द्विपा=द्विपदी=द्विपादिका=नागकेसरवृक्ष.] (10) तारस्यपत्रलेपेन, an incorrect variant in K. M reads पत्रलेशेन, which is not correct. (11) B reads कांचनोत्तमः. K reads कांचनोपमं. M reads अर्धार्ध काञ्चिकोत्तमम. (12) M reads समजिर्णेऽस्मिन्, which is inc. (13) M reads भवेद्रसः.

पुनस्तं गन्धकं दत्त्वा पत्रलेपे रविं हरेत्[1] ।
तं रविं तारमध्ये तु त्रिगुणं वाहयेत्ततः[2] ॥ १० ॥
हेमार्द्धं मिलितं[3] हेम मातृकासमतां व्रजेत्[4] ।
पुनस्तं गन्धकं साक्षाद्द्रावयित्वा द्रुतं[5] कुरु ॥ ११ ॥
रसेन्द्रं[6] मर्द्दयेत्तेन गतदेहं तु[7] कारयेत् ।
लेपमात्रेण तेनैव कुष्ठानष्टादश[8] प्रिये ।
अर्शों भगन्दरं लूतां[9] शिरोरोगांश्च[10] नाशयेत् ॥ १२ ॥
निशाचररसे भाव्यं[11] सप्तवारं तु[12] तालकम् ।
तेनैव घातयेद्वङ्गं[13] वङ्गं तारे[14] तु निर्वहेत् ॥ १३ ॥

---

(1) B has हनेत्, which is gram. incorrect. K has रवौ हते. M has पत्रलेपरविं. (2) वाहये ततः, an incorrect reading in B. (3) K reads मीलित, which is inc. M reads हेमार्धे, which is also incorrect. (4) K reads मातृकासमतां. M reads erroneously मावकासमतां व्रजेत्. (5) B reads द्रुतं. K reads द्रुतं. M reads हुतं. We have adopted the reading in D (Deccan MS.) which begins from this charaṇa, the previous portion of the text being wanting. (6) D reads रसकं. (7) B reads गतदेहं. M reads गतदेहान्. Both are inc. (8) कुष्ठाष्टादशान् प्रिये and कुष्ठमष्टादशन् पिये are incorrect readings in K and M respectively. (9) अर्शं भगंदरं भूता, an incorrect variant in K. अर्शों भगन्धरस्भूतौ, a variant in M, which seems to be inc. (10) Both D and M read शिरोरोगश्च. (11) B has निशाचरे रसे. D has भाव्ये. (12) B reads सप्तवारः तु, which is gram. incorrect. (13) K reads वाहयेद्वंगं. M reads पातयेत् चगं. (14) B and M read वंगतारे. D and K read तारये निर्वहेत् परं.

तं तारं जारयेत्[1] सूते तत्सूतं बन्धनं व्रजेत्[2] ।
लेपमात्रेण तेनैव चतुःषष्टितमो भवेत् ॥ १४ ॥[3]
चतुःषष्टितमे[4] भागे शुल्ववेधं[5] तु दापयेत् ।
शुल्वं तु दापयेत्तारे तत्तारं काञ्चनं भवेत् ।[6]
तत्तारं जायते श्रेष्ठं[7] धर्मकामार्थमोक्षदम् ॥ १५ ॥
निशाचरस्य पुष्पाणि[8] सूक्ष्मचूर्णानि कारयेत्[9] ।
पलानि[10] दश चूर्णस्य रसैर्धात्र्यास्तु भावयेत्[11] ॥ १६ ॥
घृतेन मधुनालोड्य[12] नवभाण्डे[13] विनिक्षिपेत् ।
धान्यराशौ निधातव्यं त्रिसप्ताहं सुरेश्वरि ॥ १७ ॥
तेन भक्षितमात्रेण वलीपलितवर्जितः[14] ॥ १८ ॥

---

(1) D and K read भावयेत्. (2) D and K read बंधनं भवेत्. M reads बन्धनं व्रजेत्. (3) This hemistich is wanting in B and M. (4) This hemistich is wanting in D. K reads चतुष्षष्टितमो, which is incorrect. (5) K reads शुल्वे वेधं. (6) This hemistich is wanting in B and M. (7) M reads जारयेच्छ्रेष्ठं, which seems to be inc. (8) All other texts read पत्राणि; but M only reads पुष्पाणि. We suppose the latter to be correct; since पत्राणि is already mentioned in verse 4. (9) चूर्णितानि तु कारयेत्, a variant in D. चूर्णानि कारयेत्ततः, a variant in K. (10) M reads फलानि, which is incorrect. (11) त्रिरात्र्या यस्तु भावयेत्, a variant in D. अर्द्धरात्र्यास्तु भावयेत्, a variant in K. द्रवैर्धात्र्या विभावयेत्, a variant in M. (12) B reads मधुनालाढ्य. K reads मधुनालीढ्. Both are inc. (13) B reads नवभागं. D reads न च भाण्डे. (14) K reads निर्जरं, which is not correct.

वल्कलं सूक्ष्मचूर्णं[1] तु मधुना सहितं[2] लिहेत् ।
अर्द्धमासप्रयोगेण[3] प्रत्यक्षोऽयं[4] भवेत् प्रिये ॥ १९ ॥
तस्य मूत्रपुरीषेण शुल्वं भवति काञ्चनम् ।
मासमात्रप्रयोगेण पन्नगः[5] काञ्चनं भवेत् ॥ २० ॥
ग्राह्यं[6] तत्फलतैलं वा[7] यन्त्रे पातालसंज्ञके[8] ।
तेन तैलेन देवेशि रसं संकोचयेद्बुधः ॥ २१ ॥
तत्क्षणाज्जायते देवि[9] पट्टबद्धो महारसः[10] ॥ २२ ॥
कटुकं कङ्कणं कार्य्यं[11] रसलिङ्गे वरानने[12] ।
संकोच्य मारणं[13] तेन कर्त्तव्यं परमाद्भुतम्[14] ॥ २३ ॥
निशाचररसे क्षिप्तं सप्तवारं तु भास्करम् ।

---

(1) D reads सूक्ष्मचूर्ण. (2) D reads सहीतं, [perhaps समितं = सशर्करं.] M reads साधितं. (3) अर्धमासि वयोन, an incorrect reading in D. (4) B and K read प्रत्ययोऽयं. D reads प्रत्ययोग्यं, which is inc. (5) M reads पन्नगं. The MS. B is wanting about 250 ślokas from this (20th) śloka. (6) M reads ग्राह्यं, which is not accurate here. (7) D, which begins from this portion, reads erroneously तत्फुलतैलञ्च. K reads तत्फलतैलेन. M reads तत्फलं तैलेन. (8) M reads संमिते. (9) तत्क्षणादेव जायन्ते, a variant in M. (10) D wants the term महा. K reads खाटबद्धो महारसः. M reads पट्टबन्धो महारसः. (11) D has an absurd reading—करक क्षङ्ग सां कार्य्यं. M reads कटकं instead of कटुकं. (12) D reads रसलिङ्गं. K reads रसलिङ्गं परायणे. M reads रसलिङ्गेश्वराननैः. (13) K reads संकोचमारसं. M reads संकाचमारणं. (14) D reads परमहृतम्. M reads erroneously परमत्यतम्.

कालिकारहितं तेन जायते[1] कनकप्रभम् ॥ २४ ॥
तत्तारेण समं वाह्यं[2] तेन सिक्तं तु वापितम्।
दशांशं वेधयेत्[3] सूतं दश पीतं शतेन च[4] ॥ २५ ॥
शतं वेधयते लक्षं सहस्रं कोटिवेधकम्।
दशांशं कोटिवेधि[5] स्यात् कोटिवेधि समेन च[6] ॥ २६ ॥
पुनरन्यं प्रवक्ष्यामि रसबन्धं सुदुर्लभम्[7] ॥ २७ ॥
त्रैलोक्यजननी या स्यादोषधी[8] अजनायिका[9]।
तस्याः सम्पर्कमात्रेण[10] बद्धस्तिष्ठति पारदः ॥ २८ ॥
सप्ताहं मर्दितस्तस्या[11] महौषध्या रसेन सः[12]।
शतांशेनैव वेधेन[13] कुरुते दिव्यकाञ्चनम्[14] ॥ २९ ॥
द्विसप्ताहं रसे तस्या मर्दनाद्वरवर्णिनि[15]।

---

(1) M has कालिकां, which is a tautology. (2) D reads सवाह्य, which is incorrect and incomplete. M reads वाह्यं. (3) M reads तथा वेधयेत्. (4) D reads रसेन वै. K reads रसेन च. (5) All the texts read कोटिवेधी, which is not gram. correct. (6) M reads तु. (7) तु दुर्लभं is the reading in D. (8) D and K have या सा औषधी. M has यस्यादोषधी, which is inc. (9) D reads अज-नयिका. K reads अंजनायिका. M reads अङ्गनायिकम्. (10) तथा संस्पृष्टमात्रेण, a variant in M. (11) M has सप्ताहोमर्दितं तस्या, wherein मर्दितं is inc. (12) महौषधिरसेन सः, a variant in K. M reads महौ-षध्या रसे रसः. (13) D reads विधेन. M reads शतांशेन तु वेधेन. (14) D reads दिव्यकाञ्चनः, which is inc. (15) D reads वरवर्णिनी, which is gram. inc. K reads द्विरवार्णिनि, which is unintelligible.

लक्षवेधो रसः साक्षादष्टौ[1] लोहानि काञ्चनम्[2] ॥ ३० ॥
त्रिसप्ताहेन देवेशि दशलक्षाणि विध्यति[3] ।
चतुर्थे चैव[4] सप्ताहे कोटिवेधी महारसः ॥ ३१ ॥
स्वेदतापननिर्घृष्टो[5] महौषध्या रसेन तु ।
ददाति खेचरीं सिद्धिमनिवारितगोचरः[6] ॥ ३२ ॥
कामयेत् कामिनीनां तु सहस्रं दिवसान्तरे ।
नष्टच्छायो ह्यदृश्यश्च[7] त्रैलोक्यं च भ्रमेद्रसैः[8] ॥ ३३ ॥
महौषध्या रसेनैव[9] मृतसञ्जीवनं[10] भवेत् ।
अनेन घातयेत्[11] सूतं पश्चावस्थं[12] कुरु प्रिये ॥ ३४ ॥
मृतस्य दापयेन्नस्यं[13] हस्तपादौ तु[14] मर्दयेत् ।
तस्य तु प्रविशेज्जीवो[15] मृतस्यापि वरानने ॥ ३५ ॥

---

(1) D reads साक्षाद्दृष्टो. (2) M reads विध्यते. (3) D reads वेधयेत्. दश लक्षा स विंधति, an incorrect reading in K. (4) D reads जैव, which is inc. (5) स्वेदतापननिर्घृष्टो, a variant in D. स्वेदनापननिर्घृष्टो, a variant in K. स्वेदतापरिकर्षेण, a variant in M. None is correct. (6) मनाचरितगोचरः, a variant in D. मणिवारितगोचराः, a variant in K. Both are gram. inc. (7) K has नष्टच्छाया तद्रसस्य. M has नष्टच्छायाच्चाट्टश्यश्च. (8) K reads भमेद्रसः. त्रैलोक्य भवेद्रसैः, an incomplete variant in M. (9) K reads रसे चैव. (10) D has मृतसंजीविनं. K has मृते संजीवनं. (11) K reads पातयेत्. (12) D reads पश्चावश्यं. M reads वश्चावस्तं, which seems to be inc. (13) D reads दापयेत्तस्य. K reads दापयेत्तस्यं. Both are incorrect. (14) M reads हस्तपादेषु. (15) K reads नस्येन in place of तस्य तु. M reads प्रविशन् जीवो.

पुनरन्यं प्रवक्ष्यामि रसबन्धं सुदुर्लभम्[1] ।
नरसाररसेनैव[2] क्षणाद्[3]बध्येत सूतकः[4] ॥ २६ ॥
नरसाररसं दत्त्वा[5] द्विपदीरजसा सह[6] ।
दिनान्ते बन्धमायाति[7] सर्व्वलोहानि रञ्जयेत्[8] ॥ २७ ॥
नरसाररसेनैव[9] जीर्णं षड्गुणपन्नगे[10] ।
तारे ताम्रेऽपि वा देवि[11] भावयेत्तं मनःशिलाम्[12] ॥२८॥
निर्गन्धा जायते सा तु[13] घातयेत्तद्रसायनम्[14] ।
द्विपदीरजसा सार्द्धं[15] निःसत्त्वः पन्नगो भवेत्[16] ॥ २९ ॥

---

(1) M reads वरानने. (2) D reads नरकरसारसस्पर्शनि. K reads नरकारस्य पर्शेण. M reads नरकसारसदर्शनेन. All the readings seem to be incorrect. [नरसार has different designations in different texts ;—as नरकसा and नरकसार.] (3) D reads क्षुण्णाद. (4) M reads सुतकम्. (5) नरकसाररसे दत्वा, a variant in D. नरकसाररसं दत्वा, a variant in K. नरकसारसं दत्वा, a variant in M. (6) D reads सहि, which seems to be the error of the scribe. (7) M reads बद्धमायाति, which is incorrect. (8) D reads रञ्जति. K reads रंजति. (9) D and K read नरकसाररसेनैव. (10) जीर्णः षड्गुणपन्नगः, a variant in D. This charaṇa and the next are wanting in M. (11) तारताम्रेऽपि वा देवी, an incorrect variant in D. (12) K reads भावयेत्रा, which seems to be incorrect. M reads भावयेत्तु मनःशिलाः. (13) K has यायसे, which is incorrect. M reads घातुः. (14) पातयेतेन पन्नगं, a variant in K. घातयत्रेन पन्नगम्, a variant in M. (15) D has द्विपदीश्वसया सार्धं. M has साधु. (16) D reads निःशत्त्वपन्नगो भवेत्. K has an incomplete reading— निःसत्वपन्नगं. M has निरुद्धं पन्नगो भवेत्, which is not correct.

नरसाररसेनैव[1] जीर्णे षड्गुणपन्नगे[2] ।
तारे ताम्रेऽपि वा देवि[3] कोटिवेधी भवेद्रसः ॥ ४० ॥
नरसाररसस्तन्ये भावनाः[4] सप्तधा पृथक् ।
रसेन्द्रं दापयेद्ग्रासं[5] यन्त्रे विद्याधराह्वये ॥ ४१ ॥
जीर्यते[6] गगनं देवि निर्मुखं च[7] वरानने ।
नरसाररसेनैव[8] कीटमारीरसेन च[9] ।
द्रावयेद्गगनं देवि[10] तीक्ष्णं लोहञ्च पन्नगम् ॥ ४२ ॥
नरसाररसेनैव हनूमत्या रसेन च ।
जायते काञ्चनं[11] दिव्यं निषेकाद्[12]भास्करप्रिये ॥ ४३ ॥
नरसाररसे दत्त्वा[13] मञ्जिष्ठारक्तचन्दनम्[14] ।

---

(1) D and K read नरकसाररसेनैव. M reads नरकसाररसेनैव. (2) जीर्णषड्गुणपन्नगः, a variant in D. (3) This hemistich and the next are wanting in M. D reads erroneously देवी. (4) D has नरकसारसारसास्तन्ये भावितः, which mars the metre. K has नरकसाररसस्तन्ये. (5) रसेन्द्रे पाययेद्ग्रासं, a variant in D. रसेन्द्रो दापयेत् ग्रासं, a variant in K. रसेन्द्रे दापयेत् ग्रासं, a variant in M. (6) D reads जीयते, which has no sense. (7) D reads निमुखं च. (8) D and K read नरकसाररसेनैव. M reads नरकसाररसेनैव. (9) सिन्धुगुत्पाररसेन च, a reading in D. सिंहतुसाररसेन च, a reading in K. (10) This charaṇa and the next three are wanting in D and K. (11) D reads लायते काञ्चनं. M reads कनकं. (12) M reads निषिक्ताद्. (13) नरकसाररसे दत्त्वा, a;variant in D and M. नरकसारसं दत्वा, a variant in K. (14) The MS. M has the following hemistich after चन्दनं— तारे ताम्रेऽपि वा देवि कोटिवेधी भवेद्रसः, which we have not adopted as it seems to us redundant.

स्वरसे मर्द्दयेत् पश्चात्[1] पन्नगं देवि सेचयेत् ॥ ४४ ॥
तत्क्षणात् काञ्चनं दिव्यं सप्तवारं निषेचितम्[2]।
रविष्टष्टं तु[3] तं देवि पन्नगं त्रिगुणं प्रिये ॥ ४५ ॥
तच्छुल्वं[4] हेमसंकाशं तारपञ्चांश[5]योजितम्।
अष्टमांशयुतं हेम[6] हेमकर्म्मणि चौषधम्[7] ॥ ४६ ॥
नरसाररसे[8] भाव्यं सप्तवारं तु हिङ्गुलम्।
तेनैव घातयेत्तीक्ष्णं[9] भस्मीभूतत्वमादिशेत्[10] ॥ ४७ ॥
तद्भस्म ताम्रपिष्टं तु[11] त्रिगुणं तेन निर्वहेत् ॥ ४८ ॥
तच्छुल्वं हेमसंकाशं तारमष्टांश[12]योजितम्।

---

(1) D reads स्वरसी. M reads मर्द्दयन्याश्च, which is incorrect. (2) K and M read निषेवितं. (3) K reads रविपृष्टे तु, which is incorrect. M reads रविष्टष्टे तु, which is grammatically incorrect. (4) K reads तच्छस्त्, which is incorrect. M reads तत् शुल्व, (without any suffix), which is gram. incorrect. (5) D and K read तारं पञ्चाश, which seems to be inaccurate. (6) This word is wanting in K. (7) हेमकर्म्मणिरौषधम्, a variant in M. (8) D reads नरकसाररसे. K reads नरकसाररसे. M reads नरकसाररसैः. (9) तेनै तीक्ष्ण घातये, an incorrect variant in D. K has तापयेत्तीक्ष्णं. M reads घातयेत् सूक्ष्मं. (10) K reads मादिशेत्. M reads भस्मभूतत्वमाङ्जेत्, which is incorrect. (11) D reads ताम्रविष्टं तु. K reads ताम्रपिष्टं तु. M reads ताम्रपृष्ठे तु. (12) M reads तारे चाष्टांश.

तारहेम[1] समांशं तु[2] द्विगुणं पित्तलं[3] भवेत् ॥ ४९ ॥
नरसाररसे भाव्यं[4] रसकं[5] सप्तवारतः ।
तं रसं[6] रसकं चैव तीक्ष्णं लोहं च[7] पन्नगम् ।
नरसाररसेनैव[8] तेनैवैकत्र मर्दयेत्[9] ।
तत्क्षणाज्जायते बन्धो[10] रसस्य रसकस्य च ॥ ५० ॥
तीक्ष्णं नागं[11] तथा शुल्वं रसकेन[12] तु रञ्जयेत् ।
समस्तं[13] जायते हेम कुष्माण्डकुसुमप्रभम्[14] ॥ ५१ ॥
पुनरन्यं प्रवक्ष्यामि रसबन्धं सुदुर्लभम्[15] ॥ ५२ ॥

---

(1) D has तारहेम. K has तारे हेम. M has तारं हेम. (2) Both D and M read erroneously शमांशं तु and शमांसन्तु respectively. (3) K has द्विवारं दग्नवर्णं प्रजायते सतितं, which is absurd. M has विवर्णं पतितं. (4) नरकसाररसरसे भाव्यं, a variant in D. नरकसाररसे भाव्यं, a variant in K. This charana is wanting in M. (5) K reads नरकं. M reads रसेन्द्रं. (6) D reads नरसं. This charana and the next three are not found in M. (7) D has तीक्ष्णं पन्नोहं च, which is inc. K has तीक्ष्णलोहं च. (8) D and K read नरकसाररसेनैव. (9) तेनैकत्र विमर्दयेत्, a variant in K. (10) K and M read बद्धो, which is gram. incorrect. (11) M reads तीक्ष्णनागं. (12) D reads रसैकेन, which seems to be an error of the scribe. (13) M reads हवितस, which is unintelligible. (14) हेम कुष्माण्डकप्रभम्, a variant in D. त्वमार्यं कुसुमप्रभम्, a variant in M, wherein the first term is incorrect. (15) D reads बद्धं सुदुर्लभं. This hemistich and the next are wanting in K.

कंकालखेचरी नाम ओषधी परमेश्वरि[1]।
तस्यास्तैलं तु संगृह्य[2] माषखेचरि[3]संयुतम्।
भावयेत्[4] दिनमेकन्तु पात्रे भास्करनिर्म्मिते॥ ५३॥
द्वितीये वासरे प्राप्ते[5] वज्ररत्नं[6] तु घातयेत्।
अनले धामयेत्तत् तु[7] सुतप्तज्वलनप्रभम्[8]॥ ५४॥
कंकाल[9]खेचरीतैले वज्ररत्नं निषेचयेत्[10]।
दशवारं[11] निषिक्तं तु भस्माकारं हि[12] जायते॥ ५५॥
तद्धेमपक्वबीजं तु[13] तेन भस्मसमं कुरु[14]।
त्रिभागं[15] टङ्कणं दत्त्वा अन्धमूषागतं[16] धमेत्।
तत्क्षणान्मिलति द्वन्द्वं[17] वज्ररत्नं च[18] काञ्चनम्॥ ५६॥

---

(1) D reads परमेश्वरी. M reads औषधी: Both are incorrect. (2) This charaṇa and the next three are wanting in D. K reads संग्राह्य, which is not correct. (3) M reads अस्यखेचरि. (4) K reads स्थापयेत्. (5) D reads प्राप्तं. M reads द्वितीयवासरे. (6) K reads वज्रं रत्नं. (7) M reads यामयवन्तु, which is senseless. (8) सुतप्त' त्वनलप्रभम्, a variant in D. युतप्रज्वलनप्रभम्, a variant in K. सन्तप्त-ज्वलनप्रभम्, a variant in M. (9) K reads कंकोल. (10) वज्ररत्नानि वेधयेत्, a variant in D. (11) K reads द्वष्टावारं, which is incorrect. (12) D reads तु. (13) तद्धेमेत् पक्वबीजं तु, a variant in D. (14) D has तेचन्द्रेन भस्मसमम् कुरु, wherein the first part seems to be incorrect. (15) M reads erroneously त्रभाट'. (16) K reads अंधमूखागतं (where ख = ष). (17) D reads वद्द', which has no clear sense. (18) D and K have तु.

चन्द्रहेम[1] वरारोहे समं जारयति यदि ।
कोटिवेधी रसो देवि[2] लोहान्यष्टौ च विध्यति[3] ॥ ५७ ॥
पुनरन्यं प्रवक्ष्यामि रसबन्धं[4] सुदुर्लभम् ॥ ५८ ॥
सबीजा चौषधी ग्राह्या[5] काचिद्रुमलता[6] प्रिये ।
मन्त्रसिंहासनी नाम द्वितीया देवि खेचरी[7] ।
पातालयन्त्रे तत्तैलं गृह्णीयात्ताम्रभाजने[8] ॥ ५९ ॥
तस्य तैलस्य मध्ये तु प्रक्षिपेत् खेचरीरसम्[9] ।
मेदिनी[10]यन्त्रमध्ये तु स्थापयेत्तु[11] वरानने ॥ ६० ॥
पूर्वौषध्या तु तद्देवि[12] गगनं मेदिनीतले[13] ।
रसग्रासं[14] ततो दत्त्वा मर्द्दनात्[15] गोलकं[16] कुरु ॥ ६१ ॥

---

(1) K reads चन्द्रे हैम. (2) D reads देवी, which is incorrect. (3) D reads वेधति. M has लोहाष्टौ च विविद्धति. (4) D has रसबद्धं, which is grammatically incorrect. (5) सबीजमौषधी ग्राह्य, an incorrect variant in D. सबीज औषधी ग्राह्या, a variant in K. सबजा चौषधी ग्राह्या, an incorrect variant in M. (6) D reads किंचित्. K reads किंचित् द्रुमलता. (7) D reads द्वतिया देवि खेचरी, wherein the first term is incorrect. K reads द्वतीया दिवि खेचरी, which is partly incorrect. (8) M reads ताम्रभाजनम्, which is not correct. (9) क्षिपेद्वेत् खेचरी-रस:, a variant in D, which is partly incorrect. (10) D reads मेदनी. (11) M reads स्थापयित्वा. (12) पूर्वस्याध्या तु तं देवी, a variant in D. पूर्वौषध्यन्तु तद्देवि, a variant in M. Both seem to be incorrect. (13) D reads मेदिनिजले. K reads मेदिनितले. M reads मेदिनीजलम्. (14) M reads erroneously ससैग्रासं. (15) D reads मर्द्देन्. (16) M reads लाङ्कं.

बद्धा[1] पोटलिकां[2] तेन गगनं तेन जारयेत्[3] ।
समे[4] तु गगने जीर्णे बद्धस्तिष्ठति सूतकः ॥ ६२ ॥
भस्त्रा[5]फूत्कारयुक्तेन[6] धाम्यमानेन नश्यति[7] ।
काकविष्ठासमं रूपं समजीर्णस्य जायते[8] ॥ ६३ ॥
द्विगुणे गगने जीर्णे अष्टौ लोहानि संहरेत् ॥ ६४ ॥
पुनरन्यं प्रवच्यामि रसबन्धं सुदुर्लभम् ॥ ६५ ॥[9]
शिवदेहात् समुत्पन्ना ओषधी तुरसिंहनो[10] ।
जारयेद्गन्धकं सा तु[11] जारयेत् सापि तालकम्[12] ॥ ६६ ॥
काञ्चनं जारयेत् सापि[13] रसेन्द्रं सा च बद्धयेत्[14] ।
प्रवालं जारयेत् सा तु[15] गगनं द्रावयेत् तथा[16] ।

---

(1) This is wanting in D. (2) M reads पट्टलिकां. (3) भागं तं तेन जारयेत्, a variant in D. M reads चारयेत्. (4) D reads समं. (5) D has भस्म, which is not accurate. (6) M has भाल्कारणात् यन्त्रेण, which is absurd. (7) D reads सस्यति. K reads घास्यति. (8) D reads जारयेत्. M reads समं जीर्णस्य. (9) This hemistich and the next are not found in D. (10) K reads औषधी. M reads तडुरीडरी. (11) We do not find गन्धकं सा तु in K. (12) M has सालयेत् सा पटालकम्. The portion beginning from this charaṇa and ending in वज्रञ्च घातयेत् सा तु is not found in K. (13) D has जारयेश्चापि, which is an error of the scribe. (14) रसेन्द्रस्यापि बन्धनात्, a variant in D. (15) D reads भावयेत्यासु, which seems to be भावयत्याशु. (16) M reads ततः.

वज्रञ्च घातयेत् सा तु[1] सर्व्वसत्त्वं च[2] पातयेत् ॥ ६७ ॥
( जारयेत् सर्व्वलोहानि सत्त्वान्यपि च पाचयेत् । )[3]
हरींदरीरसे न्यस्य[4] गोशृङ्गे तु वरानने ।
धान्यराशौ निधातव्यं मृतं तिष्ठति सूतकम्[5] ॥ ६८ ॥
दिव्यौषध्या रसेनैव[6] रसेन्द्रः सुरवन्दिते[7] ।
समे तु कनके जीर्णे दशकोटीस्तु[8] वेधयेत् ॥ ६९ ॥
पञ्चमे लक्षकोटिस्तु[9] षड्गुणे स्पर्शवेधकः[10] ।
सप्तमे धूमवेधी स्यात् अष्टमे त्ववलोकतः[11] ।
नवमे शब्दवेधी स्या[12]दत ऊर्द्ध्वं[13] न विद्यते ॥ ७० ॥

---

(1) वज्रं तु घातयेत् षा तु, a variant in D, wherein षा is incorrect. (2) D reads तु. (3) We have got this hemistich only in K, which we have printed within brackets. (4) हरद्रीरारसे न्यस्य, a variant in K. इन्द्रिरीरसमन्यस्य, a variant in M. (5) मृतस्तिष्ठति सूतकः, a variant in D. मृततिश्ठति सूतकः, a variant in K. द्रुतं तिष्ठति सूतकम्, a variant in M. We have adopted the above after collating all the texts. (6) दिव्यौषधिरसेनैव, a variant in M. (7) D reads रसेन्द्रो सुरवन्दिने, which is grammatically incorrect. K reads रसेद्रो, which is also incorrect. M reads रसेन्द्रं. (8) K has दशकोटि तु. M has दशकोटिस्तु. (9) K has लक्षकोटि तु. M has लक्षकोटौ तु. (10) D reads स्यात् स वेधयेत्. (11) D reads त्ववलोकितः. M reads त्वेवलोकतः. (12) D has नवमे दशमे वेधौ स्यात्, which mars the metre and the sense. (13) K reads दत्तो द्रुति, which is not correct.

भ्रमन्ति पशवो मूढ़ाः[1] कुलौषधिविवर्ज्जिताः[2] ।
तृणौषधि[3]रसानाञ्च नैव सिद्धिः प्रजायते ॥ ७१ ॥
तस्मात् सर्व्वप्रयत्नेन ज्ञातव्या तु कुलौषधी[4] ॥ ७२ ॥
दिव्यौषधी चतुःषष्टिः[5] कुलमध्ये व्यवस्थिता[6] ।
नैव जानन्ति मूढ़ास्ते[7] देवमोहेन[8] मोहिताः ॥ ७३ ॥
अदिव्यास्तु तृणौषध्यो[9] जायन्ते[10] गिरिगह्वरे ॥ ७४ ॥
तृणौषध्या रसे सूतं[11] नैव बद्धं कदाचन[12] ।

---

(1) D reads भ्रमन्ति पश्च मे मूढ़ा. K reads भ्रमंती पशवो मूढ़ाः, wherein the first term is inc. (2) कुलौषधीविवर्जिताः, a variant in D. (3) D has वसौषधी. K has तृणौषधी. M has वीर्य्यौषधि. (4) D reads erroneously ज्ञातव्यो तु कुलौषधीः. K reads also incorrectly ज्ञातव्यास्तु कुलौषधीः. M reads ज्ञातव्या तु कुलौषधीः, which is incorrect. (5). दिव्यौषधीश्चतुःषष्टी, a variant in D and K, which is incorrect. M reads दिव्यौषधि चतुष्षष्टि, which is also incorrect. (6) K reads व्यवस्थिताः, which is not correct. M reads कुलमध्ये which is incorrect. (7) नैव जाति मूढ़ा सा, a variant in D. K reads नैव जानाति मूढ़ास्ते, which is grammatically incorrect. M reads नैव जानन्ति मूढ़ास्तान्. (8) D and K read erroneously शिवमायैव, which ought to be शिवमाययैव. (9) D has आदीव्यास्तु वनौषध्या, which is grammatically incorrect. M has also an incorrect variant—आदिव्यास्तु तृणौषद्धो. (10) D reads जायते, which is incorrect. (11) D has वणौषधीरसे सूतं. तृणाषद्या विद्धोनास्ते, a variant in M. Both are incorrect. (12) K reads बंधं, which is incorrect. गगनं जारयन्ति ते, a variant in M.

षट्त्रयं च[1] वरारोहे वह्निमध्ये न[2] तिष्ठति ॥ ७५ ॥
न खोटो नैव वाहस्तु नैव द्रव्यं करोति सः ।
किं तत् द्रव्यं प्रकुर्व्वीत धाम्यमानो न तिष्ठति ॥ ७६ ॥[3]
पत्रे पाके कटे छेदे[4] नैव तिष्ठति काञ्चने[5] ।
न वेधं च शतादूर्द्ध्वं[6] करोति स रसः[7] प्रिये ॥ ७७ ॥
यावन्न बद्धमेकन्तु[8] विक्रीतं तत्तु काञ्चनम् ।[9]
धर्म्मार्थकाममोक्षार्थं[10] नैव दद्यात्तु तत् प्रिये ॥ ७८ ॥

श्रीदेव्युवाच ।

निर्जीवत्वं[11] गतः सूतः कथं जीवं ददाति च[12] ।
निर्जीवेन तु निर्जीवः कथं जीवति शङ्कर ॥ ७९ ॥

श्रीभैरव उवाच ।[13]

दिव्यौषध्या यदा[14] देवि रसेन्द्रो मूर्च्छितो[15] भवेत् ।

---

(1) D reads षट्त्रयं न. M reads स रसस्तु. (2) M reads च. (3) This śloka is found only in M. (4) पत्रे वा पक्वकं छेदा, a variant in D. पत्रे दाहे निकषे च, a variant in M. (5) नैव तिष्ठति काञ्चनम्, a variant in D. छेदने नैव काञ्चने, a variant in M. (6) च is wanting in D. च शता is wanting in K. M reads शितादूर्द्ध्वं, which is not correct. (7) D has an absurd reading स्वं करोति रसमुः. (8) M reads यावन्न बाद्धमेकन्तु. (9) This hemistich is not found in K. (10) D reads मोक्षार्थां, which is incorrect. (11) D reads निर्जीवत्वं. K reads नर्जीवत्वं. (12) K reads सः. (13) This is wanting in M. (14) यदा is wanting in D. M reads यथा, which is incorrect. (15) M reads मर्दितो, which is grammatically incorrect.

कालिकारहितः[1] सूतस्तदा भवति[2] पार्व्वति ॥ ८० ॥
परस्य हरते कालं[3] कालिकारहितो रसः ।
अष्टानां चैव लोहानां मलं शमयति क्षणात्[4] ॥ ८१ ॥
महामूर्च्छागतं सूतं को वापि कथयेन्मृतम्[5] ।
दिव्यौषध्या रसेनैव[6] जायते नष्टचेतनः[7] ॥ ८२ ॥
पञ्चभूतात्मकः सूतस्तिष्ठत्येव[8] सदाशिवः ॥ ८३ ॥
पुनरन्यं प्रवक्ष्यामि रसबन्धनमीश्वरि[9] ॥ ८४ ॥
कपालेन हतं वज्र[10]मनेनैव तु काञ्चनम् ।
वज्रभस्म[11] हेमभस्म तद्द्वे एकत्र बन्धयेत्[12] ॥ ८५ ॥
निशाचररसे जार्य्यं नरजीवेन[13] जारयेत् ।

---

(1) K reads कालिकासहितः. M reads कालिकारहितो देवि. (2) D has कथं जीवति. M has तथा भति, which is incorrect. (3) M reads कौलं, which seems to be incorrect. (4) मलं समयति गुणान्, a variant in D, which has no clear sense. K reads नाशयति. M reads शमयते. (5) D reads वापौ, which is an error of the scribe. M reads कथयेद्रुतम्, which is partly incorrect. (6) दिव्यौषधरसेनैव, a variant in K. (7) K reads नष्टचेतसः, which is gram. inc. (8) D reads तिष्ठत्येह, which is incorrect. (9) M reads रसबन्धमहेश्वरि. (10) K reads हते वज्रं, which is incorrect. M reads कपालेन. (11) D reads वलजस्य, which has no clear sense. (12) द्वावेकत्र बन्धयेत् and त... कत्र बंधयेत्, incomplete variants in D and K respectively. तद्वामैकत्र बंद्धनम्, a variant in M. (13) K reads नरजीवेन.

तं सूतं मारयेद्वज्रे[1] गजारिदिव्यकौषधी[2] ॥ ८६ ॥
भक्षितः स रसो येन[3] सोऽपि साक्षात् सदाशिवः ।
भक्षिते तोलकैकेन[4] स्पर्शवेधी भवेन्नरः ॥ ८७ ॥
प्रस्वेदात्तस्य गात्रस्य रसराजश्च वेध्यति[5] ।
प्रस्वेदादपि मूत्रेण[6] अष्टौ लोहानि काञ्चनम् ॥ ८८ ॥
लक्षवर्षसहस्राणि[7] स जीवेत् साधकोत्तमः[8] ।
प्रजापतिः कृष्णतेजाः[9] क्षणाद्भ्राति सूतकम्[10] ॥ ८९ ॥
गजारिस्पर्शनाद्देवि[11] क्षमापालेन च बध्यते[12] ॥ ९० ॥
वज्रवल्लीरसेनैव[13] भावितं गगनं प्रिये ।
जारयेद्वालुकायन्त्रे खोटो भवति तत्क्षणात्[14] ॥ ९१ ॥

---

(1) D has मारयिद्रस्य, which is unintelligible. K has वज्रं. (2) D and K read दिव्यमौषधी. M reads दिव्य औषधीः. Both are incorrect. (3) भक्षितौरसर्योगिन, a variant in D. भक्षयेत् तस्य रसो येन, a variant in K. M reads सा रसः. All are gram. inc. (4) D reads भक्षते. K reads तौलकैकेन. Both are incorrect. (5) M reads रसराजस्तु बद्धाते. (6) प्रस्वेदात्तस्य गात्रस्य, a variant in M. (7) भक्षा-दर्शसहस्राणि, a variant in D, wherein the middle term is incorrect. (8) D reads नात्र संशयः. (9) D has कृष्णतेजः, K has प्रजापतेः कृष्ण-तेजा. (10) क्षणाद्भ्राति सूतकः, an incorrect variant in D. K has only क्षणा, and wants four charaṇas next following. (11) M reads स्पर्शनादेव. (12) क्षालिं नयन बध्यते, a variant in D, which is unintelligible. (13) M reads तौरवल्ल्या रसेनैव. (14) D reads क्षणात् instead of तत्क्षणात्. K reads खोटि, which is not correct.

मृतगोलकमाषैकं[1] माषैकं हेमगोलकम्[2] ।
एकीकृत्य[3] तु संमर्द्य[4] लुङ्गाम्लेन[5] दिनत्रयम् ।
कर्षैकं नागपत्राणि[6] रसकल्केन लेपयेत् ॥ ८२ ॥
वेष्टयेद्वृश्चिकाल्या च[7] तत्पिण्डं लेपयेत् ततः ।
मारयेत् पन्नगं देवि शक्रगोपनिभं[8] भवेत् ॥ ८३ ॥
कर्षैकं तारपत्राणि मृतनागेन लेपयेत् ।
वृश्चिकाल्या च तत्पत्रं लेपितं[9] वेष्टयेत्ततः ॥ ८४ ॥
तत्तारं म्रियते देवि सिन्दूरारुण[10]सन्निभम् ।[11]
सहस्रांशेन तेनैव शुल्ववेधं प्रदापयेत् ॥ ८५ ॥
जायते[12] कनकं दिव्यं देवाभरणभूषणम् ॥ ८६ ॥

---

(1) D reads माष्टिकं. K has मृतकमाषैकं मासिकं. M reads द्रुतकीरत्नकं मृतं. All the texts seem to be inaccurate. (2) माषकं हेमगोलकं, a variant in D. K reads मासिकं in lieu of माषैकं, which is incorrect. M reads हेमगोष्टकम्. (3) All the texts read एकीकृत्वा, which is gram. inc. (4) D reads तत् सर्व्वं. M reads सम्मर्दीं, which is incorrect. (5) D has लुगाम्लेन. K reads erroneously गात्रेण. (6) कर्षं च नागपुत्राणि, a variant in D. M reads कर्षकं for कर्षैकं. (7) The portion from this charaṇa upto the शुल्ववेधं प्रदापयेत् is not found in D. K has वेष्टयेद्वृश्चिकवल्या. लेपयेद्वृश्चिकालिच, a variant in M. (8) M reads शक्रेहाभनिभं, which is apparently an error of the scribe. (9) K reads वृश्चिकवल्या तत् पत्रं लेपयेत्. (10) K reads सिन्धुरारुण, which seems to be incorrect. (11) The portion commencing from कर्षैकं तारपत्राणि and ending in सन्निभं is not found in M. (12) D reads जारयेत्, which is incorrect.

क्षीरयुक्ता[1] बहुफला ग्रन्थियुक्ता[2] च पार्व्वति[3] ।
नाम्ना चटुलपर्णीति[4] शस्यते रसबन्धने ॥ ९७ ॥
एकवीराकन्दरसे[5] मूकमूषा[6]गतं रसम् ।
धमेन्मुखानिलैर्बद्धो[7] भक्षणाय प्रशस्यते ॥ ९८ ॥
रक्तकञ्चुकिकन्दं तु[8] स्त्रीस्तन्येन तु पेषितम्[9] ।
मूषायां[10] पूर्व्वयोगेन कुरुते[11] रसबन्धनम् ॥ ९९ ॥
वृश्चिकापत्रिका[12]बीजं नारी[13]क्षीरसमन्वितम् ।
धमयेत्[14] पूर्व्ववत् सूतं भक्षणार्थाय वार्त्तिकः[15] ॥ १०० ॥

---

(1) D has शीरमुक्ता. K has क्षीरे युक्ता. (2) D reads ग्रन्थीमुक्ता. K reads ग्रंथीयुक्ता. (3) K reads पार्वती, which is gram. inc. (4) D reads चललपर्णी. K reads चतुलेंपर्णीति. M reads चत्त्वलपर्णेति. It is very difficult to find out the proper term from all these texts. We have adopted the above text after referring to the meaning of these terms. (5) M reads कन्दकल्के. (6) Both D and K read मूकमूखा. [ ष being pronounced as ख. ] (7) धमें मुखानिलेर्बद्धो, a variant in D. भवेन्मुखानिलोद्बद्धो, a variant in M. (8) D reads रक्तकंचुकीकन्देषु. K reads कंचकि in place of कञ्चुकि. M reads रक्तकञ्चुकि-कन्दात्तु, which appears to be incorrect. (9) D has पोषिता, which is incorrect. M reads पेषयेत् , which is not accurate here. (10) Both D and K read मूखायां. (11) M reads erroneously कुरिते. (12) D has कृष्णकापत्रिका. M has वृश्चीकपत्रका. (13) M reads कारि, which is evidently an error of the scribe. (14) K reads धामयेत्, (15) D reads वार्त्तिके. K reads भक्षणार्थे य वार्त्तिकं. M reads वार्त्तिकः All the texts are incorrect.

वज्रकन्दं समादाय[1] रसमध्ये[2] विनिक्षिपेत् ।
गजेन्द्राख्यं[3] पुटं दत्त्वा सप्तधा बद्धतां[4] नयेत् ॥ १०१ ॥
भक्षयेत् तं रसं प्राज्ञः[5] षण्मासादमरो भवेत् ॥ १०२ ॥
लाङ्गलीकन्दमादाय कर्कोटीकन्दमेव च ।
रसं तन्मध्यगं[6] कृत्वा स्वेदयेन्मर्दयेत् पुनः[7] ॥ १०३ ॥
म्रियते[8] नात्र सन्देहो ध्मात[9]स्तीव्रानलेन तु ।
शुकचञ्चुगतं सूतं पुटयेद्धामयेत्ततः[10] ॥ १०४ ॥
शतांशं वेधकर्त्तायं[11] देहसिद्धिकरो भवेत् ॥ १०५ ॥
हंसपादीरसं[12] सूतं शूककन्दोदरे क्षिपेत्[13] ।
गजेन्द्रपुटनं[14] दद्यात् म्रियते[15] नात्र संशयः ॥ १०६ ॥

---

(1) वज्रकन्दं समानीयात्, a variant in D. (2) D reads रसं मध्ये. So also K. (3) D has गजेन्द्राणां. (4) D reads बन्द्रातां, which is incorrect. M reads बध्यतां. (5) भक्षयेच्च रसं प्रातः, a variant in D. K reads भक्षयेच्च रसं प्राज्ञः. (6) D has रसं तं मध्यम. (7) M reads ततः. (8) Both D and M read मृयते, which is gram. inc. (9) Both D and K read ध्मातं, which is not accurate here. (10) This charaṇa and the next three charaṇas are not found in K. M reads ध्मापयेत्ततः. (11) M reads वेधयेत् कर्त्ता, which has no clear sense. (12) D has हंसपादरसं. (13) शूककन्दरसो भवेत्, a variant in D. M reads शुककन्दोदरे क्षिपेत्. (14) D has गजेन्द्रं पुटनं. K has गजेन्द्रपुटकं. (15) Both D and M read मृयते, which is incorrect.

हंसाङ्घ्रिं शुकतुण्डीं च[1] गृहीत्वा[2] मर्दयेद्रसम् ।
क्रौञ्चपादोदरे दत्त्वा[3] ततो[4] दद्यात् पुटत्रयम् ॥ १०७ ॥
म्रियते[5] नात्र सन्देहो लक्षवेधी महारसः ॥ १०८ ॥
तृण[6]ज्योतिरिति ख्याता शृणु दिव्यौषधी प्रिये ।
निशासु[7] प्रज्वलेन्नित्यं नाम्नि ज्वलति[8] पार्व्वति ।
तस्या मूले तु निक्षिप्तं चोरं रक्तं भवेत् प्रिये ॥ १०९ ॥
तन्मूलरसगन्धाभ्रै[9]र्मातुलुङ्गाम्लपेषितैः[10] ।
शुल्वपत्रं विलिप्तं तु[11] भवेद्धेम पुटत्रयात्[12] ॥ ११० ॥
तन्मूलचूर्णसंयुक्तो[13] रसराजः सुरेश्वरि[14] ।
मातुलुङ्गरसे घृष्ट[15]मभ्रकं चरति क्षणात् ॥ १११ ॥

---

(1) हस्तांघ्री शुकचंचुश्च, a variant in D. हंसांघ्रि शुकचुंचुंच, a variant in K. हंसाङ्घ्रि शुकतुण्डी च, a variant in M, which is incorrect. (2) M reads गृहीत्वा, which is not unanimously correct. (3) M reads क्षिप्त्वा. (4) D has भ्रामो. K has भ्रातो. (5) D reads erroneously मृयते. This hemistich and the next four are not found in M. (6) D reads त्रण, which is evidently an error of the scribe. (7) This hemistich and the next are not found in D. (8) K reads वलति. (9) D reads गन्धाभ्र. (10) K reads पेषिते, which is incorrect. (11) शुल्वपत्रविलेपं तु, a variant in D, which is not correct. (12) D reads पुटत्रयम् , which is not correct. (13) त चुर्णंचुर्णंसंक्षिप्तो, a variant in D, which has no sense. K reads संक्षिप्तः. M reads संयुक्तं, which is grammatically incorrect. (14) D has रसराजेश्वरेश्वरी, which is incorrect. M reads सुरेश्वरी, which is also incorrect. (15) K reads रसैर्मर्द्य. M reads रसेनैव.

अथोच्चटीं[1] प्रवक्ष्यामि रसबन्धकरीं[2] प्रिये ।
एकमेव[3] भवेन्नालं तस्य रोम तु[4] वेष्टनम् ॥ ११२ ॥
तस्याग्रे च भवेत् पुष्पं शुकतुण्डस्य सन्निभम्[5] ।
तत्पत्राणि च देवेशि शुकपिच्छनिभानि च ।[6]
तत्कन्दं कुष्ठसंस्थानं[7] चोर्ब्बं सिन्दूर[8]सन्निभम् ॥ ११३ ॥
जलं स्रवेन्मधूच्छिष्टं[9] तत्समादाय पार्व्वति ।
वेधयेत् सर्व्वलोहानि काञ्चनानि भवन्ति च ॥ ११४ ॥
रसतालकतुल्यानि[10] मर्द्दयेदुच्चटीरसैः ।
आतपे म्रियते[11] तप्तो रसो दिव्यौषधीबलात्[12] ॥ ११५ ॥
वेधयेत् सप्त[13] लोहानि लक्षांशेन वरानने ॥ ११६ ॥[14]

---

(1) D has मथांचटीं, which is unintelligible. K has अथोपटीं. M has अथेश्चटिं. (2) M reads रसबन्धकरं, which is incorrect. (3) D reads एकसैव, which is incorrect. (4) D reads रोमं तु. K reads रामं तु. M reads रोमग्र. (5) D has सन्निभः. M has शुकतुण्डेय. (6) This hemistich and the next are wanting in D. (7) M reads कूर्म्मसंस्थानं. (8) K reads सिंधुर, which is incorrect. (9) D has स्रावेत्. K has मधुपिष्टं, which is incorrect. M has जलद्रव्यमधुच्छिष्टे. (10) रसतालुकतुल्यानि, a variant in D. रसतालकतुल्यानि, a variant in K. ससतालकतुल्याक्तं, a variant in M. (11) D reads मृतये which is incorrect. K reads स्रीते, which is unintelligible. M reads मृयते, which is gram. inc. (12) D has दीप्तौषधीबसात्, which is not correct. (13) M reads सर्व्वं. (14) After this śloka we find in D—अथ रक्तं च देवेशि &c., a portion of चित्रककल्प, which is described afterwards; and in K—ज्योतिष्मतीतैलविधिं, which will be mentioned after चित्रककल्प. We have adopted the text in M.

अथ रक्तस्नुहीकल्पं[1] वक्ष्यामि सुरसुन्दरि[2] ।
स्नुहीक्षीरेण शुल्वस्य[3] पत्रलेपं तु कारयेत्[4] ॥ ११७ ॥
क्षीरेण तापयेद्भूयः[5] सप्तवारं वरानने ।
आवर्त्तितं[6] भवेद्यावज्जाम्बूनदसमप्रभम् ॥ ११८ ॥
(अथातस्तिलतैलेन पाचयेच्च दिनत्रयम् ।
तथा शुल्वस्य पत्राणि वेध्यं जाम्बुनदं भवेत् ॥)[7]
रसं रक्तस्नुहीक्षीरं[8] कुनटीं गन्धकाभ्रकम्[9] ।
दरदञ्चैव लोहानि सहस्रांशेन वेधयेत्[10] ॥ ११९ ॥
स्नुहीक्षीरं समादाय[11] निशार्द्धं हेम चोभयम्[12] ।

---

(1) स्नुहिकल्पं प्रवक्ष्यामि, a variant in D. स्नुहीकल्पं प्रवक्ष्यामि, a variant in K. अथ रक्त स्नुहीकल्पं, a variant in M. (2) D reads विख्यातं च सुखं दिने. K reads विख्यातं सुरवन्दिते. (3) D has स्नुहिक्षीरेषु शुल्वस्य. M has स्नुहिरक्तेन शुल्वस्य. (4) अत्र लेपस्तु कारयेत्, an incorrect variant in D. (5) Both K and M read तापयेत् भूयः. (6) D reads तप्ततप्तं. (7) We find this incongruous śloka in K only ; hence we have put it within brackets and have not numbered it. (8) रसनक्त स्नुहीक्षीरं, an incorrect variant in D. K reads रक्तस्नुहिक्षीरं. M reads रत्नस्नुहिक्षीरं, which is apparently an error of the scribe. (9) D has कुनटीगन्धकाचकम्. M reads कुनटी instead of कुनटीं. (10) K reads मर्दयेत् प्रहरत्रयं. After this charaṇa K has an incorrect and incomplete hemistich which is not found in any other MSS. The hemistich runs thus :—सहस्रांशं वेधयेत्तारं शुल्वयोभूतारसं. (11) D has an incomplete charaṇa स्नुहीर समादाय. M reads स्नुहिक्षीरं. (12) निशार्धं हेमदी भवेत् , a variant in D, which has not the following two hemistichs कुनटीं &c. and अनेनैव &c. निशामार्गेण वेष्टयेत् , a variant in M, which also does not contain the above two hemistichs.

कुनटीं गन्धचूर्णञ्च[1] सर्व्वमेकत्र मर्द्दयेत् ॥ १२० ॥
अनेनैव प्रकारेण निशार्द्धं हेम शोधयेत् ।
गुटिकाङ्कृत्य तेनैव[2] नागं विध्यति[3] तत्क्षणात् ॥ १२१ ॥
अथातः स्थलपद्मिन्या[4] दिव्यौषध्या विधिं शृणु ॥१२२॥
पद्मिनीसदृशी पत्रैः[5] पुष्पैरपि च तादृशी[6] ।
भङ्गे चैव[7] भवेत् क्षीरं रक्तवर्णं सुशोभनम् ॥ १२३ ॥
आक्रम्य[8] वामपादेन पश्येद्गगनमण्डलम्[9] ।
पश्येच्च[10] तारकायुक्तं[11] ग्रहनक्षत्रमण्डलम् ।
लक्षयोजनतो[12] देवि सा ज्ञेया[13] स्थलपद्मिनी ॥ १२४ ॥
तस्याः[14] पञ्चाङ्गमादाय हरगौरीसमन्वितम् ।
मनःशिलातालयुक्तं माक्षिकेण समन्वितम् ॥ १२५ ॥

---

(1) K reads कुनटीं गन्धकं चूर्णेन, which seems to be partially incorrect. (2) D reads गुटिकाकृता तेनैव. K reads गुटिकाकृत्वानेनैव. M reads पुटीकृत्वन्तु तेनैव. All these texts are partly incorrect. (3) D reads वेधति, which ought to have been वेधयति. (4) D has प्रथ्यान्यसा पद्मिन्या, an incomplete and incorrect charaṇa. (5) पद्मिनी तु श्रमपत्रैः, an incorrect reading in D. M reads पद्मिनीसदृशा पत्रैः. (6) M reads पत्रैरपि च तादृशैः, wherein the first term is tautological. (7) M reads भंगेऽपि च. (8) D reads प्राक्रम्य. (9) पश्येदूर्ध्वं तु मण्डलम्, a variant in D. (10) D has दृशेश, which has no sense. (11) M reads तारकालोकं. (12) M has लक्षयेज्जामतो, which has no sense. (13) D reads सा गेयाष, which mars the metre. (14) Four hemistichs commencing from तस्याः are not found in M.

मर्द्दयेत् सप्तरात्रं तु तेन शुल्वञ्च वेधयेत्[1] ।
सहस्रांशेन देवेशि[2] विद्धं[3] भवति काञ्चनम् ॥ १२६ ॥
तस्याः पञ्चाङ्गमादाय पूर्व्वोक्तविधिना प्रिये[4] ।
चारयेत्[5] सूतराजन्तु[6] मूकमूषागतं[7] धमेत् ॥ १२७ ॥
म्रियते[8] मूषिकामध्ये संकोचेन न संशयः[9] ।
तेनैव सर्व्वलोहानि सहस्रांशेन वेधयेत् ॥ १२८ ॥
अथातः[10] संप्रवक्ष्यामि कुमुदिन्या[11] विधिं प्रिये ।
भित्त्वा काश्मीरिपाषाणे[12]पूर्णिमायान्तु कारयेत्[13]॥१२९॥
तस्याः पञ्चाङ्गमादाय भावयेत्तु मनःशिलाम् ।
खर्परे[14] धारयित्वा तु भावयेत्तु पुनः पुनः ॥ १३० ॥

---

(1) मानं शुल्वं च वेधयेत्, a variant in D. (2) D reads साहस्रांशे देवेशि, thus destroying the metre. (3) D reads सिद्धिः. K reads शुद्धं. (4) K has मूर्वां only for this charaṇa. (5) D reads मारयेत्. (6) M reads सूतराजञ्च. (7) D has मूकं मूष्यागतं. K has मुकमूखागतं. Both are incorrect. (8) M reads मृयते, which is gram. inc. (9) संकेतेन मयेन च, a variant in D, the sense whereof is not clear. (10) The whole piece relating to कुमुदिनी is not found in M. (11) D reads कुमुदिन्यां, which is incorrect. (12) D reads काश्मरिपाषाणे. (13) पूर्णिमायां कारयेत् प्रिये, a variant in D. After this śloka we find in D the following hemistich—कुमुदिनिकन्दमादाय तस्य मध्ये रसं क्षिपेत् ; and in K—समुदायानि प्रशस्ता चित्रकस्य यथा नि आकंदाडिकसंति हि. These seem to be redundant. (14) K reads खापरे (a slang term.)

खर्परे द्रावितं नागं[1] तत्कल्केन युतं[2] कुरु।
काश्मीरद्रवतुल्यं हि[3] जायते कनकं ध्रुवम्॥ १३१॥
चित्रकस्य यथा ग्राह्यं[4] कथयामि समासतः[5]॥ १३२॥
चित्रकस्त्रिविधो ज्ञेयो[6] रक्तः कृष्णो रसायने[7]।
शुक्लो[8] व्याधिप्रशमने श्रेष्ठो मध्यः कनीयसः[9]॥ १३३॥
कृष्णं रक्तं सितं[10] वापि हेमन्ते नोद्धरेद्[11]बुधः॥ १३४॥
कृष्णचित्रकमुत्पाट्य[12] गोभिर्नाघ्रातमीश्वरि[13]।

---

(1) खर्परसंचिपे द्रवितं नागं, an absurd reading in D. (2) D reads सुतं, which is incorrect. (3) काचिद्रवाच द्रव्यतुल्यं हि, an absurd reading in D. (4) D reads यथागुह्यं, wherein the first term is incorrect. This hemistich is not found in K. (5) M reads समानतः, which is incorrect. (6) D reads गेयो. M reads त्रिविधं चित्रको ज्ञेयः, wherein the first term is incorrect. (7) D and K read रक्तकृष्णो. M reads कृष्णो रक्तो रसायनम्, wherein the middle term is incorrect. (8) D reads शुक्के, which is not correct. K reads शु only. M reads शुक्ल (without any suffix), which is gram. inc. (9) श्रेष्ठमध्यकनीयसः, a variant in D. प्रेष्टमध्यकनीयसः, a variant in K. श्रेष्ठमध्यात् कनीयसम्, a variant in M. All are incorrect. (10) K reads श्रितं, which is erroneous. M reads erroneously रत्नं in place of रक्तं. (11) K reads चोद्धरेद्, which is not accurate. (12) Both D and K read कृष्णचित्रं समुत्पाट्य; but the term is चित्रक and not चित्र. (13) गोपनीयातिखेचरी, a variant in D. गोभिर्नाघ्रामतास्वरी, an incorrect variant in K. M reads मीश्वरी, which is gram. inc.

क्षीरमध्यस्थितं क्षीरं[1] कृष्णवर्णं भवेत् क्षणात् ॥ १३५ ॥
तस्य पञ्चाङ्गचूर्णेन[2] पारदं[3] सह मर्द्दयेत् ।
धमेच्च[4] मूकमूषायां खोटो[5] भवति तत्क्षणात् ॥ १३६ ॥
रक्ताम्बरधरो भूत्वा[6] रक्तमाल्यानुलेपनः ।
कृष्णपक्षे तु पञ्चम्यां रक्तशाल्योदनेन तु[7] ।
बलिं दत्त्वा महादेवि[8] रक्तचित्रकमुद्धरेत् ॥ १३७ ॥
रक्तचित्रकचूर्णेन[9] वङ्गस्तापैस्त्रिभिस्त्रिभिः[10] ।
सर्व्वदोषविनिर्म्मुक्तः[11] स्तम्भमायाति[12] तत्क्षणात् ॥१३८॥
तन्मूलं सूतकं चाम्ले[13] कङ्गुणीतैलसेचनात्[14] ।
एकविंशतिवारेण शुल्वं[15] शुद्धं भविष्यति ॥ १३९ ॥

---

(1) क्षीरमध्ये क्षिपेत् क्षीरं, a variant in D. स्थितं is wanting in M. (2) D reads पञ्चाङ्गचूर्णं तु. (3) D reads पारदेन. (4) D reads धामयेत्. (5) M reads खोट्टो. (6) K reads erroneously भूक्ता. The word धरो is wanting in M. (7) D reads रक्तमाल्यो-दनेन तु, which is incorrect. M reads रक्तशल्योदनेन च, which is an error of the scribe. (8) M reads ततो देवि. (9) M reads चुर्णेन, which is incorrect. (10) K reads वंग (without any suffix), which is gram. incorrect. वंकावापैस्त्रिस्त्रिभिः, an incorrect variant in M. (11) D reads विनिर्मुक्ता. K reads विनिर्मुक्तो. M reads विद्युन्मुक्तः. All the readings are incorrect. (12) M reads स्तंभमायाश्च. (13) K reads चाम्लं. M reads चैव. (14) D reads संयुता। M reads सेच-नम्. After this hemistich we find in D the following hemistich, which runs thus :—पत्रलेपप्रमाणेन चन्द्रार्कं काञ्चनं भवेत्. We have not adopted this, for it seems to us redundant. (15) K reads erroneously शङ्कं.

रक्तचित्रकभल्लात-तैललिप्तं पुटेन तु[1]।
चन्द्रार्कपत्रं देवेशि जायते हेम शोभनम्॥ १४०॥
नागिनीकन्दसूतेन्द्रं[2] रक्तचित्रकसंयुतम्[3]।
पत्रलेपप्रमाणेन[4] चन्द्रार्कं काञ्चनं भवेत्॥ १४१॥
रक्तचित्रकसंयुक्तो रसोऽपि सर्व्वदो भवेत्॥ १४२॥[5]
ज्योतिष्मतीतैलविधिं[6] वच्यामि शृणु पार्व्वति॥ १४३॥
ज्योतिष्मती नाम लता या च[7] काञ्चनसन्निभा।
वल्लीवितानबहुला हेमवर्णफला शुभा॥ १४४॥[8]
आषाढ़पूर्व्वपचे तु[9] गृहीत्वा[10] बीजमुत्तमम्।
तिलवत् क्वाथयित्वा तु[11] हस्तैः पादैरथापि वा[12]।
तस्य तैलं[13] समादाय कुम्भे ताम्रमये चिपेत्[14]॥ १४५॥

---

(1) M reads भवेन तु, which has no clear sense. (2) नागनीकरसूतेन्द्र, a reading in D. नागिनिकरसूतेन्द्रं, a reading in K. नाभीनिकन्दसूतन्तु, a reading in M. We have adopted the above text, after collating all the texts. (3) M reads संश्रुतम्. (4) M reads प्रतापैस्तु. (5) This hemistich is not found in M. After this we find in D चित्रककल्पः and in K कंदचित्रककल्पः. (6) M reads अथ ज्योतिष्मतीतैलं. (7) M reads याति, which is not correct. (8) This hemistich is not found in M. (9) Both D and K read पूर्वपचस्य. (10) M reads ग्रहीत्वा, which is not unanimously correct. (11) D reads कल्पयित्वा तु. M reads व्यतीत्य साधयित्वा च. (12) D has हस्तोपादैरथापि वा, which is incorrect. K and M have हस्तपादैरथापि वा. (13) D and K read तस्यास्तैलं. (But the word बीजं is neuter.) (14) कुम्भे ताम्रे पयो चिपेत्, a variant in D, wherein the third term is incorrect.

तापयेद्भूगतं[1] कुम्भं क्रमादूर्द्ध्वं तुषाग्निना ।
षण्मासे तु व्यतिक्रान्ते[2] स घटः काञ्चनं भवेत् ॥ १४६ ॥
तं तु[3] हैममयं कृत्वा तैलमाक्षिकमिश्रितम्[4] ।
प्रतिवापे[5] निषिञ्चेत् तत् हेम ताम्रसमं[6] भवेत् ॥ १४७ ॥
तथाच शतवेधि[7]स्यात्—विद्यारत्न[8]मनुत्तमम् ॥ १४८ ॥
दग्धारोहां[9] प्रवक्ष्यामि रसबन्धकरीं प्रिये[10] ।
स्पर्शवेधे तु[11] सा ज्ञेया सर्व्वकार्य्यार्थसाधिनी ॥ १४९ ॥
शस्त्रच्छिन्ना[12] महादेवि दग्धा वा पावकेन तु[13] ।
प्ररोहति क्षणाद्दिव्या[14] दग्धा च्छिन्ना महौषधी[15] ॥१५०॥

---

(1) D reads भूमितं. M reads स्थापयेत्. (2) षण्मासं तु व्यतिक्रम्य, a variant in D. षण्मासे त्वभ्यतिक्रान्ते, a variant in M. (3) D reads तच्चूलं, which has no sense. K reads ताम्रं. (4) तेन मक्षिकमिश्रितम्, a variant in D. K reads तेन instead of तैल. (5) This hemistich and the next one are not found in D. M reads प्रतिवाप. (6) K reads हैमं ताम्रसमं. (7) K has अथातश्शतवेधी. M has तथा च शतवेधी. (8) M reads विद्यरत्न, which seems to be incorrect. (9) D and K read दग्धलोहं, which appears to be incorrect. M reads दग्धारोहं, which is also incorrect; since we see just afterwards तस्याः पुष्पं &c. (10) रसवन्धकरा भवेत्, a variant in D. रसवन्धकरी भवेत्, a variant in K. (11) Both D and K read स्पर्शवेधेषु. (12) D reads शास्त्रच्छिन्ना, which is incorrect. (13) D reads erroneously दग्धा चापचकेन तु. (14) प्ररोहन्ति क्षणाद्देवि, a variant in D, wherein the first word is incorrect. प्ररोहेत् तत्क्षणा दिव्या, a variant in K, wherein the second word is incorrect. (15) K reads erroneously मौषधी. M reads दग्धा सा तु महौषधी.

रक्तं पीतं सितं कृष्णं[1] तस्याः पुष्पं प्रजायते ।
चणकस्येव पत्राणि सुप्रसूतानि लक्षयेत्[2] ॥ १५१ ॥
सा स्थिता गोमतीतीरे[3] गङ्गायामर्बुदे[4] गिरौ ।
उज्जयिन्या[5] दक्षिणतो वनान्तेषु च दृश्यते[6] ॥ १५२ ॥
तस्याः कन्दरसं[7] दिव्यं कृष्णराजि[8]समन्वितम् ।
ताम्बूलेन[9] समं कृत्वा गुटिकां[10] कारयेद्बुधः ॥ १५३ ॥
सर्व्वेषामेव लोहानां[11] द्रुतानां वह्निमध्यतः[12] ।
सहस्रं वेधयित्वा तु काञ्चनं कुरुते क्षणात् ॥ १५४ ॥
तथैव म्रियते सूतः[13] कान्तहेमाभ्रसंयुतः ।
कुरुते काञ्चनं दिव्यं देवाभरणभूषणम् ॥ १५५ ॥[14]

---

(1) श्वेतं पीतं श्रितं कृष्णं, a variant in D. श्वेतं पीतं सितं कृष्णं, a variant in K. (2) D reads भक्षयेत्. M reads सुप्रभूतानि. (3) सास्तीगगामन्तरे तीरे, an absurd variant in D. K reads गौतमीतीरे. M reads सा स्थिरा. (4) D has गङ्गायायाम्रयं. M has गङ्गायमच्छदे. Both the texts seem to be incorrect. (5) K reads उज्जयिन्यां. (6) वनं तेषु च दृश्यंते, a variant in D. वनां तेषु न दृश्यते, a variant in K. Both the readings seem to be incorrect. (7) D reads कान्तरसं, which has no clear sense. K and M read तस्य, which is gram. inc. (8) D reads कृष्णरक्त. K reads कृष्णपाति. (9) D has तव कृष्णेन. (10) M reads घटिकां, which is evidently incorrect. (11) D reads सर्वेषामपि वस्तूनां. (12) D has वह्निभूतानां मध्यतः. दत्तवान् वह्निमध्यगं, an absurd variant in K. (13) D reads मृतं and reads its adjective संयुतं. But M reads मृतं and reads its adjective संयुतः, which is gram. incorrect. (14) This hemistich is wanting in D and M.

कटुतुम्बीति विख्याता[1] देवि दिव्यौषधीं शृणु[2] ॥१५६॥
तस्या वीजानि[3] संगृह्य सूक्ष्मचूर्णानि कारयेत्[4] ॥ १५७ ॥
एकविंशतिवारांस्तु[5] भाव्यं धात्रीरसेन तु ।
पयसा सहितेनैव विश्वभेषजसंयुतम् ॥ १५८ ॥
वीजं यन्त्रे विनिक्षिप्य तैलं संगृह्य पण्डितः ।[6]
रसं मूर्च्छापयेत्तेन[7] चक्रमर्द्देन मर्द्दयेत्[8] ॥ १५९ ॥
गोपित्तं शिखिपित्तञ्च काङ्क्षीकाशीससंयुतम्[9] ।
तारतुल्यानि चैतानि सर्व्वेषां सूतकः समः[10] ॥ १६० ॥
मेषशृङ्गे निधातव्यं[11] मासमेकं[12] निरन्तरम् ।

---

(1) D and M read कटुतुम्बी तु विख्याता. (2) देवि दिव्यौषधी शृणु, a variant in D and M. K reads दिव्यौषधं and at the same time reads its adjective विख्यातां, which is gram. inc. (3) D reads तस्य वीजानि. M reads तस्य वजानि. Both are incorrect. (4) D has an incomplete charaṇa सूक्ष्मचूर्णी कारयेत्. M reads चारयेत्, which seems to be incorrect. (5) All the texts read वारांसि. But the term वार is a masculine. It means otherwise, when it is a neuter. (6) This hemistich is not found in D and K. (7) M reads मुर्च्छापयेत्तेन, which is gram. incorrect. (8) This hemistich is not found in D. K has an incomplete charaṇa चक्रमर्द्दनत्. M reads चक्रमर्द्दय. (9) This hemistich is not found in D. कांक्षीकाशीसकैर्युतं, a variant in K. काच्चिकासीससंयुतम्, a variant in M. (10) M reads सूतकक्रमः, which seems to be incorrect. (11) मेषशृङ्गेण धातव्यं, a variant in D. मेषश्रिङ्गन धातव्या, an incorrect variant in M. (12) D reads वासमेकं. K reads वासमेकं, which is incorrect.

लोहदण्डेन संसिक्तं[1] सर्व्वलोहानि वेधयेत् ॥ १६१ ॥
गन्धकं लोहदण्डेन एकविंशतिभावितम्।
युक्तं[2] लोहमनेनैव[3] जम्बीर[4]रससंयुतम्।
सवीजं सूतकापितम्[5] अन्धमूषा[6]निवेशितम्।
भूगतं मासमेकन्तु[7] तारं काञ्चनतां नयेत् ॥ १६२ ॥
दलस्य भागमेकं तु[8] तारपञ्चकमेव च[9]।
शुल्वस्य पञ्चभागञ्च[10] वीजस्यैकञ्च योजयेत् ॥ १६३ ॥
एते द्वादश भागाः स्युः सर्व्वं[11] तद्धारयेत् क्षितौ।
स्थानस्यास्य निषिक्तं तु[12] भूदण्डेन तु[13] कारयेत् ॥१६४॥
पञ्चविंशद्दिनान्ते तु[14] जायते कनकोत्तमम्[15] ॥ १६५ ॥
क्षीरकन्दविधिं वक्ष्ये सर्व्वसिद्धिकरं परम्।
चतुर्वर्णविधं[16] तत्र रक्तकन्दः[17] प्रशस्यते ॥ १६६ ॥

---

(1) M reads संयुक्तं. (2) This term is wanting in D. K reads सुक्तं. (3) D reads लोहामनेनैव. M reads लोहमनेनैव. (4) K reads जंभीर, which is also correct. (5) सवीजसूतकांपितं, a variant in K. M reads सूतकांपितं, which is incorrect. (6) K reads अंधमूखा (मूखा = मूषा). (7) D has ग्राममेकं तु. (8) D reads दलस्य, which is incorrect. M reads च in lieu of तु. (9) तारं पञ्चममेव च, a variant in D. (10) D reads पञ्चभागन्तु. (11) D reads erroneously सर्वे. (12) K has स्थानस्यास्य निषिक्तं तु. (13) तु is wanting in D. M reads भूदण्डेन. (14) पञ्चविंशद्दिनान्तेतु, a variant in M. (15) M reads कनकोत्तमः. (16) D and K read चतुर्वर्णविधिं. (17) M reads रक्तकन्दं, which is incorrect.

भग्नमेतच्छ्रवेत् चीरं[1] रक्तवर्णं सुशोभनम् ॥ १६७ ॥
मेघानां[2] तु निनादेन सञ्जातैरुपशोभितैः[3] ।
पत्रैः स्नुहीसमैः स्निग्धैः[4] सप्तभिर्हेमसुप्रभैः[5] ।
बन्धनं[6] रसराजस्य सर्व्वसत्त्ववशंकरम्[7] ॥ १६८ ॥
तस्य चीरन्तु संगृह्य तारं निर्वापयेद्बुधः ।[8]
धमेद्दवाग्निना[9] चैव जायते हेम शोभनम् ॥ १६९ ॥
तिन्तिणीपत्रनिर्यासे[10]रौषतात्र[11]रजोयुतम् ।
मर्द्दयेत् पारदं प्राज्ञो रसबन्धो भविष्यति ॥ १७० ॥
तोयमध्ये विनिक्षिप्य[12] गुटिका[13] वज्रवद्भवेत् ॥ १७१ ॥
शाकवृक्षस्य देवेशि[14] निष्पीड्य रसमुत्तमम् ।
रक्तचन्दनसंयुक्तं सर्व्वलोहानि जारयेत्[15] ॥ १७२ ॥
गन्धपाषाणगन्धेन आयसे विनियोजयेत्[16] ।

---

(1) भग्नमेतच्छ्रवचीरं, a variant in D. भग्नयेतच्छ्रवेत् चीरं, a variant in K, which is partly incorrect. (2) M reads मेस्वानां, which is the error of the scribe. (3) संजात रूपशोभितम्, an incorrect variant in M. (4) श्वत्रैः स्नुहिं सन्निग्धैः, an incorrect variant in D. M reads स्नुहिसमैः. (5) D has हिमनुप्रभैः. M has हेमसन्निभैः. (6) D reads वेधनं. (7) सर्वसत्वग्नंकरी, an incorrect variant in D. सर्वशक्तिवशङ्करी, a variant in M. (8) This hemistich and the next three are not found in D. (9) M reads धमेत्तार्गाग्निना. (10) M reads निर्यासे. (11) K reads मौषत्तात्र, which is incorrect. (12) D reads विनिक्षिप्तं, which is not correct. (13) M reads गुलिका. (14) D has कल्पवृक्षस्य. M has शकवृक्षस्य देवेशी, which is not correct. (15) M reads रञ्जयेत्. (16) M reads विनिवेशयेत्.

मिलन्ति[1] सर्व्वलोहानि द्रवन्ति सलिलं यथा ॥ १७३ ॥
गन्धकं रसकं तार्य्यं पारदं रक्तचन्दनम् ।
रुदन्त्या रससंयुक्तं[2] तारमायाति काञ्चनम्[3] ॥ १७४ ॥
शाकवृक्षस्य निर्य्यासं पत्रे तस्य च गालयेत्[4] ।
शिग्रुमूलस्य चूर्णं तु तद्रसेन विमर्द्दयेत् ॥ १७५ ॥
प्रलिप्य शुल्वपत्राणि पुटे क्षिप्त्वा विपाचयेत् ।
तद्धृतं[5] काञ्चनं दिव्यं भवेल्लक्षणसंयुतम्[6] ॥ १७६ ॥
फलानि शाकवृक्षस्य[7] परिपक्वानि संग्रहेत्[8] ।
तद्रसेन युतं[9] प्राज्ञः सप्तरात्रन्तु भावयेत् ॥ १७७ ॥
तद्रसेन समायुक्तं मञ्जिष्ठामिश्रितं[10] तथा ।
लेपयेत्तारपत्राणि जातं भवति काञ्चनम् ॥ १७८ ॥
देवदाल्या महौषध्या[11] विधिं वक्ष्यामि तत्परम्[12] ।
सा श्वेता व्याधिनाशे च[13] कृष्णा पीता रसायने ॥ १७९ ॥

---

(1) D reads मीलितं. (2) M has रस संयुतं. (3) [illegible] जायेत्, a variant in M. (4) पत्रे तस्य च गालयेत्, an incorrect variant in D. यत्नतः परिगालयेत्, a variant in K. This hemistich and the next one are wanting in M. (5) D reads उद्धृत. K reads उद्धृतं [correct form is उद्धृत.] (6) भवे ल्लक्षणसंयुतं, a variant in K, which is partly incorrect. (7) M reads शक्रवृक्षस्य, which seems to be incorrect. (8) D reads पक्वानि च संग्रहेत्, which is incomplete. M reads संग्रहेत्. (9) M reads हुतं. (10) D reads erroneously मञ्जिष्ठाश्रितं. M reads मञ्जिष्ठा-मिलितं. (11) D has देवदल्यमहौषध्यौ. M has देवदाल्या महौषध्या. Both are incorrect. (12) D reads वदामि M reads तत्वत: (=तत्त्वत:). (13) M reads वायुशमने.

पौर्णमास्यां[1] त्रयोदश्यां राहुग्रस्ते दिवाकरे ।
अथवा[2] कृष्णपञ्चम्यामिमां विधिवदुद्धरेत् ॥ १८० ॥
देवदालीफलं[3] देवि विष्णुक्रान्ता च सूतकम् ।
मूर्च्छयेद्बन्धयेत् क्षिप्रं शुल्वं हेम करोति च ॥ १८१ ॥
देवदालीफलं मूल-मोक्षरोरस एव च ।[4]
तोयेन मर्दितं कृत्वा[5] वङ्गं स्तम्भयति[6] क्षणात् ॥ १८२ ॥
अतः परं प्रवक्ष्यामि[7] श्वेतगुञ्जाविधिं प्रिये ॥ १८३ ॥
कृष्णपक्षे चतुर्दश्यामष्टम्यां वा[8] सुरार्चिते ।
कपाले मृत्तिकां न्यस्य सेचयेत् सलिलेन तु ॥ १८४ ॥
बीजानि सितगुञ्जायाः[9] पुष्ययोगेन वापयेत्[10] ।
वक्ष्यमाणेन मन्त्रेण कुर्य्यात् संग्रहणं[11] तथा ॥ १८५ ॥

ॐ नमो भगवति श्वेतवल्लि[12] श्वेतपर्व्वतवासिनि[13] सर्व्व-कार्य्याणि कुरु कुरु अप्रतिहते[14] नमो नमः स्वाहा ॥

---

(1) K reads पौर्णिमास्यां (2) D reads erroneously अथा. (3) K has देवदालीफलाः. M has देवतालीफलं. Both are incorrect. (4) This hemistich is not found in M. (5) K reads मर्दनं कृत्वा. M reads मृद्य, which is incorrect. (6) D reads भाव्यं स्तम्भयते. M reads वंकं. (7) अथातः संप्रवक्ष्यामि, a variant in K. (8) D and M have च, which is not proper. (9) D has शितगुञ्जाया, which seems to be incorrect. (10) पुष्ययोगे तु वापयेत्, a variant in D. K reads पुष्ययोगे तु. (11) M reads erroneously संग्रहं तथा. (12) D and K read भगवती श्वेतवल्ली. (13) D has श्वेतपर्वते वासिनि. (14) K reads प्रतिहते, which appears to be an error of the scribe.

अनेन मनुना प्रोक्ता सिद्धिर्भवति नान्यथा ।
षण्मासेन तथा वह्नौ मन्त्रपूतेन रक्षयेत् ॥ १८६ ॥[1]

शुद्धशुल्वं[2] तु संगृह्य मूषामध्ये तु संस्थितम्[3] ।
त्रिपञ्चपलसंख्यं तु[4] कर्षार्द्धसितगुञ्जया[5] ॥ १८७ ॥

सहैकत्र भवेत्तारं[6] तस्य गन्धविवर्ज्जितम् ।
ब्रह्मरीति[7]समायुक्तं गुञ्जाचूर्णं सहैकतः ।
देवानां भूषणं देवि जायते हेम शोभनम्[8] ॥ १८८ ॥

॥ इत्यौषधिक्रिया ॥[9]

चन्द्रोदकेन[10] देवेशि वक्ष्यामि[11] रसबन्धनम् ॥ १८९ ॥
शुक्लपक्षे पूर्णमास्यां दृष्ट्वा[12] पूर्णेन्दुमण्डलम् ।

---

(1) This śloka is not found in D and M. (2) K reads शुद्ध शुल्वं. M reads शुद्धशुल्कं, which is incorrect. (3) K reads मूखामध्ये, [which = मूषामध्ये.] D reads संस्थिताम, which is gram. inc. (4) त्रिपञ्च-पलसंख्याता, a variant in D. त्रिपंचपलसंख्या तु, a variant in K. त्रिपञ्च-फलसंख्यतु, a variant in M. We have adopted the above reading after collating all the texts. (5) D has कर्षाद्धि सितगुञ्जया, K has कर्षार्द्धं सितगुंजया. M has कर्षाद्ध' सिगुञ्जया, which is incomplete. (6) M reads भवेत्तास्रं. (7) D reads ब्रह्मराति, which is evidently an error of the scribe. K reads ब्रह्मरीती. (8) M reads भूवणं, which creates a tautology. (9) This is not found in D and M. (10) After गुञ्जाविधि we find in M कर्त्तरीरसबन्धन, but in D and K चन्द्रोदकविधि. Hence we place the latter first. (11) D reads जायते. (12) D reads दृष्टा. K reads दृष्टा. Both are incorrect.

अयं च[1] स्पर्शमात्रेण लोहान्यष्टौ[2]च वेधयेत् ॥ १९८ ॥
तद्रसेन[3] रसं भाव्यं वज्रेण समजारितम् ।
चतु:षष्टंशत: पिण्डे[4] द्विगुणे तु[5] सहस्रकम् ॥ १९९ ॥
दशसंकलिका[6]बद्धं गुञ्जामात्रं रसं नर:[7] ।
त्रिलोहवेष्टितं वक्त्रे धृत्वा चादृश्यतां व्रजेत्[8] ॥ २०० ॥

ॐ नमो रुद्राय दंष्ट्रोत्कटाय[9] विघ्ननाशाय[10] दिशां रक्ष रक्ष विदिशां रक्ष रक्ष रुद्रो विज्ञापयति[11] हुं फट् स्वाहा ॥

॥ इति दिग्बन्धनमन्त्र:[12] ॥

ॐ नमो भगवते रुद्राय त्रिशूलहस्ताय[13] अमृतोद्भवाय[14] रक्ष रक्ष हुं फट् स्वाहा ॥

॥ इति पानमन्त्र:[15] ॥

अथात: संप्रवक्ष्यामि कर्त्तरीरसबन्धनम्[16] ॥ २०१ ॥

---

(1) M reads अयं तु. [Here अयं refers to रस:.] (2) M reads लोहानष्टौ. (3) D reads तद्रसे तु. M reads तत्र सन्तु, which is incorrect. (4) चतु:षष्टांशतो पिण्डे, an incorrect variant in D and M. K reads पिंड. (5) D reads द्विगुणं तु. (6) M has दशशङ्कलिखा, which is incorrect. (7) D reads रसे तत:. K reads रसेन तु. M reads न संशय:. (8) K has वादृश्यतां. M has व्रजेत्, which is gram. incorrect. (9) M reads दंष्ट्रत्कटाय, which is incorrect. (10) M reads विश्वात्माय, which is gram. incorrect. (11) M has ज्ञापयति. (12) M reads दिग्बन्धमन्त्र:. (13) M reads शूलहस्ताय. (14) K reads अमृतोद्भव. (15) M reads परममन्त्र:. This पानमन्त्र is not found in D. (16) B reads कर्त्तरिरसबंधनं. कत्तारसस्य बन्धनम्, a variant in D, which is incorrect ; since it states afterwards कर्त्तरीरस.

असुराणां समायोगे क्रोधाविष्टेन चेतसा ।
सुदर्शनं महाचक्रं[1] प्रेरितं सुरवैरिणा[2] ॥ २०२ ॥
भालपट्टात्ततस्तस्य[3] निपेतुः[4] स्वेदविन्दवः ।
ते भूमौ पतिता दिव्याः[5] सञ्जाताः कर्त्तरीरसः[6] ॥ २०३ ॥
रक्षार्थं स्थापितं तत्र[7] विष्णुना च सुदर्शनम् ।
चक्रतुल्यं भ्रमत्येत[8]दायुधानि निकृन्तति[9] ॥ २०४ ॥
कुरुते गर्जितं[10] नादं धूमं ज्वालां[11] विमुञ्चति ।
कर्त्तरी दृष्टिमात्रेण[12] तथान्या[13] शब्दकर्त्तरी ॥ २०५ ॥
सा स्पर्शकर्त्तरी छाया[14]कर्त्तरी धूमकर्त्तरी ।

(1) सुदर्शनमहाचक्रं, a variant in M. (2) D reads सुरवैरिणम्, which is incorrect. B and K read सुरवैरिणा, which is also incorrect. (3) भालपट्टततस्य, a variant in B, which is partly incorrect. तत्ताल-पट्टे ते तस्य, a variant in D, which conveys no idea at all. भालपट्टतस्य, an incomplete charaṇa in K. (4) M reads निर्यांताः. (5) D and K read जाताः. (6) B has संजात कर्त्तरिरसः, which is incorrect. संजातात् कर्त्तरीरसः, a variant in D, wherein the first term is incorrect. कर्त्तरीरस-बन्धनम्, a variant in K. (7) D reads तस्य. (8) B, D and K read भमत्येव. (9) तदा सत्त्वं भिचां ततिः, an incorrect variant in D. K has सर्व्वयुद्धनिकृन्तनम्. (10) B and K read गर्जनं. D reads erroneously गर्जन्नः. (11) B reads धने ज्वाला, which is incorrect. D reads धूमवालां, which is incorrect. M reads महाज्वालां. (12) B reads कर्त्तरि, which is incorrect. K reads दृष्टीमात्रेण, which is incorrect. M reads दृष्टमात्रेण. (13) M reads तथान्य, which seems to be incorrect. (14) This charaṇa and the next one are not found in D. K reads शाया, which appears to be incorrect.

सा[1]ज्वालाकर्त्तरी चैव शक्तिर्घोरस्य[2] कर्त्तरी ॥ २०६ ॥
लोकानां तु हितार्थाय घोरशक्तिर्व्यवस्थिता[3] ।
रसरूपा महाघोरा असिद्धानां तु छेदिनी[4] ॥ २०७ ॥
तस्याः चेतं यदा गच्छेत्[5] अघोरास्त्रं जपेत्तदा[6] ।
पुनर्घोरं[7] न्यसेत्तत्र यथास्त्रं विन्यसेद्बुधः[8] ॥ २०८ ॥
अनुलोमविलोमेन देहेऽधिष्ठाप्य[9] कर्त्तरीम् ।
मुद्रया मुद्रयेत्तां तु[10] अघोरास्त्रेण योजिताम्[11] ॥ २०९ ॥
दीपेनाराधयेत्तां तु[12] स्तम्भयेद्धूपनेन च[13] ।

---

(1) D reads स. (2) B reads सत्स्यघोरस्तु, which is incorrect. D and M read शक्तिघोरस्य, which seems to be incorrect. (3) B reads घोरे शक्तिः. D reads घोरशक्ति (without विसर्ग). Both are incorrect. (4) D reads छेदनी. (5) B reads तस्य चेतं, which is incorrect. तस्य चेतं यथा गच्छेत्, a variant in M, which is partly incorrect. (6) दशरावं तदा जयेत्, a variant in D. अघोरास्त्रं तदा जयेत्, a variant in K. M reads जपेत्तथा, which is partly incorrect. (7) D reads पुनर्घोरां. (8) यथास्त्रं विध्यसेद्बुधः, a variant in D, which is partly incorrect. (9) देहे आधिष्ठाप, an incorrect reading in D. (10) D has मुद्रय मुद्रयेतेन, which has no sense. K has मुद्रया मुद्रयेनं तु, whicn is partly correct. (11) M reads योजितः. (12) B reads चित्रेन, which is incorrect. दीप्तेन राधयेत्तं तु, a variant in D. M reads दीप्तेन. (13) D and K read तु instead of च. B reads स्तम्भयेद्धोपनेन तु. M reads संभवेद्दीपनेन च. We suppose that, धूपनेन is the proper word here ; for in worshipping a deity दीप and धूप are necessary.

विष्टरा[1]मुद्रया तां तु स्थानयोगं नियोजयेत्[2] ॥ २१० ॥
कञ्चुकी तु शिला क्रान्ता[3] कुमारी वज्रकन्दकम्[4] ।
योषिद्रक्तं गवां मूत्रं[5] तिलकः सर्व्ववश्यकृत्[6] ॥ २११ ॥
अथातः संप्रवक्ष्यामि विषोद[7]रसबन्धनम् ॥ २१२ ॥
विषोदकं विषसमं घृतवच्च घृतोदकम्[8] ।
सितपीतादिवर्णाढ्यं[9] तच्च देवि रसोत्तमम् ॥ २१३ ॥
तत्र गत्वा वनोद्देशे[10] स्मरेद्घोरसहस्रकम्[11] ।
केशाः क्षिप्ताः स्फुटन्त्यस्मिन्[12]आत्म[13]च्छाया न दृश्यते॥२१४॥

---

(1) B reads त्रिष्टुरा. K reads त्रिष्टया. M reads त्रिपुरा. (2) स्थानयोगेन योजयेत्, a variant in D. K has an incomplete charaṇa स्था योजयेत्. (3) B reads कुंचुकि, which is incorrect. M reads तुन्दिला कान्ता. (4) D reads कंचकन्दकम्. (5) योषिद्रक्तं तु गोरक्तं, a variant in B. योषिद्रक्तचन्द्रोदकं, a variant in M. (6) In B we have this absurd reading—मर्दन संवधये देवी देहलोहचैवोद्धांतौ रसवंधनं. Here ends the 12th Paṭala of the MS. B. व्याख्या स्याद्रसबन्धकम्, a variant in M. (7) D reads विषोकदस्य बन्धनम्, which seems to be incorrect. K reads विषोदकरसबन्धनम्, wherein क is redundant. (8) This hemistich is not found in M. (9) सीसयात्तादिवर्णेत्यं, an incorrect variant in D. K reads वर्णापि, which is incorrect. (10) D reads वनो देशं. K reads वनोदेशं, which is incorrect. M reads भवेद्दृशे, which is also incorrect. (11) स्मर स्तोवं सहस्रकं, a variant in D. स्मरेद्वोरं सहस्रकं, an incorrect variant in K. (12) D reads केशाः चिप्रं. K reads कोशाः चिप्रा स्फुटत्यस्मि, which is incorrect. M reads कोशचिप्राक् स्फटंतेस्मिन्, which is also incorrect. (13) M reads नात्र.

तैलञ्च गोलकाकारं[1] घृतञ्चैव विसर्पति ।
गन्धकस्य हरिद्रन्धं[2] लवणाम्लञ्च जायते[3] ॥ २१५ ॥
आम्रा पालाशपत्रेण[4] कटुकालावुके[5] क्षिपेत् ।
विषोदकं गन्धकं च हरबीजञ्च तत्समम् ॥ २१६ ॥
अजाक्षीरेण पिष्ट्वा तु[6] शुल्वपत्राणि[7] लेपयेत् ।
तत् पुटेन च[8] देवेशि सिन्दूरारुणसन्निभम् ।
शतांशेनैव देवेशि[9] सर्व्वलोहानि वेधयेत्[10] ॥ २१७ ॥
अनेन विधिना देवि नागः[11] सिन्दूरतां व्रजेत्[12] ।
सहस्रांशेन तस्यैवं[13] तारं वेधं प्रदापयेत्[14] ॥ २१८ ॥

---

(1) D has गोपालकाकारं, which is absurd. M has गोलकारं, which is incorrect. (2) D reads हरेद्ग्धं, which is an error of the scribe. (3) लवणाम्ल जायते, an incomplete variant in D. लवण...मलायते, an incomplete variant in K. लवणं कलिलायते, a variant in M. [लवणा + अम्लञ्च, लवणा = लवणं.] (4) माल्वा पाटलाशपत्रेण, a variant in D, which is not intelligible. तत् ज्ञात्वा फलमात्रेण, a variant in M. (5) D reads कटुकालांचक, which seems to be incorrect. K reads कटुकालांवुके. (6) अजाचौरे गारुप्यात्तु, a variant in D, which is unintelligible. M reads अजचौरेण. (7) D reads पात्राणि, which is incorrect. (8) D reads तत् पुटेनाथ. K reads तत् पुटेनैव. (9) शतेन वै शिवे सर्वं, a variant in D. M reads शतांशेन तु. (10) लोहानि वेधयेद्ध्रुवम्, a variant in D. (11) M reads नागं. (12) K reads सिंधुरतां. M reads व्रजेत्. Both are incorrect. (13) M reads तस्यैव. (14) तारवेधं प्रजापयेत्, an incorrect variant in D. K reads तारे. M reads तारवेधं.

रक्तं पीतं[1] तथा कृष्णमुत्तरोत्तरकार्य्यकृत्॥ २१८ ॥
त्रिपलं कान्तपात्रे वा[2] पात्रेऽलावुमयेऽपि वा[3]।
गृहीत्वा पूर्व्ववत् पत्रैः[4] पालाशैर्वेष्टयेद्बहिः[5] ॥ २२० ॥
स्थापयेद्धान्यराशौ तु[6] दिवसानेकविंशतिम्[7]।
महिषी[8]क्षीरमध्ये तु बिन्दुमेकन्तु साधयेत्[9] ॥ २२१ ॥
पायसं भक्षयेद्यस्तु[10] मध्वाज्येन तु संयुतम्[11]।
यावच्चूर्णपलं[12] देवि जीवेत्तद्बिन्दुसंख्यया[13] ॥ २२२ ॥
लाङ्गली गृहधूमश्च[14] सिन्दूरं[15] रजनीद्वयम्।

---

(1) M reads रक्तपित्तं, which is absurd. (2) D and K read त्रिफला. M reads कान्तपात्रेन. (3) पात्रे जाम्बुमये तथा, a variant in D. K reads erroneously यंत्रोलांबुमये तथा. (4) D reads मन्त्रैः. M reads पात्रे, which is incorrect. (5) पलाशै र्वेष्टयेद्बहिः, an incorrect variant in D. M reads फलांशैरथ वेष्टयेत्, which has no clear sense. (6) M reads धान्यमध्ये तु. (7) दिवसान्येकविंशतिः, an incorrect variant in K. M reads विंशति, which is incorrect. (8) D reads मृष्टी. (9) D reads पाचयेत्. (10) भक्षदेदयस्तु स पयः, a variant in M. (11) पयसा न समायुतम्, a variant in D. यत्रे...धान्यसंयुतं, an incomplete reading in K. (12) D reads यावच्चूर्णं पलं, which is not correct. (13) यावद्बिन्दोश्च संख्यया, a variant in D. यावच्चद्विदसंख्याया, a variant in K. which is unintelligible. जीवन्तत्विन्दुसंख्याया, a variant in M, which is partly correct. (14) D and M read गृहधूमश्च, which is not correct. (15) K reads सिंधूरं.

मेषशृङ्गीं च शृङ्गीं च[1] कृष्णोन्मत्तं च मारकम्[2] ।
सबीजं[3] सूतकञ्चैव विषतोयेन मर्द्दितम्[4] ।
विषतोयेन मेधावी[5] सप्तवारांश्च[6] भावयेत् ॥ २२३ ॥
अथवा भावयेत् तत्तु[7] यावच्चूर्णं तु तद्भवेत् ।
तेन नागं प्रतीवाप्य[8] षोड़शांशेन[9] संभवेत् ॥ २२४ ॥
मूषाख्ये वेणुयन्त्रे च[10] त्रिवारमपि[11] भावयेत् ।
धूमं परिहरेत्तस्य अङ्गव्याधिकरं परम् ॥ २२५ ॥
स्थापयेन्नागसिन्दूरं[12] पात्रेऽलावुमये ततः[13] ।

---

(1) मेषशृङ्गं च शृङ्गं च, a variant in D. मेषशृङ्गं च शृङ्गीं च, a variant in K. मेषशृङ्गिश्च शृङ्गिश्च, a variant in M. (2) K has an incomplete charaṇa—कृष्णो च...च मारकम्. M has कृष्णोन्मत्ताय मारकम्. (3) D reads सुबीजं. (4) विषतोये विमर्द्दितं, a variant in D. M reads मर्दयेत्. (5) K reads erroneously मेधा. M also reads incorrectly मेधावि. (6) All the texts read सप्तवाराणि, which is gram. inc. (7) D and M read तं तु, which is not correct. (8) तेन वा प्रतिवाक्य, an incorrect and incomplete charaṇa in D. K and M read प्रतिवाप्य, which destroys the metre. (9) K has षोड़शांशे...संभवेत्, which is both incorrect and incomplete. (10) सूतं विमर्द्य मन्याणि, a variant in D. मूखाखं वेणु...व, an incomplete variant in K. मूषाखे वेणायन्त्या च, an incorrect variant in M. (11) D reads चारं तु, which is an error of the scribe. K has त्रिणि वाराणि. M has त्रीणि वाराणि. Both are incorrect. (12) K reads भागसिंदूरं. M has an incomplete charaṇa स्थापये... (13) पात्रे सांवूपमेषु च, a variant in D. पात्रेलावुमयेषु च, a variant in K. M has an incomplete charaṇa—मवमये ततः.

तच्चूर्णं तु शतांशेन तारताम्राणि वेधयेत् ॥ २२६ ॥
विषपानीयमादाय[1] यवागौ[2] वर्त्तितं शुभम् ।
निषिक्तं[3] तच्च वर्त्तेऽयं[4] तारं भवति शोभनम् ॥ २२७ ॥
विषपानीयमादाय प्रक्षिपेच्च रसोत्तमे ।
कुनटी-गन्धपाषाण-विषटङ्कण-लाङ्गलि[5] ।
नष्टपिष्टीकृतं खल्ले[6] तारपत्राणि लेपयेत् ।
अन्धमूषा[7]गतं ध्मातं निर्वीजं[8] कनकं भवेत् ॥ २२८ ॥
॥ ॐ श्रीनीलकण्ठाय ठठः[9] ॥ अस्यायुतं जपेत्[10] ॥

॥ इति विषोदकग्रहणमन्त्रः[11] ॥

[विषहरणविधिं वक्ष्ये समाहितमनाः शृणु ॥ २२९ ॥[12]

---

(1) This hemistich and the next five are not found in M. (2) D reads यावागौ. K reads यवगौ. [यवागौ should be यवाग्वाम्.] (3) D reads भिषिक्तं. K reads निशिक्तं. Both are incorrect. (4) D reads वर्त्तोऽयं. K reads वक्तोयं. (5) M reads लाङ्गली. (6) D reads नष्टपिष्टकृतं खल्ले. (7) M reads अन्नमूषा, which is incorrect. (8) D reads नजीवं, which is not correct. (9) D has ॐ नीलकंठाय ठठः. M has ॐ थं क्रीं नीलकण्ठाय ठठः. (10) D has अस्य प्रयुतं जपेत्. K has अस्यायुतं जपतः. M has अस्य मन्त्रस्यायुतं जपं, which is incorrect. (11) विषोदकाग्रहणन्तमन्त्र, a variant in D. अयं विषोदक...हनमन्त्रः, a variant in K. इदं विषग्रहणमन्त्रम्, a variant in M. (12) This विषहरणविधि is not found in M. [It seems to be an interpolation ; since it is not proper to resume औषधिक्रिया in the section of उदकक्रिया.]

गन्धमाचीकदरदं[1] कुनव्या[2] रससंयुतम् ।
विषहृण[3]समायुक्तं मातुलुङ्गाम्ल[4]मर्द्दितम् ॥ २३० ॥
एतत् कल्कं पलमात्रं[5] चौषध्या लेपनं कुरु ।
निर्यासे[6] तु पुटं कुर्य्यात्त्रिवारं हेम शोभनम्[7] ॥ २३१ ॥][8]
सञ्जीवनी[9]जलस्याथ विधिं वक्ष्यामि पार्वति ॥ २३२ ॥
शुक्रेणाराधितो देवि प्रागहं[10] सुरवन्दिते ।
दानवानां हितार्थाय मृतानां देवसङ्गरे ॥ २३३ ॥
मया संजीवनी विद्या[11] दत्ता चोदकरूपिणी[12] ।
तया संजीविता दैत्या[13] ये मृता देवसङ्गरे[14] ॥ २३४ ॥

---

(1) गन्धमाचिमदरदं, a variant in D, wherein the middle term is incorrect. (2) D reads कु मधा. K reads कुनधा, Both of these texts are incorrect. (3) D reads विषत्रय. (4) K reads मातुलिंगाम्ल. (5) D reads कल्कतलेमात्र. K reads एतत्कल्कं र... मात्र. which is incomplete. (6) K reads निर्जने. (7) D reads हेमशोधनम्. (8) This विषहृणविधि ought to have been placed after श्वेतगुञ्जाविधि, i.e. after the śloka 188. But as all the texts except M placed it here, we are compelled to follow them only putting it within brackets. (9) D reads erroneously संचिनी. M reads संजीविनी. After the end of this विधि and before the commencement of उष्णोदकविधि we find in K—संजीवनजल-कल्प: and not संजीवनीजलविधि:. (10) D reads योगिहं. (11) मायासंजीविनीं विद्यां, a variant in D. M reads सञ्जीविनी. (12) D reads चोदकसपंणी. K reads चोदाररूपिणी. M reads बोधकरूपिणी. (13) तया संजीविनी दैत्या, an incorrect variant in D. तथा सञ्जीता दैत्या, an incorrect variant in M. (14) M reads देवसङ्गमे, which seems to be incorrect.

निक्षिप्ता मर्त्यलोके सा[1] सम्यक् ते[2] कथयाम्यहम् ॥२३५॥
अस्ति मर्त्ये महापुण्या[3] पवित्रा दक्षिणापथे[4]।
नदी गोदावरी नाम प्रसिद्धा जाह्नवी यथा[5] ॥ २३६ ॥
दक्षिणे च तटे[6] तस्या: कदलीनगरं परम्[7]।
तस्य दक्षिणत: शैल: सर्व्वलोकेषु विश्रुत: ॥ २३७ ॥
नाम्ना कृष्णगिरिश्चेति[8] दृश्यते सर्व्वमङ्गले[9]।
सुप्रसिद्धाम्बिका नाम ग्राम[10]स्तस्यास्ति सन्निधौ ॥ २३८ ॥
तत्राप्युदक[11]मालोक्य परोक्षेत[12] सुरार्चिते ॥ २३९ ॥
गृहीत्वा शुष्कवंशं तु[13] क्षिपेत्तोयस्य मध्यत:।
जायते हरितं स्निग्ध[14]महोरात्रेण निश्चितम्[15]।

---

(1) निर्जिता मर्त्यलोके सा, a variant in D, which is incorrect. (2) D reads मध्यक्तां, which is incorrect. (3) D has an incorrect reading—माहपुण्या. (4) D reads दक्षिणामथे, which is incorrect. (5) D has यया, which is not correct. (6) M reads तथा. (7) कदलीवनशंकरम्, a variant in D. K reads वरं. M reads उत्पलीनगरं परम्. (8) D has कृष्णा गौरीश्चेति, which is incorrect. (9) D reads सर्वमङ्गलम्. K reads सर्वमंगल:. (10) This word is wanting in D. (11) D reads तत्राप्युदक, which is not accurate. (12) M has an incomplete reading—परीत. (13) M reads शुष्कवल्कलम्, which is not appropriate here. M reads गृहीत्वा, which is not universally correct. (14) K reads हरितस्निग्ध:. (15) महोरात्रौसिञ्चित, an incorrect variant in D. K reads सिंचितं. The term is सिक्तं and not सिञ्चितं, though the latter is proper here.

मुञ्चत्यङ्कुरपत्राणि[1] दृश्यते तन्मनोहरम्[2] ॥ २४० ॥

बलिपुष्पोपहारेण[3] ततो देवीं[4] समर्चयेत् ।

क्षेत्राधिपं गणेशञ्च चण्डयोगीश्वरं तथा[5] ॥ २४१ ॥

तस्य मन्त्रं प्रवक्ष्यामि त्रिषु लोकेषु दुर्लभम् ॥ २४२ ॥[6]

॥ ॐ चण्डाय[7] पिनाकिने शूलहस्ताय ॐ दिशां बन्धय[8] विदिशां बन्धय ठठः ॥

तिलांश्च तण्डुलांश्चैव[9] मन्त्रेणानेन सर्षपान् ।

सप्ताभिमन्त्रितान्[10]कृत्वा साधको दिक्षु निक्षिपेत्[11]॥२४३॥

कटुकालाबुके तोयं[12] कृतरक्षं समाहितः[13] ।

---

(1) भवन्नंकरपत्राणि, a variant in D, which has no clear sense. भवंत्यंकुरपत्राणि, a variant in K. (2) D and K read सुमनोहरम्. (3) D reads पूजोपहारेण. K reads पुष्पोपहारेण. (4) D has देवं, whereas all other texts have देवीं. (5) चन्द्रं योगीश्वरी तथा, a variant in D. चंडो योगीगणैस्तथा, a variant in K. Both are incorrect. चण्डयोगिगणैः सह, a variant in M. (6) This hemistich is not found in D and M. (7) D reads चन्द्राय. M reads चन्द्र, which is incorrect. (8) D and K read बंधर, which is not correct. The remaining portion is not found in M. (9) M reads तण्डुलान् वाथ. (10) All the texts read अभिमंत्रितं; but as the nouns (तिल, तण्डुल & सर्षप) are all in masculine gender, we ought to have the adjective अभिमन्त्रितान्. (11) K reads निःक्षिपेत्. M reads विक्षिपेत्. (12) कटुकालाम्बुतोये, a variant in D. कटुकिलाबुकोयं, a variant in M. The sense of these texts is not clear. (13) D has कृतरक्षासमाहितः. K has कृत्वाच: सुसमाहितः. M has कृतराचसमाहितम्. All the texts seem to be incorrect.

गृहीत्वा तत्प्रयत्नेन[1] निजस्थानं समाश्रयेत् ॥ २४४ ॥

॥ ॐ नमोऽमृतेऽमृतरूपिणि[2] अमृतं मे[3] कुरु कुरु एवं रुद्र आज्ञापयति[4] स्वाहा ॥

सप्ताभिमन्त्रितं कृत्वा मन्त्रेणानेन तज्जलम्[5] ।
दिनमेकं तथा सूतं स्वर्णमाषद्वयान्वितम्[6] ।
मर्द्दयेत्तेन तोयेन पिबेत्तत्तु[7] विचक्षणः ॥ २४५ ॥
एकविंशतिरात्रेण[8] क्षीराहारोऽथ यत्नतः[9] ।
जीवेत् कल्पायुतं साग्रं[10] कामरूपो महाबलः ॥ २४६ ॥
योजनानां[11] शतं गत्वा पुनरेव[12] निवर्त्तते ।
अवध्यः सर्व्वभूतानां स्वेच्छाचारः[13] स खेचरः ॥ २४७ ॥
कनकं पारदं व्योम सममेकत्र योजयेत् ।
मर्द्दयेत्तेन तोयेन सप्तवारं तु स्वेदयेत्[14] ॥ २४८ ॥

---

(1) संगत्वा तत् प्रयत्नेन, a variant in D. M reads गृहीत्वा. (2) D reads रूपिणी, which is gram. incorrect. K reads तर्पिणि. M has नमोमृतबिन्दुरूपिणी, which is incorrect. (3) मे is not found in D. M reads आमृतं. (4) D reads incorrectly रुद्राम्नानापयति. M reads रुद्रो ज्ञापयति. (5) D reads मज्जलम्, which is an error of the scribe. (6) स्वर्णं यावद्वयाचितम्, a variant in D, wherein the second term is incorrect. K reads स्वर्णं माषद्वयान्वितं. (7) D reads तं तु. K reads पवित्रं तु, which seems to be incorrect. (8) M reads रात्रं तु. (9) D has क्षीरहारी प्रयत्नतः. K has क्षीराहारी प्रयत्नतः. Both are partly incorrect. (10) M reads सौम्यः. (11) M reads योजनानि. (12) D reads पुनरेवं. (13) K reads erroneously स्वेचारी. M reads स्वेच्छाहारः. (14) सप्ताहं स्वेदयेत्ततः, a variant in M.

स रसः सर्व्वलोहानि षष्ठ्यंशेन तु वेधयेत्[1] ॥ २४८ ॥
अथवा तं रसं दिव्यं मधुना सह भक्षयेत्[2] ।
माससात्रप्रयोगेण[3] जीवेद्ब्रह्मदिनायुतम्[4] ॥ २५० ॥
तस्य मूत्रमलस्वेदैः[5] शुल्वं भवति काञ्चनम् ॥ २५१ ॥
निर्वाते[6] तोयमादाय अञ्जलि[7]त्रितयं पिबेत् ।
पीतमात्रे भवेन्मूर्च्छा स्वास्थ्यं स्यात् प्रहरत्रयात्[8] ॥ २५२ ॥
एकविंशद्दिनान्येवं[9] क्षीराहारो भवेत्ततः ।
अष्टवर्षाकृतिः प्राज्ञः[10] कामरूपो महाबलः ॥ २५३ ॥[11]
पश्येच्छिद्रां महीं सर्व्वां[12] सप्त[13]पातालसंयुताम् ।
अवध्यो देवदैत्यानां[14] कल्पायुश्च प्रजायते ॥ २५४ ॥

---

(1) षष्टांशेन सुवेधयेत्, an incorrect reading in D. (2) M has this hemistich in an irregular manner—तं रसं दिव्यं मधुना सममेकत्र योजयेत्, repeating the second charaṇa of the 248th. śloka. (3) M reads माससमाप्ययोगेन, which is incorrect. (4) K reads ब्रह्मदिनायुषं. M reads erroneously ब्रह्मवादिना. (5) K has तस्य मूत्रमलैः स्वेदैः. M has श्वेतैः, which is incorrect. (6) K has only निवा. (7) K reads अंजलौ, which is incorrect. (8) स्वमध्य स्यात् प्रहरत्रये, an incorrect reading in D. श्वासं स्यात् प्रहरद्वयम्, a variant in M, wherein the first term is incorrect. (9) D reads erroneously एकविंशादिनान्येदं. (10) D reads वालो instead of प्राज्ञः. M reads द्वाष्ट instead of अष्ट. (11) After this śloka, we find in D only the 247th śloka repeated. Hence we have not adopted it. (12) K has an incomplete charaṇa पश्ये ...द्रा महि सर्वां. (13) K reads सर्वं instead of सप्त. (14) D has दैवदैवानां, which is not correct. M has दैवतैयापि.

अथवोदक[1]मादाय पारदञ्च[2] मनःशिलाम् ।
मर्द्दयेत् खल्लपाषाणे[3] नष्टपिष्टं भवेत्ततः ॥ २५५ ॥
स्वेदयेत् सप्तरात्रं तु त्रिलोहेन च वेष्टयेत् ॥ २५६ ॥
अन्तर्द्धानं क्षणाद्गच्छेत् विद्याधरपतिर्भवेत्[4] ।
सिद्धकन्याशतव्रतो[5] यावत् कल्पान् चतुर्द्दश[6] ॥ २५७ ॥
दिनेषु तेषु सर्व्वेषु दद्याच्छाल्योदनं घृतम् ।
पयसा च समायुक्तं नित्यमेवं तु[7] कारयेत् ॥ २५८ ॥
उष्णोदकविधिं वक्ष्ये समाहितमनाः शृणु ।
पश्येदुष्णोदकं[8] यत्र वासं तत्रैव कारयेत् ॥ २५९ ॥
अस्ति गोदावरी नाम महाराष्ट्रे[9]ऽतिविश्रुता ।
तस्या उत्तरभागे तु सह्याद्रिः पुण्यपर्व्वतः[10] ॥ २६० ॥

---

(1) D reads अथ चोदक. (2) D reads मारीचं तु. (3) The word खल्ल is not found in D. All other texts read खल्व. (4) विद्याधरयतिर्भवेत्, a variant in D. विद्याधारपतिर्भवेत्, a variant in K. (5) D reads प्राप्तव्रती. (6) D and K read कल्पचतुर्दश. (7) M reads सत्यमेवन्तु. After this charaṇa we find the following three hemistichs in K only, which we have not adopted on account of their erroneousness and redundancy. They are as follow:—ते सर्वे पुरुषास्तस्य दर्शनाय गविचितां । ताः कनाय स्तं दद्युः सिद्धकामो भवेन्नरः । वलीपलितनिर्म्मुक्तो जीवेच्चंद्रार्कतारकं । इति विषोदकसंजीवनजलकल्पः । (8) M has भवत्युष्णोदकं. (9) D reads महाराष्ट्रे. This hemistich and the following seven ones are not found in M. (10) D has सह्याद्री पुण्यपर्वतः, wherein the first word is incorrect. K has सह्याद्रिः पुण्यपावनः, wherein also the first word is incorrect.

तत्र मातापुरं[1] नाम प्रसिद्धं देवतागृहम् ।
तस्मादुत्तरतो देवि कम्माख्यं नगरं[2] परम् ॥ २६१ ॥
तत्र कम्मेश्वरो देव[3]स्तत्रास्त्युष्णोदकं[4] ध्रुवम् ।
प्रणीताख्या[5] नदी तत्र स्नात्वा वै साधकोत्तमः ।
पश्चादुष्णोदके कुण्डे विधिं कुर्य्याद्यथोदितः[6] ॥ २६२ ॥
शर्व्वरीमुषितस्तत्र[7] धनवांश्च[8] दिने दिने ।
भक्षयेन्मासमात्रं तु जीवेद्वर्षशताष्टकम्[9] ॥ २६३ ॥
वर्षमेकं प्रयुञ्जीत[10] जीवेद्वर्षायुतं सुखी[11] ।
वलीपलितनिर्मुक्तो भोगी चैव पुरन्दरः[12] ॥ २६४ ॥

---

(1) D reads मानापुरी. (2) D reads नागरं, which seems to be incorrect. (3) Both D and K read देवो, which is gram. inc. (4) ततान्युष्णोदकं is the reading in D. (5) D reads प्रोणीताख्या, which seems to be incorrect. (6) D reads यथेरितः. (7) सर्व्वरीमूषिते तत्र, a variant in D. शर्व्वरीमूषिता तत्र, a variant in K. सर्व्वरीमुषिता तत्र, a variant in M. None of the readings is perfectly correct. (8) D reads धनं कांश्चित्. K reads श्वणकांश्च. Both are inc. M leaves a blank space here. (9) M reads वर्षसमाष्टकम्, which seems to be an error of the scribe. (10) K reads only प्रयुं and omits जीत. (11) This charaṇa and the next three are not found in M. (12) भावी च सम्प्रवेशतः, a variant in D. After this we have एकगुणेन सूतेन &c., (9th śloka), which occurs in the beginning of the fourteenth Paṭala. Hence the MS. D is wanting the remaining portion of this twelfth Paṭala and the whole of the thirteenth Paṭala, as well as the first eight ślokas of the fourteenth Paṭala.

वर्षमेकं पिबेत्तोयं[1] जीवेच्चन्द्रार्कतारकम् ।
तस्य मूत्रपुरीषेण[2] शुल्वं भवति काञ्चनम् ॥ २६५ ॥
उष्णोदकञ्च कासीसं[3] गन्धपाषाणसंयुतम् ।
चतुर्थांशेन रसकं दशभागं विनिक्षिपेत्[4] ॥ २६६ ॥
शुल्वञ्च मर्द्दयेत् सर्व्वं नष्टपिष्टं क्षणेन तु[5] ।
तेन लेपितमात्रेण शुल्वं भवति काञ्चनम् ॥ २६७ ॥
निषिक्तं तेन तोयेन प्रतिवापं ददेद्बुधः[6] ।
शुल्वञ्च जायते हेम तरुणादित्यवर्चसम्[7] ॥ २६८ ॥
तज्जलेन निषिक्तञ्च हेम बीजार्थसंयुतम् ।[8]
तारं चानेन मार्गेण[9] निषिक्तं हेमतां व्रजेत्[10] ॥ २६९ ॥
उष्णोदकेन भल्लातं तिलपिष्टं[11] च भक्षयेत् ।
मासद्वयप्रयोगेण[12] जीवेद्वर्षशतत्रयम् ॥ २७० ॥
रसगन्धाभ्ररसकं[13] तुत्थं[14] दरदमाक्षिकम्[15] ।

---

(1) This charaṇa is not found in M. (2) M reads मूत्रपुरीषाभ्यां. (3) K reads काशीसं. (4) K reads विनिःक्षिपेत्. (5) K reads क्षयेण तु. (6) ददेत् is an ungrammatical term. दद्यात् is the proper one. (7) 'तत्क्षणाद्दिव्यशोभनं, a variant in M. (8) This hemistich is not found in M. (9) K reads erroneously मार्णगं. (10) M reads ब्रजेत्, which is incorrect. (11) K reads तिलमुष्टिं. (12) M has मासद्वयप्रयोगजात्, which is incorrect. (13) रसकन्धाभ्ररसकं, a variant in M. (14) K reads तुल्यं. (15) K reads माक्षिया, which is incorrect.

याम[1]मुष्णाम्भसा घृष्टं तारपत्राणि लेपयेत् ॥ २७१ ॥
द्विवारं तु धमेद्देवि[2] स्याच्चतुर्द्दशवर्णकम् ।
क्रमेणानेन देवेशि शुल्वं षोड़शवर्णकम् ॥ २७२ ॥
एकैकं हेमताराशं द्वन्द्वं[3] कान्ताभ्रयोः पृथक् ।
उष्णोदकेन संमर्द्य[4] धमनात् खोटतां व्रजेत्[5] ॥ २७३ ॥
तन्मुखे धारयेन्मासं[6] वज्रकायो भवेन्नरः ।
तच्चूर्णं यवमात्रं तु[7] भक्षयेन्मधुसर्पिषा[8] ।
यावत् पलं तस्य मलैः[9] शुल्वं भवति काञ्चनम् ॥ २७४ ॥
उष्णोदपाचितान् खादेत्[10] कुलत्थान् क्षीरपो[11] भवेत् ।
स्नानमुष्णाम्भसा कुर्य्यात् वर्षाद्दर्शशतायुषम्[12] ॥ २७५ ॥
क्षीरमुष्णोदकं क्वाथं[13] त्रिफलायाश्च पाचयेत्[14] ।

---

(1) M reads धाम, which seems to be incorrect. (2) M has विश्राम्य तु भवेद्देवि. (3) K reads द्वयं. (4) M reads संमर्द्यात्. (5) B (which resumes from this verse) reads भवेत्. K reads खोड़कां, which is incorrect. M reads घोटतां भवेत्, which is partly correct. (6) B reads erroneously तन्मुखधारयेन्मास. (7) K has पंचमात्रं तु. M has तच्च instead of तच्चूर्णं. (8) M reads मधुना सह. (9) K reads याव्पलं तस्य मलैः, which is incomplete. M reads यावत् फलं तस्य फलैः. (10) उष्णोदकपचिता भूर्जे, a variant in B, which has no clear sense. उष्णोदयोचितान् is the reading in K, which is partly incorrect. M reads उष्णोदपाचितात्, which is incorrect. (11) B and K read क्षीरयो, which is an error of the scribe. K reads कुलत्वां, which is incorrect. M reads कुलुत्थान्. (12) K reads शतायुषो. (13) क्षीरमुष्णोदकक्वाथं, an incorrect variant in M. (14) K reads पाचनं.

पायसं कान्तपात्रे तन्मासमेकन्तु भक्षयेत्[1] ।
भुक्त्वा जीवेत् शतकल्पं[2] वैष्णवायु[3]र्भवेन्नरः ॥ २७६ ॥
अतः परं प्रवक्ष्यामि शैलोदकविधिं प्रिये ।
कर्दमापो महीशैलं[4] शिलश्चेति[5] चतुर्विधम् ॥ २७७ ॥
कानिचित् क्षणवेधीनि दिनवेधीनि कानिचित् ।
पक्षमासादिषण्मास[6]-वेधनानि[7] महीतले ॥ २७८ ॥
क्षिप्तं यदा[8] भवेत् काष्ठं शैलीभूतं च[9] दृश्यते ।
वहिरन्तश्च देवेशि[10] वेधकं तत् प्रकीर्त्तितम् ॥ २७९ ॥
हिङ्गुलं हरितालञ्च गन्धकञ्च मनःशिला ।
एषां गन्धापहारं यत्[11] कुरुते तच्च वेधकम्[12] ॥ २८० ॥
गन्धकं तालकञ्चैव तोयपूर्णे घटे क्षिपेत् ।[13]

---

(1) मासमात्रं तु is the reading in K. मासं भुक्त्वा महायुषः is the reading in M. (2) B has जीवेद्वर्षशतं कल्पं. This charaṇa and the next one are not found in M. (3) B reads विष्णुरायु, which is incorrect. K reads विष्टवायु, which is also incorrect. After this śloka we find in K only—इति उष्णोदककल्पः । अथ शैलोदककल्पः । (4) B reads महाशैलं. K reads दर्कमा...महिशैलः, which is incomplete. M reads कच्चमापो महीशैल. It is called afterwards भूशैल. (see verse 286). (5) B and K read शीलश्चेति. (6) पक्षमासादिषण्मासा, a variant in K. (7) K reads वेधकानि. (8) K reads क्षिप्रं, which is incorrect. M reads यथा, which is also incorrect. (9) K reads तु. (10) M reads erroneously देवेशी. (11) K reads तु. (12) B reads कुरुते च वेधकं, which is incomplete. K reads क्षिप्रकम्. M reads erroneously तत्र वेधश्च वेधकम्. (13) This śloka, (281) is not found in M.

यदा तद्बुद्बुदाकारं[1] तदा शैलोदकं भवेत् ।
अन्यथा वेष्टकं[2] देवि तदग्राह्यं निरर्थकम् ॥ २८१ ॥
श्रीशैले श्रीवनप्रान्ते[3] पर्य्यङ्काख्ये[4] शिलातले ।
तत्रस्थं क्षणवेधि[5] स्यात् नदीभगवतीतटे[6] ।
एकाह्ने वेधकं तत्र[7] गोकर्णे तु दिनत्रयम् ॥ २८२ ॥
भद्राङ्के[8] दिनवेधि स्यात् त्रिस्थलान्ते त्रिवासरम् ।
धारेश्वरे[9] पाक्षिकं स्यात् वर्षापुर्य्यां[10] दिनैकतः ॥ २८३ ॥
ब्रह्मेश्वरे मासिकं स्यात् व्याघ्रपुर्य्यान्तु[11] वासरम् ।
अघोरेशे मासिकं तु[12] सिंहद्वीपे[13] तथा पुनः ।
दिनैकं ब्रह्मगिरौ विन्ध्ये तु क्षणवेधकम् ॥ २८४ ॥
वासरं माल्यवन्तेषु[14] क्षणवेधि शिलोदकम्[15] ॥ २८५ ॥

---

(1) यदा तद्दाकारं, an incomplete variant in B. (2) M reads वेष्टनं. (वेष्टक=निर्य्यास). (3) B reads श्रीवने प्रान्ते. M reads श्रीशैल. (4) M reads पर्य्यङ्काख्य. (5) All the texts read क्षणवेधी, which is grammatically incorrect. (6) B reads नद्यां भवतीतटे, which is incomplete. K reads नद्यां भगवतीतटे, which is incorrect. M reads अद्या भगवतीतटे, wherein the first term is unintelligible. (7) K reads एकाहं वेधयेत्तत्र. (8) K reads तत्रस्थं. M reads चन्द्राङ्के. (9) M reads तारेश्वरे. (10) B reads पार्श्वहर्म्यां. This charaṇa and the next one are not found in M. (11) B reads व्याघ्रपूय, which is incorrect. (12) अघोरेशे तु मासिकं, a variant in M. (13) B reads सिद्धद्वीपे. (14) वासरं...ल्यकर्णे च, an incomplete variant in K. M reads माल्यवन्दे तु. (15) B and M read क्षणवेधी तु तत्र च. K reads लक्षवेधी शिलोदकं, wherein the first term is incorrect.

किष्किन्ध्या[1]पर्व्वते रम्ये पम्पातीरे लवणोदकम्[2] ।
तस्य पश्चिमतो देवि योजनद्वितये पुनः ।
भूशैलमस्ति तत्रैव त्रिदिनं वेधि पर्व्वते[3] ॥ २८६ ॥
सह्याचले पुरे देव्याः चोरचैत्रस्य सन्निधौ ।
शैलोदकं कोटिवेधि दुर्जदेशेऽपि वासरम् ।
लक्षवेधि नृसिंहस्य नगरे गोकुलाभिधे ॥ २८७ ॥[4]
अन्यत्र यत्र तत्रापि ब्रह्मविष्णुशिवोद्भवम् ।
अमृतं तत्र तत्रापि वज्रीकरणमुत्तमम् ॥ २८८ ॥
तस्योत्पत्तिं प्रवक्ष्यामि यथा जानन्ति साधकाः ॥ २८९ ॥
महीं समुद्धृतवतो वराहस्य कलेवरात् ।
यः स्वेदः पतितस्तस्माज्जातं शैलोदकं परम् ॥ २९० ॥
तन्मुखे क्षणिकं जातं क्रोड़देशे[5] तु वासरम् ।
बाहुभ्यां त्र्यहवेधि[6] स्यात् मासवेधि तु पार्श्वयोः[7] ।
षण्मासमपराङ्गे च[8] सर्व्वं समफलं भवेत्[9] ॥ २९१ ॥

---

(1) B reads किष्किंध. K reads किष्किंधे. (2) B and K read चणोदकं. (3) B has वेध पार्वति, which seems to be incorrect. (4) The portion commencing from सह्याचले and ending in गोकुलाभिधे is found only in MS. K. (5) B reads कंवंदेशे ( probably कम्बुदेशे ). This charaṇa is not found in M. (6) B and M read त्रय, which seems to be incorrect. (7) K reads खर्पयोः. M reads माससेकन्तु. (8) B has an incomplete charaṇa षण्मासपराङ्गे च. (9) M reads समफलञ्च तत्.

अघोरास्त्रेण तत्चेत्र[1]रक्षां कृत्वा दिशां बलिम्[2] ।
दत्त्वा लक्षं जपित्वा तु[3] गृह्णीयादमृतं परम् ॥ २८२ ॥
शरद्ग्रीष्मवसन्तेषु हेमन्ते वा सुरार्चिते[4] ।
आयसे ताम्रपात्रे वा[5] पात्रेऽलाबुमयेऽथवा[6] ।
शैलाम्बुपलमष्टौ तु[7] पलं क्षीरस्य निक्षिपेत् ॥ २८३ ॥
क्षीरावशेषं संक्राथ्य[8] त्रिसप्ताहं पिबेन्नरः[9] ।
जीवेद्वर्षसहस्रं तु[10] वलीपलितवर्जितः ॥ २८४ ॥
अथवाष्टपलं[11] क्षीरं पलैकेनाम्बुना युतम्[12] ।
क्षीरावशेषं सेवेत[13] पूर्वोक्तं लभते[14] फलम् ॥ २८५ ॥
कुलत्थाष्टगुणं[15] वारि पचेदष्टावशेषितम् ।
चतुर्गुणेन तेनाज्यं[16] पाचयेद्घृतशेषितम्[17] ॥ २८६ ॥

---

(1) अहोरात्रेण तत्चेत्र, a variant in K. (2) K has कृत्वा दिवलिं, which is incomplete. (3) K reads जपं कृत्वा. This charaṇa is not found in M. (4) M has सुरार्चितम्, which is incorrect. (5) अयस्के ताम्रपात्रे व, an incorrect reading in M. (6) B reads erroneously पात्रे कलांबुमयेथवा. K reads तत्रैलांबुमयेथवा, which seems to be incorrect. (7) शैलोदकं पलमष्टौ, a variant in K. (8) K reads संक्राथ्यं. कृत्वावशेषं तत्क्राथं, a variant in M. (9) M reads भवेन्नरः, which is incorrect. (10) M reads वर्षसहस्राणि. (11) B and M read अथवाष्टफलं, which is incorrect. (12) All the texts read पलैकेनाम्बुमिश्रितम्, which is not gram. correct. (13) B reads erroneously सेवेनि. (14) M reads फलते, which is incorrect. (15) K reads कुलस्थाष्टगुणं, which is incorrect. (16) K reads erroneously तानाज्यं. (17) पाचयेच्च पुनर्घृतं, a variant in K.

लिह्यान्मधुसमोपेतं[1] त्रिसप्ताहं बृहस्पतिः[2] ।
मासेन शास्त्रसम्पत्तिं[3] ज्ञात्वा देवि बलाबलम्[4] ।
द्विरष्टवर्षकाकारः[5] सहस्रायुर्न संशयः[6] ॥ २९७ ॥
अवशिष्टकुलत्थं तु[7] पादांशं मधुसर्पिषा[8] ।
भक्षयेद्वर्षमेकन्तु[9] मासेनायुतजीवितः[10] ॥ २९८ ॥
तत्सिद्धतैलेनाभ्यङ्गं मर्द्दनञ्चापि कारयेत्[11] ।
मासमेकं ततो मर्त्यं[12] देहसिद्धिं करोति च ॥ २९९ ॥
पामाविचर्चिकादद्रु[13]कुष्ठानि सहसा जयेत्[14] ।
वलीपलितनिर्मुक्तः सहस्रायुश्च जायते[15] ॥ ३०० ॥

---

(1) B has लिह्यन्मधुसमोपितं. K has लिह्यान्मधुसमपीतं. M has लिह्यान्मायु-समोपितं. None of the readings is perfectly correct. (2) M reads त्रिसप्ताहमहर्पतिः. (3) B has समेन सर्वसम्पत्तिः, wherein the first term is incorrect. We do not find this charaṇa and the next in M. (4) सत्वदेवी वलं वलं, a variant in B, which seems to be incorrect. (5) K reads द्विरष्टावर्षकाकारः. M reads द्विरष्टवर्षकाकारं, which is incorrect. (6) K has संस्राज़ुन संशयः, which is incorrect. (7) K reads कूलत्थं, which is incorrect. (8) K has पादांशमधुसर्पिषां. M has पादांशमधु-सर्पिषा. (9) B and K read कर्षमेकन्तु. (10) मासेनायुतजीवति, an incorrect variant in B. मासेनायुतजीविनः, a variant in K, wherein the last term is incorrect. (11) सर्वदेहेषु कारयेत्, a variant in B. K reads भक्षणं [perhaps मक्षणं] चैव कारयेत्. (12) B and K read मर्थं, which is gram. inc. This charaṇa and the next one are not found in M. (13) M reads दग्ग instead of दद्रु, which is incorrect. (14) B reads erroneously सह योजयेत्. (15) K reads सहस्रायुः प्रजायते.

यः पिबेत् प्रातरुत्थाय शैलाम्बुचुलुक[1]त्रयम् ।
षण्मासात् स्यात्[2] सहस्रायुर्वलीपलितवर्जितः[3] ॥ ३०१ ॥
अथवा सूतकं देवि वारिणा सह मर्द्दयेत् ।
मासैनैकेन देवेशि नष्टपिष्टं भविष्यति ॥ ३०२ ॥
माससमात्रं समश्नीयात्[4] स भवेदजरामरः[5] ॥ ३०३ ॥
अथवा तं रसं हित्वा[6] हेमभस्म ततो बली[7] ।
मर्द्दयेत्तेन तोयेन धामयेत् खदिराग्निना ॥ ३०४ ॥
गुटिका सुन्दरी नाम[8] सर्व्वायुधनिवारणी[9] ।
कर्त्ता हर्त्ता स्वयं सिद्धो जीवेच्चन्द्रार्कतारकम् ॥ ३०५ ॥
कुनटी चाभ्रमाक्षीकं[10] हेम तारं तथैव च ।
तत् सर्व्वं पयसा क्षीरैर्मर्द्यं पाच्यं दिनत्रयम् ।
मासमात्रप्रयोगेण वलीपलितवर्जितः[11] ॥ ३०६ ॥

---

(1) All the texts read चुलक, which no lexicon supports. (2) B reads षण्मासं. स्यात् is wanting in M. (3) निर्वलीपलितश्च सः, a variant in B. K reads वलि. (4) B reads तमश्नीयात्, which is incorrect. K reads माससमात्र' तु मश्नीयात्, which is incorrect. (5) स भवेदमराजरः, a variant in K. (6) B has अथवा पाचीतं रसं हित्वा, which mars the metre and sense. (7) This charaṇa and the next one are not found in K and M. (8) B and M read गुलिका. M reads erroneously सुन्दरीरीणां. (9) सर्वायुधनिवारणम्, a variant in M, which is not correct. K reads निवारिणी. (10) This charaṇa and the next five ones are not found in K and M. After these charaṇas, we find in B the ślokas 302 and 303 again repeated. (11) We find in B the first letter मा out of the whole hemistich.

अथ तेनोदकेनैव क्षीराढ्यं पायसं पचेत् ।
माममात्रप्रयोगेण बलीपलितनाशनम् ॥ ३०७ ॥
पक्का[1] तेनाम्भसा पथ्याः षष्टिं[2] त्रीणि शतानि च ।
मधु संयोज्य भाण्डस्थं[3] भूमौ सर्व्वं निधापयेत् ॥ ३०८ ॥
दिने दिने तथैकैकं भक्षयेत् प्रातरुत्थितः[4] ।
बलीपलितनिर्मुक्तो जीवेद्दर्षसहस्रकम् ॥ ३०९ ॥
शैलीभूतं कुलत्थं वा[5] भक्षयेन्मधुसर्पिषा[6] ।
षण्मासेन प्राशनेन[7] जीवेद्दर्षसहस्रकम् ॥ ३१० ॥
कुष्माण्डं मारितं कृत्वा[8] यानि कानि[9] फलानि च ।
जले क्षिप्तानि लोहानि शैलीभूतानि[10] भक्षयेत् ।
क्षीराहारश्च[11] जीर्णान्ते वज्रकायो भवेन्नरः ॥ ३११ ॥
तेनोदकेन संमर्द्य अभ्रकं[12] क्वाथयेत् प्रिये ।

---

(1) B reads पक्कां and पथ्या. Both of them are incorrect. (2) B reads षष्टी. K and M read षष्टि. Both are incorrect. (3) K has मधुना योज्य भाण्डस्थं, wherein the middle term is incorrect. M reads भाण्डीत्थं, which is inaccurate. (4) M reads पुनरुत्थितः. (5) This śloka (310) is not found in K. M has शैलिभूतं कुलस्थं वा, which is incorrect. (6) M reads मधुसर्पिषम्, which is not correct. (7) B reads प्रवेशेन. M reads षाण्मासापदशेन, which has no sense at all. (8) All the texts read कूष्माण्ड, which is also correct. K reads मरिचं कृष्णा, which is not correct. (9) K reads जातिकानि, which is incorrect. (10) B reads शैलीभूनिनि, which is incorrect. M reads erroneously श्रिभुतानि. (11) K reads चौराहारं च, which seems to be incorrect. (12) M has संमर्थ्यसभकं.

कटुत्रययुतं खादेत् जीवेद्दर्षसहस्रकम् ॥ ३१२ ॥
अथवा रसकर्षैकं तज्जलेन तु[1] मर्द्दयेत् ।
इङ्गुदी[2]फलमध्यस्थं तच्छैलोदकमध्यगम्[3] ।
कालेन[4] त्रिगुणेनैव काठिन्यं तस्य जायते ॥ ३१३ ॥
षण्मासं तन्मुखे धार्य्यं[5] वज्रकायं करोति च[6] ।
दशनागसमप्राणो[7] देवैः सह च[8] मोदते ॥ ३१४ ॥
गृहीत्वा त्रिफलां[9] तत्र शैलवारिणि निक्षिपेत्[10] ।
यदा भवति तच्छैलं[11] गृहीत्वा चूर्णयेत्ततः[12] ॥ ३१५ ॥
कान्तजीर्णरसं[13] तेन सार्द्धं घृत[14]मधुप्लुतम् ।
भक्षयेद्दर्षमेकन्तु[15] ततः चीराशनो[16] भवेत् ॥ ३१६ ॥
उदयादित्यसङ्काशो मेधावी[17] प्रियदर्शनः ।

---

(1) B reads तं जलेन तु, which is incorrect. (2) M reads हिङ्गुदी, which is not correct. (3) तत् सैलोदकमध्यगं, a variant in B. ततः शैलोदमध्यगम्, a variant in M. (4) K reads कांत्वेन, which has no clear sense. (5) K reads तु सुखे. M reads कार्य्यं. (6) B reads तत्. (7) M has an incorrect reading यद्दशनागसंप्राणो. (8) च is wanting in B. M has देवैश्च सह मोदते. (9) M has ग्रहीत्वा त्रिफलं, which is not perfectly correct. (10) K reads निःक्षिपेत्. (11) तदा भवति तच्चैलं, an incorrect variant in M. (12) B reads गृहीत्वा चूर्णयेनतः, wherein the last term is incorrect. M reads ग्रहीत्वा, which is not perfectly correct. (13) B has कांतं जीर्णं रसं. (14) M reads स्रुतं, which seems to be incorrect. (15) B and K read कर्षमेकं तु. (16) B reads erroneously चीरासनो. (17) K reads मेधावान्.

नीलकुञ्चित[1]केशश्च जीवेच्चन्द्रार्कतारकम्[2] ॥ ३१७ ॥
पारदं हरितालं च शिला माक्षिकमेव च ।
दरदं च विषं चैव सर्व्वमेकत्र कारयेत्[3] ॥ ३१८ ॥
मर्द्दयेत् खल्लपाषाणे[4] मातुलुङ्ग[5]रसेन च ।
गोलकं कारयित्वा तु[6] वारिमध्ये निधापयेत् ॥ ३१९ ॥
तेन तारं च[7] शुल्वं च काञ्चनं भवति ध्रुवम् ॥ ३२० ॥
उपयुञ्जीत मासैकं वलीपलितवर्जितः ।
सहस्रं जीवितं[8] तस्य महाबलपराक्रमः ॥ ३२१ ॥
शैलीभूतां हरिद्रां तु तच्चूर्णवापमात्रतः[9] ।
हेमत्वं लभते नागो बालार्कसदृशप्रभम्[10] ॥ ३२२ ॥
शैलोदके विनिक्षिप्य[11] भूशैले कर्द्दमेऽपि वा[12] ।

---

(1) B reads erroneously निल. K reads imperfectly नीलसित. (2) B reads तार्कं, which is an error of the scribe. (3) M reads योजयेत्. (4) All the texts read खल्लपाषाणे. (5) B reads मातुलिङ्ग. K reads मातुलंग. (6) विधा च धमयित्वा तु, a variant in M. (7) B and K read तेनांतरे च, which has no clear sense. (8) सहस्रजीवित is the reading in B and M. (9) We have only पमात्रतः of this hemistich in M. B and K read तच्चूर्णं वापमात्रतः, which is not accurate. (10) B and K read बालार्कसदृशं प्रभं, which is grammatically incorrect. (11) B reads विनिक्षिप्यं, which is incorrect. K reads विनिलिप्य, which is also incorrect. (12) भूशैलकर्द्दपि वा, an incomplete variant in B. भूषैले यवमे मेपिवा, an incorrect variant in K. भूशैले मर्द्दयेच्च वा, an incorrect reading in M. (For भूशैल and कर्द्दम see verse 277.)

ज्ञात्वा कालप्रमाणेन बन्धयेत्[1] पारदं ततः ॥ ३२३ ॥
रक्तक्षारयुतं ध्मातं सुवर्णं समसारितम्[2] ।
शतांशेन तु लोहानां सर्व्वेषां हेमकारकम्[3] ॥ ३२४ ॥
द्वितीयसारणां[4] प्राप्य भक्षयेन्मधुसर्पिषा[5] ।
तत्कालं चित्तजातानां[6]मूर्द्धं भवति चानिलः[7] ॥ ३२५ ॥
कालज्ञानं भवेत्तस्य जीवेदयुतपञ्चकम् ॥ ३२६ ॥
द्वितीयसारणां प्राप्य सहस्रांशेन विध्यति[8] ।
तं खोटं[9] धारयेद्वक्त्रे दिव्यत्वं लभते ध्रुवम्[10] ॥ ३२७ ॥
निचुले[11] ककुभे चैव किंशुके मधुकेऽपि वा[12] ।
इङ्गुदी[13]फलमध्ये वा रजनीद्वयमध्यतः[14] ॥ ३२८ ॥

---

(1) M reads बद्धयेत्. (2) K reads समसावितं. M reads समवारितम्. (3) B has an incomplete charaṇa सर्वेषां वेधकं. M reads मारकम्. (4) B and K read सारणं. (5) This charaṇa and the next four ones are not found in M. (6) तत्कालचित्तज्ञानां, an incomplete variant in K. (7) K reads चानिले. (8) M reads विन्दति. (9) B reads तत्खोटं. M reads तं शैलं. (10) M has an incorrect variant—लव्यत्वं लभते ध्रुवम्. (11) K reads निवजे. M reads निचुलै. Both appear to be incorrect. (12) K reads च. M reads erroneously किंशुकै मधुकै पि वा. (13) This hemistich and the next one are not found in K. M reads हिङ्गुदी, which is incorrect. (14) रजनी चैव टंकने, a variant in B. M reads मध्यगे, which is not correct. After this charaṇa we have a śloka in this text only which runs thus —अम्रते कन्दके वाथ उन्नकन्दौषधौ तु च। विधाय वाटकन्तत्र विप्रा तेनैव सांधयेत् ॥ which we have not adopted for its incorrectness.

पारदं गन्धकं चैव मर्द्दयेत् गुलिकाकृति[1] ।
पाचयेद्दिनमेकं तु[2] हेम्ना संवेष्ट्य धारयेत् ॥ ३२९ ॥[3]
त्रिफलाव्योष[4]कल्केन वेष्टयित्वा प्रयत्नतः ।
पादेन[5] कनकं दत्त्वा पारदं तत्र योजयेत्[6] ।
त्रिपिच्छैलाम्बुमध्यस्थं[7] गुलिका वज्रवद्भवेत् ॥ ३३० ॥
पूर्व्ववत् सारणा कार्य्या[8] पूर्व्ववत् सिद्धिदा भवेत् ।
धार्य्यमाणा मुखे सा तु सहस्रायुष्करी भवेत्[9] ॥ ३३१ ॥
द्वितीय[10]सारणायोगादयुतं वेधयेत्तु[11] सा ।
धार्य्यमाणा मुखे सेय[12]मयुतायुःप्रदा भवेत् ॥ ३३२ ॥
तृतीय[13]सारणायोगाज्जायते लक्षवेधिनी[14] ।
तं खोटं[15] धारयेद्वक्त्रे लक्षायुर्जायते नरः ॥ ३३३ ॥

---

(1) B reads गुलिकाकृतिः, which is inaccurate. (2) K reads erroneously पाचयेद्दिनमेकं तु. (3) This śloka is not found in M. (4) B has व्याष. M has मेष. Both are incorrect. (5) M reads वादेन, which is absurd. (6) पादं तत्र प्रयोजयेत्, a variant in M. (7) B has त्रिपेतालांबुमध्यस्थं, which has no sense. M reads मध्यस्था, which is also correct. (8) B reads सारणा कार्य्यं, which is incorrect. (9) This hemistich is not found in B. K reads सहस्रायुः-करी. (10) M reads द्वितीया, which is incorrect. (11) K reads दायुतं साधयेत्तु, which is not accurate. (12) K reads सुखस्येय, which is incorrect. M reads मुखे सैव. (13) M reads तृतीया, which is incorrect. (14) B has लक्षमेधिनी, which is incorrect. K has लक्षवेधनी. (15) B reads कोटं. M reads वोढं. Both are incorrect.

चतुर्थीं सारणां[1] प्राप्य कोटिवेधो[2] न संशयः ।
कोट्यायुर्जीवितं[3] तस्य खेचरत्वं च लभ्यते[4] ॥ २३४ ॥
पञ्चभिर्दशकोटिः स्यात्[5] षड्भिः कोटिशतं भवेत्[6] ।
यावच्चन्द्रार्कजीवित्व[7]मनन्तबलवीर्य्यवान् ॥ २३५ ॥
ददाति सप्तमीं सापि[8] सारणां गुटिका परा ।
खेचरी नाम विख्याता भैरवेण प्रचोदिता ॥ २३६ ॥
यस्तु तद्राजिकामात्रं मासमेकन्तु भक्षयेत् ।
वज्रदेहः स सिद्धः[9] स्यात् दिव्यस्त्रीजनवल्लभः ।
क्रीड़ते खेचरैर्भोगैः[10] स्वेच्छया[11] शिवतां व्रजेत् ॥ २३७ ॥
नानाविधफलं च स्यात्[12] तद्रसैर्वीजतैलतः[13] ।

---

(1) B and K read erroneously चतुर्थीसारणां. M reads चतुर्थसारणां. (2) B and M read कोटिवेधो. K reads कोटीवेधी. Both the texts seem to be incorrect. (3) B reads कोट्यायु जीवितं. K reads कोट्यायुर्जायते. (4) M reads खेचरत्वं भविष्यति. (5) K reads पञ्चमे दशकोटी स्यात्. (6) षष्ठे कोटीशतं भवेत्, a variant in K. M reads कोटिक्रमं भवेत्, which is incorrect. (7) K reads जीवीत्व, which is grmmatically incorrect. (8) B reads सप्तमी चापी. K reads सप्तमी सापी. M reads सप्तमचापि. All are incorrect. (9) B reads ससिद्धिः. M reads वज्रदेहस्य सिद्धिः. (10) K reads खेचरे भोगैः. (11) M reads स्वच्चया, which is incorrect. The verb क्रीड़ते, though used in all the texts, is grammatically incorrect. The proper term is क्रीड़ति. (12) फलश्चान्या is the reading in B, which is incorrect. नानाविधिफलं चास्यात्, an incorrect variant in K. M reads erroneously फलान् चान्यान्. (13) K reads तद्रसैवीजतैलतः, which is partly incorrect. This charana and the next one are not found in M.

तद्वद्वं पारदं[1] चैव गुटिकां[2] शृणु सुन्दरि ॥ ३३८ ॥
शुद्धबद्धरसेन्द्रस्तु[3] गन्धकं तत्र जारयेत् ।
त्रिगुणे गन्धके जीर्णे तेन हेम तु[4] कारयेत् ॥ ३३९ ॥
कारयेद्भस्म सूतन्तु[5] काञ्चनं तत्र सूतकम् ।
तद्भस्म सूतके जार्य्यं[6] रसेन्द्रस्य समे समम्[7] ॥ ३४० ॥
तेन सूतकजीर्णेन वज्ररत्नन्तु जारयेत्[8] ।
तद्वज्रं जायते भस्म सिन्दूरारुण[9]सन्निभम् ॥ ३४१ ॥
तद्भस्म जारयेत् सूते[10] त्रिगुणे तु सुरार्च्चिते[11] ।
हाटके[12] सारयेत्तं तु गुटिकां[13] तेन कारयेत् ॥ ३४२ ॥
त्रिलोहावेष्टितं तं तु[14] मुखे प्रक्षिप्य साधकः ।
नष्टच्छायो[15] भवेत् सोऽय-मदृश्यो देवदानवैः ॥ ३४३ ॥

---

(1) B reads तद्वद्धं पारजं, which seems to be incorrect. (2) B and M read घुटिकां. (3) शुद्धवज्रं रसेन्द्रं तु, a variant in B. शुद्धबद्धं रसेन्द्रं तु, a variant in K. (4) B and K read हेमं तु which is unusual. (5) M reads भस्मसूतच, which is inaccurate. (6) तद्भस्मं सूतकं जार्य्यं, an incorrect variant in K. (7) B reads समे समं, which seems to be the error of the scribe. (8) B has something redundant—माजगरयेत् instead of जारयेत्. (9) K reads सिंधूरारुण, which is not correct. (10) तद्भास्मं कार्य्यं सूते तु, an incorrect variant in B. तद्भस्म धार्य्यं सूते तु, a variant in M. (11) त्रिगुणं तु सुसरीते, an absurd reading in B. M reads त्रिगुणं तु. (12) M reads हारके, which is incorrect. (13) B and M read घुटिकां. (14) B and K read त्रिलोहं वेष्टयेत् तं तु. (15) K reads नष्टाच्छायो. M reads नष्टश्चायो. Both are incorrect.

तत्क्षणाद्वेधयेद्देवि[1] सर्व्वलोहानि काञ्चनम् ।[2]
बहुवर्ष[3]सहस्राणि निर्वलीपलितो[4] भवेत् ॥ ३४४ ॥
शूलिनं शक्तिसंयुक्तं रत्नादिगुणभूषितम्[5] ।
वक्त्रे करे च बिभृयात् सर्व्वायुधनिवारणात्[6] ॥ ३४५ ॥
व्योम माक्षिकसत्त्वञ्च[7] तारामात्रं[8] सुरायुधम् ।
वैक्रान्तं तालकं सूतं[9] रत्नादि[10]गुणभूषितम् ॥ ३४६ ॥
गुटिका[11] सा वरारोहे मधुरत्रयसंयुता[12] ।
वक्त्रस्था नाशयेत् साक्षात् पलितं[13] नात्र संशयः ।
शिवशक्तिश्च देवेशि रत्नादिशिवगा यथा[14] ॥ ३४७ ॥
हेम तारं तथा भानुः[15] समभागानि कारयेत्[16] ।
क्षीरजो व्याघ्रमध्यस्थं पद्मसूत्रेण वेष्टयेत् ॥ ३४८ ॥

---

(1) After this charaṇa, some portion of the MS. B is left blank. (2) This hemistich is not found in M. (3) K reads लक्षवर्षं. (4) K has निर्वली च वली:. M has निर्वली फलितं, wherein the last term is incorrect. (5) K reads रत्नानिगुणभूषणं, which is partly incorrect. (6) This hemistich is not found in K. (7) K reads माक्षिकसूतं तु, which seems to be redundant. (8) K has तत्तास्रं च. (9) K reads तालसूतं च. (10) M reads रक्तादि. (11) M has गुलिका. (12) M reads संयुतम्, which is incorrect. (13) K reads पलिने. M reads फलितं. Both the readings seem to be incorrect. (14) K has रत्नादिसिर्गीनघा:, which is unintelligible. (15) K and M read भानु (without विसर्ग), which is grammatically incorrect. (16) समभागं निकारयेत्, an incorrect variant in M.

सेचयेत्तत् तथावेष्ट्य[1] गुह्यस्थाने[2] निधापयेत् ।
रणे राजकुले द्यूते[3] दिव्ये काम्ये[4] जयो भवेत् ।
यन्मुखे चैव तद्गोलं स सर्व्वरञ्जको भवेत्[5] ॥ ३४९ ॥
वैक्रान्ताभ्रककान्तं तु[6] सस्यकन्तु सुरायुधम्[7] ।
विभीतकादिसम्भूत[8]-काञ्चिकस्य समं[9] भवेत् ॥ ३५० ॥
राजावर्त्तं[10] ततः सूते योजयेत् पादयोगतः ।
कुमारीरससंघृष्टा[11] कृतैका[12] गुटिका शुभा[13] ।
रोगमृत्युजरा[14] हन्ति वक्त्रस्था नात्र संशयः ॥ ३५१ ॥
(5) B reads सामुत्रं, which appears to be incorrect. K reads त्रिफलां. (6) M reads भस्ममध्ये, which is incorrect. (7) K has एकीकृत्वाथ, M has एकीकृत्वा तु ; Both are grammatically incorrect. (8) M reads वज्रीक्षीर, which is incorrect. (9) K has an incomplete charaṇa—कुंदेंदुसंनिभं. (10) वंगस्थं भवति is the reading in K. which seems to be incorrect. M reads वङ्ग instead of वङ्गं.

वङ्गं तारं[1] तथा सत्त्वं समसूतेन गोलकम् ॥ ११९ ॥
अनेन क्रमयोगेण मारयेच्च पृथक् पृथक्[2] ।
तत् सर्व्वं जायते भस्म वज्रस्यैव[3] प्रभावतः ॥ १२० ॥
भस्मसूतपलैकं च[4] वङ्ग[5]भस्मपलद्वयम् ।
द्वे पले[6] मृततारस्य सत्त्वभस्मपलद्वयम्[7] ॥ १२१ ॥
शङ्खचूर्णपलं पञ्च[8] सामुद्रस्य पलाष्टकम् ।
टङ्कणस्य पलान्यष्टौ[9] सर्व्वमेकत्र मर्दयेत् ॥ १२२ ॥
वज्रीक्षीरेण संपेष्य पुटं दद्याच्चतुर्दश[10] ।
एष सिद्धरसः[11] साक्षात् दुर्लभस्त्रिदशैरपि[12] ॥ १२३ ॥
वङ्गं तु द्रावयेत् पश्चात्[13] भाण्डे चैव तु मृन्मये[14] ।
सिद्धं भस्म भवेल्लोह[15]शलाकेन च चालयेत्[16] ॥ १२४ ॥

---

(1) M reads वङ्गतारं. (2) M reads erroneously प्रथक् प्रथक्. (3) D reads चन्द्रस्यैव. K reads चेंद्रस्यैव. (4) D has भस्मसूतं पलैकञ्च. (5) K wants this charaṇa. M reads वङ्ग. (6) K reads द्विपलं. (7) This hemistich is not found in D. (8) शङ्खचूर्णपलैकञ्च, a variant in M. (9) B reads पलान्यष्ट. (10) पुटा मृत्वा चतुर्दश, a variant in D. पुटं दत्वा चतुर्दश, a variant in K. पुटं दद्यात्तथा दश, a variant in M. (11) B reads सिद्धिरसः. (12) दुर्लभस्त्रिदशेष्वपि, a variant in M. (13) D has वङ्गं सुद्रावयित्वापि, which is grammatically incorrect. M has an incomplete charaṇa—वङ्गन्द्रावयेत् पश्चात्. (14) भाण्डोदि चैव तु मन्मये, an incorrect reading in D. M reads भाण्डेनैव तु मृण्मये, which is incorrect. (15) सिद्धभस्म भवेल्लोह, a reading in B and M. सिद्धं भस्मायसे लोह, a reading in D. (16) M has तालकेन तु कारयेत्.

वापयेच्च[1] प्रयत्नेन यावत् कठिनतां व्रजेत्[2] ।
अन्धमूषागतं ध्मातं[3] तारं भवति शोभनम् ॥ १२५ ॥
कदाचित् पुटिते तारे[4] पुनर्वङ्गं[5] प्रदापयेत् ।
पत्रे दाहे कषे च्छेदे[6] तत्तारं शाश्वतं भवेत्[7] ॥ १२६ ॥
स्तम्भितं तत्तु गोलं च[8] षोड़शांश[9]समन्वितम् ।
मृतवज्रस्य[10] भागैक-मेकत्रैव तु[11] मर्द्दयेत् ॥ १२७ ॥
देवदाली शङ्खपुष्पी तद्रसेन तु मर्द्दयेत् ।[12]
मारयेद्भूधरे यन्त्रे पुटानां सप्तकेन तु ॥ १२८ ॥
तद्भस्म तु[13] पुनः पश्चात्[14] दीपयन्त्रेण पाचयेत्[15] ॥ १२९ ॥
भस्मसूतपलैकं च[16] श्वेताभ्रकपलद्वयम् ।

---

(1) D reads चालयेत्तत्. (2) M reads व्रजेत्, which is incorrect. (3) D has अथ मूकागतं तारं, which is incorrect. K reads मूखा. (4) D reads स्फुटते तारं. K reads स्फुटते तारे. M reads यत् किञ्चित् पुटिते तारे. (5) D reads erroneously पुनर्नवं. (6) यचैदाहकछेदेन, a variant in D. पत्रे दाहकशेच्छेदे, a variant in K. तत्र दाहकर्षाच्छेदेन, a variant in M. All the texts seem to be incorrect. (7) तारं सारस्वतं भवेत्, a variant in D. M reads शोभनं instead of शाश्वतं. (8) B reads एतु instead of तत्तु. K reads erroneously संभीतं. M reads धनुषोत्थ, which has no clear sense. (9) Both D and K read षोड़शांशि. (10) D has मृतवङ्गस्य. (11) D has एकं चैव तु. (12) This hemistich is not found in D and M. (13) K reads तद्भस्मस्तु, which is grammatically incorrect. (14) After this charaṇa we find the following two charaṇas in B and K—पुटं दद्याच्चतुर्दश। रसीयं यत्रमाचेण. (15) B reads तापयेत्. (16) D and K read तु.

शङ्खचूर्णपलैकं तु[1] पलैकं टङ्कणस्य च ।
एकीकृत्याथ[2] तत् सर्व्वं वज्रीक्षीरेण पेषयेत्[3] ॥ १३० ॥
आरण्योत्पलकैः[4] पश्चात् पुटं दद्याच्चतुर्द्दश ।
रसोऽयं यवमात्रेण[5] वङ्गं स्तम्भयति क्षणात्[6] ॥ १३१ ॥
कृष्णाभ्रकपलैकं तु[7] द्वे पले मृतसूतकम्[8] ।
गन्धकस्य पलञ्चैकं[9] एकीकृत्याथ[10] मर्द्दयेत् ॥ १३२ ॥
मर्द्दमानं प्रयत्नेन गोलकं भवति क्षणात् ॥ १३३ ॥
मृतवज्रस्य भागैकं[11] चतुर्भागं च[12] गोलकम् ।
मर्द्दयेत् प्रहरैकं तु[13] भस्मीभवति सूतकः[14] ॥ १३४ ॥
आरण्यगोमयेनैव[15] पुटं दद्यात्तु[16] भूधरे ।
अनेन क्रमयोगेण सप्तसङ्कलिकां[17] कुरु ॥ १३५ ॥

---

(1) D reads पलेन तु, which is not correct. (2) K and M read एकीकृत्वाथ, which is incorrect. (3) M reads पीषयेत्. (4) D has आरण्योपलकैः. K has अरण्योत्पलकैः. (5) D reads पलमात्रेण. (6) D reads सम्भयते. K reads erroneously स्तंभ मर्द्दयेत्. (7) D has कृष्णाभकं पलैकं तु. This charana and the next two are not found in K. (8) B reads द्विपले. D reads द्विपलैनैव सूतकम्. M wants this charana and the next two. (9) D reads पलैकं च. (10) B has वज्रीक्षीरेण. (11) D reads भागं च. (12) D reads चतुर्भागस्य. M reads मृतवज्रस्य. (13) B reads तप्तखल्वेन. D reads प्रहरैकं तु. (14) D reads सूतकम्. K has स......, an incomplete charaṇa. (15) D reads प्रतांशेन च तेनैव. M reads अरण्य instead of आरण्य. (16) D reads दद्याच्च. (17) B reads संकुलिकां. K reads त्रिशृंखलिकं, which is incorrect.

शतांशेन तु[1] तेनैव नागवेधं[2] प्रदापयेत् ।
तं खोटं[3] रञ्जयेत् पश्चात् शुल्वाभ्रककपालिना[4] ॥ १३६ ॥
पुनस्तं रञ्जयेत्[5] पश्चात् तीक्ष्णशुल्वकपालिना[6] ।
पुनस्तं रञ्जयेत् पश्चात् नागाभ्रककपालिना[7] ॥ १३७ ॥
हेम्ना सह समावर्त्त्य[8] सारणात्रयसारितम्[9] ।
सहस्रांशेन तेनैव शुल्ववेधं प्रदापयेत्[10] ॥ १३८ ॥
जायते कनकं दिव्यं देवाभरणमुत्तमम्[11] ॥ १३९ ॥
वज्रभस्म स्नुहीचीरे[12] पुटितं दशभिः पुटैः[13] ।
तत्तुल्यं[14] मर्द्दयेत् सूतं देवदाल्या रसैः पुटेत्[15] ॥ १४० ॥

---

(1) D wants तु. K reads च. (2) Both D and K reads नागं वंगं. (3) M reads चोटं. (4) गन्धाभ्रकं कपालिकं, a variant in D. शुद्धाभ्रककपालिनां, a variant in K. After this śloka we find the following in D only—मृतवज्रस्य भागैकं चतुर्भागस्य गोलकम् । मर्द्दयेत् प्रहरैकं तु भस्मीभवति सूतकम्, which seems to be the repitition of the 134th śloka. (5) D reads पुनस्तद्रञ्जयेत्. (6) B reads तीक्ष्णशुल्वाभ्रकपालिना. D reads कपालिनाम्. (7) This hemistich is not found in D and K. (8) D has समावृत्य, which is not proper. (9) D has only सारणात्रय-सारि, which is an error of the scribe. (10) K reads शुल्वे वेधं. D reads प्रदायते, which is incorrect. (11) B has भूषणं. D and M have भूषितम्. (12) B reads स्नुहीचीरं. M reads स्नुहिचीरं. (13) B and M read पुटेत्. D reads योजितं in place of पुटितं. K reads पेष्यतं, which is incorrect. (14) D has तत्सूतं, which is a tautology. (15) B reads पुतं.

तत्तुल्यञ्च पुटेत्तीक्ष्णं[1] त्रिफलाया रसेन तु[2] ।
तत्तुल्यं पुटयेन्नाग[3]-महिमाराटरूपकैः[4] ॥ १४१ ॥
हेमवर्णप्रदं तद्धि[5] विंशत्यंशेन योजितम्[6] ।
चतुःषष्ठ्यंशकेनेदं[7] शुद्धतारञ्च[8] रञ्जयेत् ॥ १४२ ॥
अष्टमांशेन तेनैव नागपत्राणि लेपयेत् ।
पुटयेन्मारयेन्नागं[9] सिन्दूरारुणसन्निभम्[10] ॥ १४३ ॥
तत्तुल्यं मारयेद्धेम[11] काञ्चनाररसे पुटेत्[12] ।
तत्तुल्यं मारयेच्छुल्वं गृहकन्या[13]रसेन च ॥ १४४ ॥
पश्चादम्लेन[14] पुटयेद्-यावत् सिन्दूरसन्निभम् ।
चन्द्रार्कं रञ्जयेत्तेन[15] शतांशेन तु वेधयेत्[16] ॥ १४५ ॥

---

(1) B has तत्तुल्यं मर्दयेत्तीक्ष्णं. D has तत्कल्यं पुटयेत्तीक्ष्णं. M has तत्तुल्यं पुटयेत्तीक्ष्णं. (2) K reads च. (3) D, K and M read नागं, which is incorrect. (4) महिमादाय रूपकैः, a variant in D. महि-मायाटरूपकैः, a variant in K. (5) हेमवर्णं प्रदत्तं तत्, a variant in B. हेमवर्माप्रदं सिद्धे, a variant in D. हेमवर्णं प्रदं सिद्धं, a variant in K. (6) D and K read योजयेत्. (7) K reads erroneously चतुषष्टांशकेनेदं. M reads चतुष्षष्टांशकेनैव. (8) D reads शुद्धं तारञ्च. (9) D reads धूपेन्मारयेन्नागं, which is incomplete. (10) सिन्दूरारुणसमप्रभं, a variant in B. सिन्दूरमरुणप्रभम्, a variant in M. (11) M reads मारयेद्धमे, which is incorrect. (12) B has कांचनागस्य पुटेत्. D has काञ्चनं चीरसंपुटे. K has कांचनीचीरसंपुटे. M has काञ्चनागरसे पुटेत्. (13) K and M read गृहकन्या, which is not correct. (14) K reads यावद-म्लेन. M reads पश्चादाम्लेन. (15) चंद्राका रंजये तेन, an incorrect variant in B. (16) D reads योजयेत्. M reads पाचितम्.

सवीजं वीजवर्ज्जं वा[1] वज्रेण[2] सह सूतकम्।
तद्भस्म मर्द्दयेत् पश्चात् स्वर्णपत्ररसेन तु[3] ॥ १४६ ॥
तेनैव वेधयेच्छुल्वं[4] शुल्वं तारे तु योजयेत्[5] ॥ १४७ ॥
वज्रेण द्वन्दयेद्धेम[6] हेम्ना च द्वन्दयेद्रसम्[7]।
रसेन द्वन्दयेद्देहं[8] स देहो ह्यजरामरः[9] ॥ १४८ ॥
कदलीकंदसौवीरं[10] कण्टकारीरसप्लुतम्[11]।
क्रामणं[12] सर्व्वधातूनां सर्व्वद्वन्द्वेषु[13] मेलनम् ॥ १४९ ॥
तिमिरस्य[14] तु पञ्चाङ्गं मार्जारी[15]वीजसंयुतम्।
एकीकृत्याथ संमर्द्य वज्रं तेनैव वेधयेत्[16] ॥ १५० ॥

---

(1) B reads वीजवज्रं वा. D reads विंशांशं वीजवज्रेण. K reads विंशांशं वीजवज्रं च. (2) M reads चन्द्रेण. (3) B reads स्वर्णपत्रं रसेन तु. D reads स्वर्णपात्रं रसेन तु. M reads पर्णपत्रं रसेन तु. (4) M reads पश्चात्. (5) तारे तारं च योजयेत्, a variant in D. तावेताश्च योजयेत्, a variant in K. शुल्वं तारे नियोजयेत्, a variant in M. (6) D reads वेधयेद्धेम. K reads बंधयेद्धेम. (7) हेम्ना रसं च वेधयेत्, a variant in D. K reads बंधयेद्रसं. (8) D reads वेधयेद्देहं. K reads बंधयेद्देहं. (9) संदेहोऽप्यजनामकम्, an incorrect variant in D. K reads स देहस्त्वजरामरः. M reads स देहोऽप्यजरामरम्, which is incorrect. (10) B reads कंदली. D reads शाकं च and K reads साकं च instead of सौवीरं. M reads दल instead of कंद. (11) कदम्बकाप्लुत, and कण्टक......शितम्, incomplete variants in D and M respectively. (12) D reads क्रमेण. K reads क्रमणं. M reads का... (13) M reads सर्वद्वंद्वेन. (14) M reads तिमिरस्य. (15) B reads पेटारी. M reads पोटारी. (16) B reads वेष्टयेत्. D reads चलं in place of वज्रं.

वज्रमूषागतं[1] ध्मातं हेमद्वन्द्वन्तु कारयेत्[2] ॥ १५१ ॥
कान्तपाषाणचूर्णं तु[3] भूलता रामठं मधु ।
गुञ्जा[4]टङ्कणकाचं च कर्कटास्थि स्नुहीपयः[5] ॥ १५२ ॥
एतत् सर्व्वं समं योज्यं[6] स्त्रीस्तन्येन च मर्द्दयेत् ।
मूषालेपगतं प्रान्ते[7] वज्रमेलापकः सुखी[8] ॥ १५३ ॥
हठाग्नौ वज्रमूषायां[9] दृढ़वज्रा मिलन्ति च[10] ।
सुसूक्ष्मा रजका[11] भूत्वा ह्येकीभावं[12] व्रजन्ति ते ॥ १५४ ॥
काचटङ्कणयोगेन ध्मातः[13] शुद्धिमवाप्नुयात् ।
बहुभिश्चैव[14] मूषाभिस्तेजःपुञ्जो[15]ऽभिजायते ॥ १५५ ॥

---

(1) M reads वज्रीमूषागतं. (2) This hemistich is not found in D and K. M has द्वन्दितं तत्तु कारयेत्. (3) M reads चूर्णेन. (4) D has गन्ध. K has मध. (5) B reads कर्काटास्थि. K reads स्नुहिपयः. The portion commencing from the next śloka and ending in the last śloka of the 14th Paṭala is not found in M. (6) तत् सर्वं च समायोज्यं, a reading in D and K. (7) B reads प्राज्ञो. D reads मूखलिखगतः. K reads मूखालिपगतः. (8) वज्रकीमारकः सुखम्, a variant in D. वज्रकीमात्रकः सुखा, a variant in K. (9) K has द्दढ़ाग्नौ. B has बहुमूषाभिः. D has बहुमूषायां. (10) द्दढ़ं वज्रे मिति च, an incomplete variant in D. द्दढ़ं वज्रं मिलंति च, an incorrect variant in K. (11) B and D read रवका, which seems to be incorrect. (12) B reads ह्येकीभावे. K reads हेकिभावं, which is incorrect. (13) The word ध्मातः is not found in K. (14) B reads सप्तभिश्चैव. (15) B reads erroneously तेजपुंजो.

मृतवज्रस्य भागैकं भागाः षोड़श हाटकम्[1]।
श्वेतकाचस्य चूर्णं तु भागान्[2] षोड़श दापयेत्॥ १५६॥
अन्धमूषागतं[3] ध्मातं वज्रबन्धं तु[4] कारयेत्।
अनेन क्रमयोगेण सप्तवारांश्च[5] दापयेत्।
मिलति तत्क्षणं वज्रं[6] हेम्ना तु सलिलं यथा॥ १५७॥
चूर्णं नरकपालस्य[7] मृतवज्रे[8] तु दापयेत्।
अन्धमूषागतं ध्मातं हेम्ना मिलति तत्क्षणात्[9]॥ १५८॥
भृङ्गपत्रं नृकेशं च[10] मृतकान्तं सटङ्कणम्[11]।
बालवत्सपुरीषं च स्त्रीस्तन्येन च[12] पेषयेत्॥ १५९॥
मूषालेपं[13] ततः कृत्वा वज्रे हेम च[14] दापयेत्।
अन्धमूषागतं[15] ध्मातं वज्रं मिलति नान्यथा॥ १६०॥

---

(1) D has an incomplete charana भागशोभ हाटकम्. (2) B has भागं. D has भागः. K has भागाः. All the texts appear to be incorrect. (3) Both D and K read अंधमूखागतं. (4) B has वज्रइंद्रं तु. D has वज्रवद्धं तु. (5) B reads सप्तवारं तु. (6) This charana and the next are not found in B. D has मिलिते ततक्षणाद्वज्रे, which is not grammatically correct. (7) This charana and the next are not found in B. K reads रचर्णं रक्तकपालस्य, which is senseless. (8) D reads मृतं वज्रं. (9) This charana and the next seven are repeated in D. (10) D reads भृगपत्रं च केशं च. K reads भंगचत्रं, which has no sense. (11) मृषं कान्तस्य टङ्कणं, a variant in B. K reads मृखं. (12) K wants च, so the charana being incomplete. (13) K reads मूखालेपं. (14) B and K read वज्रं हेमं च. (15) K reads अंधमूखागतं.

कान्तं वज्रं[1] तथा गुञ्जा[2] गन्धकं च[3] चतुष्टयम् ।
स्तनक्षीरेण[4] पिष्टं तु मूषालेपं तु कारयेत् ॥ १६१ ॥
अन्धमूषागतं ध्मातं वज्रं मिलति तत्क्षणात् ॥ १६२ ॥
क्षीरेणोत्तरवारुण्या[5] मृतवज्रं तु भावयेत् ।
हेमपिष्टिकया मध्ये वज्रं तत्रैव निक्षिपेत् ॥ १६३ ॥
वेष्टयेद्भूर्ज्जपत्रेण[6] वह्निर्वस्त्रेण वेष्टयेत् ।
धान्यमध्ये तु संस्थाप्यं पक्षमेकं निरन्तरम्[7] ॥ १६४ ॥
उद्धृतं तत् प्रयत्नेन वज्रबन्धं तु कारयेत् ।[8]
द्रुता वज्रास्तु[9] तेनैव मिलनीयास्तु पार्व्वति[10] ॥ १६५ ॥
द्रुतबन्धः स विज्ञेयः[11] शतसाहस्रवेधकः[12] ॥ १६६ ॥
रत्नानां तु तथा सर्व्वान्[13] वेधयित्वा यथाविधि[14] ।
शतसाहस्र[16]वेधी च देहसिद्धि[16]प्रदायकः ॥ १६७ ॥

---

(1) B reads कांतसुखं. K reads कांतं भूखं. (2) K reads गुंजां. (3) B reads गंधकस्य. (4) D reads स्तन्यक्षीरेण. (5) D reads चारेणोत्तरवारुण्या. (6) K reads भूर्यपत्रेण. (7) B reads erroneously निरन्तरिं. (8) The portion commencing from वेष्टयेद्भूर्ज्जपत्रेण and ending in कारयेत् is not found in D. (9) B has द्रुता वज्रास्तु तेन, an incomplete charana. D has गतवज्रास्तु सूत्रेण. K has द्रुतवज्रस्तु तेनैव. (10) D reads पार्वती, which is incorrect. (11) B reads द्रुतबंधः. D reads मृतबंध स विज्ञेया, which is incorrect. (12) B has शतसाहस्रवेधक. D has सप्ताहशेकवेधकः. (13) This charana and the next two are not found in B. K has रत्नानां द्रुतयः सर्वां. (14) D reads यथाविधिः, which is incorrect. (15) D reads सहस्र. (16) B reads देहे सिद्धि. D reads देहे सिद्धिः, which is incorrect.

मुसली[1] चित्रकं वन्ध्या-कर्कोटी कन्दपद्मिनी[2] ।
कञ्चुकी नीलसिन्दूरी[3] वासा[4] नागबला तथा ॥ १६८ ॥
कांस्यपात्रे[5] रसश्चैव रत्नानां द्रुतयस्तथा[6] ।
आतपे धारयित्वा तु[7] अन्धकर्षानलस्तथा[8] ॥ १६९ ॥
ओषधीनां[9] रसं कृत्वा स्वच्छं[10] कृत्वा पुनः पुनः ।
याममात्रं च घर्म्मे तु[11] द्रुतिर्मिलति वै रसम्[12] ॥ १७० ॥
न तेषां क्रामणं शक्यं[13] वक्तुं वर्षशतैरपि[14] ॥ १७१ ॥
सैन्धवं निम्बपत्राणि वाकुची वेष्टिता[15] जले ।
द्रुताभ्रस्य रसेनैव[16] मेलनं परमं मतम्[17] ॥ १७२ ॥

---

(1) K reads मुसलि, which is incorrect. (2) D has पद्मनि, which is incorrect. (3) B has नीलसिंदूरा. K has नीलसिंधूरी. (4) D reads वांसा. K reads वसा. (5) K reads कांसपात्रे. (6) B has द्रुतवस्तथा, which seems to be the error of the scribe. (7) B reads वै. D reads चारयित्वा तु. (8) अंधकेषामलं तथा, a variant in B. अथ कुर्य्यान्नलो यथा, a variant in D. Both the texts have no sense. Mysore Manuscript (My) reads अथःकर्षामलं तथा, which is not clear. (9) B reads पद्मिनीनां. (10) D reads स्वेदं. (11) याममात्रे विधर्मे च, a variant in B. यामं पात्रे च धर्मे तु, a variant in D. (12) स्तिति मिलति वै रसे, a variant in D. द्रुतिर्मिलति चैव हि, a variant in K. (13) तेषां क्रमेणाशक्तं, a variant in B. D has क्रमणं शक्तुं. K has कामणा शक्तं. (14) B reads वज्रशतैरपि. K reads वज्रशतैरपि. (15) B and My have वाकुचिर्वेष्टिया. D has वाकुचीर्वेष्टिता. K has वाकुचि वेष्टिता. (16) B reads erroneously द्रुताभस्य रसेवने. D reads उताभस्य रसेनैव. (17) मेलनेन वज्रवन्धनम्, a variant in D.

वज्रं द्वन्द्वनमीशानि[1] वज्रेण रसमारणम्[2] ।
सवीजं मारणं प्रोक्तं[3] खोटबन्धनमेव च[4] ॥ १७३ ॥
तन्ममाचक्ष्व देवेशि किमन्यच्छ्रोतुमिच्छसि[5] ॥ १७४ ॥

इति श्रीपार्व्वतीपरमेश्वरसंवादे[6]
रसार्णवे रससंहितायां
वज्रबन्धो नाम[7]
चतुर्द्दशः पटलः ॥ १४ ॥

---

(1) वज्रद्वन्द्वमसीसानि, a variant in B. वज्रद्वन्द्वममीशानि, a variant in My. D wants this charaṇa and the next. (2) K has वज्रेण सह मारणं. (3) सवीजमारणं चोक्तं, a variant in B and My. वज्ररसमारणं प्रोक्तं, a variant in D. (4) D has सवीजं खोटबंधनम्. My has खोटत्वं धनमेव च. (5) किमन्यच्छ्रोतुमर्हसि, a variant in K. (6) This portion is not found in B and My. D and K read गौरीशंकरसंवादे. (7) B has वज्रबंधयोगो नाम.

## पञ्चदश: पटल: ।

श्रीदेव्युवाच ।

महारसैरुपरसै[1]र्लोहैश्च परमेश्वर[2] ।
आज्ञापय समस्तं तु[3] रसराजस्य बन्धनम्[4] ॥ १ ॥

श्रीभैरव उवाच ।

[ वीजानि कल्पितान्येवं रञ्जितानि परं शृणु ।
घनं माक्षीकचूर्णेन शुल्वचूर्णेन रञ्जितम् ॥
हन्दानं वाप्यसत्त्वेन रसराजस्य रञ्जनम् ।
आरक्तवल्लीभिर्मूत्रैर्बहुधा परिकीर्त्तितम् ॥
कुसुदीगन्धपाषाणै सह माक्षिकहिङ्गुलैः ।
वापितः सेचितो रक्तगणस्नेहैर्मतो रसः ॥
रञ्जनं रसराजस्य ][5]

---

(1) D has साहारसै तूपरसैः, which seems to be incorrect. K has रूपरसैः, which is an error of the scribe. We do not find the first eight ślokas in the MS. M. (2) लौहैसल्वैश्च मेलनं, a variant in B. K reads परमेश्वरः, which is inc. (3) D reads erroneously आज्ञापयासामस्तं तु. My reads तत्. (4) D reads रसाराजवन्धनम्, which is incom. plete as well as inc. K has द्रवंति सलिलं यथा, which is inconsistant. After this śloka we find in B only the following verse :—

तस्यायौषधीवल्लं देव वक्तुमर्हसि संकर ।

(5) The portion within brackets is found only in K MS, and is almost a repitition of what is stated in the 8th Paṭala (vide ante p. 133.) As it appears to us an incongruous matter in the chapter of रसबन्धनं, we have kept it separate from the texts of other MSS.

वैक्रान्तस्य तु भागैकं[1] चाष्टभागन्तु[2] सूतकम् ।
कनकस्य तु सप्तांशं द्विपदी[3]रसटङ्कणम् ॥ २ ॥
नष्टपिष्टं च शुष्कं च[4] ध्मातं[5] खोटो भवेत् प्रिये ।
सौवीरं टङ्कणं काचं दत्त्वा दत्त्वा तु[6] शोधयेत् ॥ ३ ॥
समह्वेम्नि[7] समावर्त्य सूतं[8] मूषागतं ततः[9] ।
समांशभक्षणं तं तु[10] शुद्धसूतेन[11] कारयेत् ॥ ४ ॥
वैक्रान्तं षोड़शांशेन[12] पूर्व्वयोगेन धामयेत् ।
दशसंकलिकायोगात् वेधो दशगुणोत्तरः[13] ॥ ५ ॥
[ सप्तसंकलिकायोगो वेधो दशगुणोत्तरः ।
वैक्रान्तो वज्रवत् ज्ञेयो नात्र कार्य्या विचारणा ॥ ][14]
पुनरन्यं प्रवच्यामि प्रयोगं भुवि दुर्लभम् ॥ ६ ॥
वैक्रान्तसत्त्वं देवेशि पारदेन समन्वितम्[15] ।

---

(1) D reads न भागैकं, which seems to be incorrect. K has only भागैकं and wants वैक्रान्तस्य तु. (2) B and My read मष्टभागं तु. (3) K reads द्वौपदी. (4) नष्टपिष्टि च शुष्कं च, a variant in B and My. नष्टपिष्ट चतुःपंच, a variant in K. (5) B and K read ध्मातः. (6) D has हत्वा दरदं च, which is not clear in sense. K reads च in place of तु. (7) K reads समे हेम्नौ, wherein the last word is grammatically incorrect. (8) B and My read सूक. (9) D has मूखागतं यतः, which appears to be incorrect. K has also मूखागतं, (मूखा = मूषा). (10) K reads समांशभक्षणं तत्तु. (11) D and K read शुद्ध सूतेन. (12) वैक्रान्तं षोड़शाङ्केन, a reading in D. (13) B reads स्पर्शवेधी भवेद्रसः. (14) The portion within brackets is found only in B. (15) D reads समन्वितं, which is incorrect.

जारितं समहेम्ना तु शिलाभाण्डे निधापयेत्[1] ॥ ७ ॥
माससमात्रोषितं[2] भूमौ समुद्धृत्य[3] प्रयत्नतः ।
एष देवि रसो दिव्यो देहद्रव्यकरो भवेत् ॥ ८ ॥
वैक्रान्तकास्तु ये[4] केचित् त्रिफलाया रसेन च ।
भूम्यामलकसारेण वसुभट्टरसेन च[5] ॥ ९ ॥
एकैकं देवि सप्ताहं[6] स्वेदिता मर्द्दितास्तथा[7] ।
सुध्माता मूकमूषायां[8] खोटो भवति चाक्षयः[9] ॥ १० ॥
कान्तं रूप्यं सकनकं[10] पारदं चैव योजयेत् ।
शुल्वं तृतीयभागन्तु[11] स्रोतोऽञ्जन[12]समन्वितम् ।

---

(1) D, K and My read शिलाभाण्डेन दापयेत्, which has no clear sense. (2) D reads erroneously माससमात्रोशितं. (3) D reads समाहृत्य. K reads समुद्दृत्य. The former has no sense, and the latter is grammatically incorrect. (4) वैक्रान्तकास्तु यैः, a variant in D, which is incorrect. (5) वसुभेदे रसायने, a variant in D. वसुभट्टारसेन वा, a variant in K. (6) D reads सप्ताहः. K reads देवी. Both are incorrect. (7) B has स्वेदितमर्दितस्तथा. D and K have स्वेदितो मर्दितस्तथा. We have adopted the reading of M, as there are वैक्रान्तकाः in the 9th śloka. (8) सुध्मातो मूलमूखायां, a variant in D. सुध्मातो मूकमूखायां, a variant in K. M reads सुध्मातं. (9) B reads चाक्षयं. M reads वंद्रो भवति चाक्षया, which is incorrect. (10) B reads कान्तं रूप्यं च कनकं. K reads कांतरूप्यं सकनकं. M and My read कान्तरूप्यञ्च कनकं. (11) D reads शुल्वतृतीयभागं तु. (12) B and K read स्रोतांजन.

तत् भ्मातं खोटतां याति[1] देहलोहकरं भवेत् ॥ ११ ॥
श्वेतवैक्रान्तचूर्णन्तु[2] हयमूत्रेण[3] मर्द्दयेत् ।
आदौ सुस्विन्नमादाय[4] पले पलशतं क्षिपेत् ॥ १२ ॥
तारस्य जायते भस्म विशुद्धस्फटिकाकृति[5] ।
तद्भस्म मेलयेत् सूते[6] समभागे[7] विचक्षणः ॥ १३ ॥
चारयेत् रजतं सूते[8] हयमूत्रेण मर्द्दयेत् ।
पुटयेदन्धमूषायां[9] क्रमेण[10] मृदुवह्निना ॥ १४ ॥
क्रामणेन समायुक्तं[11] मूषामध्ये[12] विचक्षणः ।
अहोरात्रं[13] त्रिरात्रं वा भवेदग्निसहो रसः[14] ॥ १५ ॥
स्पर्शनात् सर्व्वलोहानि[15] रजतञ्च[16] करिष्यति ।

---

(1) B has तं भ्मातं, which is incorrect.. D reads सुध्मातः. K wants सु and reads only भ्मातं. M and My read त भ्मातं, which is inc. (2) D reads erroneously वर्णं तु. (3) D reads हयमारेण. (4) This charaṇa and the next seven are not found in D. K has सुस्निग्धमादाय. (5) B reads विशुद्ध' स्फटिकाकृति. K, M and My read विशुद्धस्फटिकाकृतिः, which is gram. incorrect. (6) M has मेलयत् सूतं, which is incorrect. (7) B, M and My read समभागं. (8) B wants सूतं, which mars the metre. K reads रजतं सूतं. M reads रजितं सूतं. Both are incorrect. (9) D and K read मूखायां, instead of मूषायां. (10) B reads क्रामने, which seems to be the error of the scribe. (11) This hemistich is not found in D and M. (12) B and K read मूखामध्ये (=मूषामध्ये). (13) M reads एकरात्र'. (14) D and K have भवेदग्निसहोदरे, which has no clear sense. (15) D has सर्वलोहानां. This charaṇa and the next six are not found in K. (16) D reads रञ्जनञ्च.

भक्षितैर्[1] वक्ष्यमाणेन जरादारिद्र्यनाशनम् ॥ १६ ॥

रक्तस्य वक्ष्यते कर्म्म[2] जरादारिद्र्यनाशनम् ।

सप्तधा भावयेत्तस्य[3] व्याघ्रीकन्दाम्भसा रजः ॥ १७ ॥

पलं तस्य पलं हेम्नः पलं शुद्धरसस्य च[4] ।

शुद्धं भस्म भवेत् सर्व्वं[5] पुनर्हेमशतं[6] क्षिपेत् ।

तद्भस्म जायते क्षिप्रं[7] शुद्धहेमसमप्रभम् ॥ १८ ॥

तद्भस्म रसराजे तु पुनर्हेम्ना च मेलयेत्[8] ।

भवेदग्निसहो देवि[9] ततो रसवरो भवेत्[10] ॥ १९ ॥

स्पर्शवेधी भवेत् सूतः[11] कोटिवेधी महारसः ॥ २० ॥

रक्तवैक्रान्तसत्त्वं च[12] हेम्ना तु[13] सह मेलयेत् ।

---

(1) This hemistich is not found in D, M and My. (2) रक्तस्य च जरेत् कर्म्म, a variant in D, which has no sense. M reads कामं instead of कर्म्म. (3) D reads चरयेत् सत्वं. (4) पलं शुल्वस्य सस्य च, a variant in B, which seems to be incorrect. (5) M has शुद्धभस्म भवेत् सूतं. (6) D and K read हेमसमं. M reads हेमशता, which is grammatically incorrect. (7) B and K read सर्वं. (8) D reads तु लेपयेत्. M reads तु instead of च. (9) K reads erroneously भवेदग्नीसहो देवी. (10) ततो रसवरागमे, a variant in B. ततो रससरो भवेत्, a variant in D. ततो रसचरो भवेत्, a variant in K. We have adopted the reading in M and My. (11) D reads स्पर्शवेधा, which is incorrect. K has an incomplete charaṇa—स्पर्शवेत्सूतं. (12) B and D read सत्वे च. M and My read सूतन्तु. (13) M reads च.

समं तं जारयेत् सूतं[1] सारयित्वा समेन तु ।
सहस्रांशेन लोहानि वेधयेन्नात्र संशयः ॥ २१ ॥
कृष्णवैक्रान्तभागैकं शुद्धसूतपलांशकम्[2] ।
एकत्र मर्द्दयेत् खल्ले चूर्णं च भवति द्वयम्[3] ॥ २२ ॥
अस्य चूर्णस्य भागैकं[4] हेमभागसहस्रकम् ।
एकत्र मर्द्दयेत् तावत् यावद्भस्म तु जायते[5] ॥ २३ ॥
धमेत्तच्चान्धमूषायां[6] यावत् खोटो[7] भविष्यति ॥ २४ ॥
समांशभक्षणं[8] तस्य शुद्धसूतं तु कारयेत्[9] ।
वेधयेत् सर्व्वलोहानि स्वर्णमात्रेण पार्व्वति[10] ॥ २५ ॥
तच्चूर्णमभ्रकं[11] चैव रसेन सह मर्द्दयेत् ।
एकत्र मर्द्दयेत्तावद्यावद्भस्म प्रजायते[12] ॥ २६ ॥

---

(1) B has जायते सूते. D has जारयेत् सूतः. K has जायते सूतं. M has ततशल्वं जारयेत् सूते. (2) D has तं च सूतं पलांशकं. K has हेमभाग-सहस्रकं. M has शुद्धसूतशतांशकं. (3) K wants this charana and the next four. My reads ध्रुवम्. (4) M reads भागेकं, which is incorrect. (5) This hemistich and the next one are not found in D. (6) भवेत चांधमूषायां, a variant in B. तद्भस्मवैद्न्धमूषायां, a variant in M. (7) B reads पोटी. M reads बोटी. (8) B has समासं भचणं. M has समांशभचणं. (9) M has पीटिकां कारयेत् बुधः. (10) B reads वेधता. K reads पार्वती, which is grammatically incorrect. M and My read हेमता. (11) D reads तच्चूर्णं गन्धकं. (12) B reads यावद्भस्म तु जायते, which is partly incorrect.. This hemistich and the next four are not found in D, M and My.

धमेत्तदन्धमूषायां[1] यावत् खोटो भविष्यति ।
समांशं भक्षणं[2] तस्य पिष्टिकां[3] कारयेद्बुधः ॥ २७ ॥
वेधयेत् सर्व्वलोहानि स्पर्शमात्रेण हेमता[4] ।
तच्चूर्णमभ्रकं चैव रसेन सह मर्द्दयेत् ॥ २८ ॥
स्वेदयेज्जारयेच्चैव[5] ततो वह्निसहो भवेत् ।
स रसः[6] सारितश्चैव सर्व्वलोहानि विध्यति ॥ २९ ॥
पीतवर्णेऽपि[7] वैक्रान्ते रक्तकृष्णविधिर्मतः[8] ॥ ३० ॥
पीत[9]वैक्रान्तचूर्णं तु हेमचूर्णसमन्वितम्[10] ।
पीताभ्रकस्य चूर्णेन[11] मेलयित्वा महारसः ।
स्वेदितो मर्द्दितश्चैव मासादग्निसहो रसः ॥ ३१ ॥
श्वेतं पीतं तथा कृष्णं रक्तवर्णं तथैव च[12] ।
एवं चतुर्विधा वर्णा[13] वैक्रान्ते वरवर्णिनि ॥ ३२ ॥
वज्रस्थाने तु वैक्रान्तो[14] मेलनं परमं मतम् ।

---

(1) B reads भवेत्तदधमूषायां. (2) K reads भावयेत्. (3) B reads पीठिकां. (4) B and K read हेमतां, which seems to be incorrect. (5) M reads स्वेदयेच्चारयेच्चैव. (6) D reads सारसा. M reads सरितः. Both the readings seem to be incorrect. (7) D reads सितवर्णेऽपि, which is incorrect, सितवर्ण being already mentioned in the 12th śloka. (8) B reads रसकृष्टविधिर्मतः, which appears to be incorrect. K reads रक्तकृष्णादिकर्मतः. (9) D reads पीतं. (10) हेमचूर्णसमप्रभं, a variant in B. हेमचूर्णे समन्वितं, a variant in K. (11) D and K have चूर्णं तु. (12) This hemistich and the next three are not found in D, M and My. (13) B reads चतुर्विधो वर्णो. (14) B reads वज्रस्थानेषु वैक्रान्तं, which seems to be incorrect.

देहलोहकरो यस्य[1] पारदो लौहवत्[2] प्रिये ॥ ३३ ॥
नीलवर्णस्तु वैक्रान्तो[3] म्रियते[4] रससंयुतः ॥ ३४ ॥
कृष्णाभ्रकेण[5] सहितं मधुसर्पिर्युतं च यत् ।
भक्षयेन्मण्डलं देवि जीवेच्चन्द्रार्कतारकम् ॥ ३५ ॥
यस्य यस्य हि यो योगः तस्य तस्य प्रयोगतः ।
मेलयित्वा रसं गुञ्जा-मानं त्रिमधुसंयुतम् ॥ ३६ ॥
पथ्यं चौराज्यशाल्यन्नं[6] भोज्यमन्यच्च[7] वर्ज्जयेत् ॥ ३७ ॥
[ एकान्ते मक्षिकामध्ये निर्वासः संस्थितो नरः ।
रसमृत्युञ्जयो मन्त्रः सदा जप्यो हृदन्तरे ॥
पशूनां विमुखस्तत्र स्त्रीणां चैव न दर्शनम् ।
भस्मोद्धूलितसर्व्वाङ्गो मन्त्रध्यानपरायणः ।
वत्सरं क्रमते मर्त्त्यस्तस्य सिद्धिर्न संशयः ॥ ][8]
वैक्रान्तसत्त्वसंयुक्तं[9] लुङ्गाम्ले मर्द्दयेद्रसम्[10] ।

(1) K reads यस्य. (2) K reads पारदे लोहवत्. (3) After this charaṇa we find the following hemistich in B only—

अग्निमध्ये यथा तिष्टे अचंचला महारसा ।

which we have rejected for its incongruousness. (4) D reads म्रतये. M reads म्रयते. Both are incorrect. (5) This śloka and the next forty-three ( i. e. 35—78 ) are not found in B. (6) D has खोटं चाराज्यशाल्यन्न. M has चोटं चौराज्यशाल्यं तं. My has खोटं वैक्रान्तशाल्यन्नं. (7) D reads भोज्यमन्यत्तु. (8) The portion within brackets is found only in K MS. (9) D reads वैक्रान्तं सत्वसंयुक्तं, which seems to be inc. K reads सत्वसंयुक्तो, which is gram. inc. (10) D and K have लुंगाम्लेन मर्दयेद्रसम्. M has तलुङ्गाम्लेन मर्दयेत्, which appears to be inc.

तापयेत् कोष्ण[1]तापेन जलेन[2] परिपूरयेत् ॥ ३८ ॥
सत्त्वं सूतञ्च संमिश्र[3] धमेत् स्याद्रसबन्धनम्[4]।
बद्धं रसं[5] मुखे चिप्ता भूमिच्छिद्राणि पश्यति[6] ॥ ३९ ॥
निष्कमेकं च वैक्रान्तम्[7] अश्वमूत्रेण मर्द्दयेत्।
दिनमेकमिदं देवि मर्द्दयित्वा मृतो भवेत् ॥ ४० ॥
चतुर्द्दिनमिदं कृत्वा समं सूतं समानयेत्[8]।
मर्द्दनं स्वेदनं चैव पूर्व्ववच्छुद्धमानसः[9] ॥ ४१ ॥
सप्तद्वन्द्वनमेकैकं[10] सप्ताष्टमपलं[11] भवेत्।
मर्द्दयेन्मातुलुङ्गाम्लैः[12] चतुःषष्टिपुटं ददेत्।
उदयारुणसंकाशः सर्व्वलोहानि वेधयेत् ॥ ४२ ॥
कृष्णाभ्रकस्य सत्त्वं च रसं हेमसमं भवेत्।

---

(1) संतापयेत्युष्ण, a variant in D. My has कृष्ण. (2) K reads जलेना. M reads मलेन. (3) D reads सात्वं सूतं च संमिश्र. K reads सत्वं सूतं च संमिश्रं. M reads सत्वसूतञ्च सम्मिश्रं, which is inc. (4) धर्मश्च रसबन्धनम्, a variant in D. धामयेत् रसबन्धनम्, a variant in M. (5) D reads बन्ध' रसं, which is incorrect. K reads बद्धरसं. (6) D reads पश्यति, which is incorrect. K reads भूमीछिद्राणि, which is also incorrect. (7) M reads निष्कनेकन्तु संक्रान्त, which is an error of the scribe. (8) D reads समं नयेत्. M reads धमन्नयेत्. (9) जायते शुद्धमानसः, a variant in D. (10) K reads सत्वं बंधनमेकैकं. (11) D and K read सप्ताष्टमफलं. M reads सप्तमाष्टपलं. My reads सप्तमाष्टफलं. (12) K reads लिंगाम्लैः. M reads लुङ्गाम्ले. This charaṇa and the next five are not found in D.

निक्षिप्य वज्रमूषायां[1] धमित्वा खोटतां नयेत्[2] ॥ ४३ ॥
बद्धं रसं मुखे[3] क्षिप्त्वा ह्यजरामरतां व्रजेत् ॥ ४४ ॥
तेनैव भस्म संमिश्रं कृष्णाभ्रकसमं[4] भवेत् ।
शल्याविशल्या[5]मूलस्य वारिणा मर्द्दयेद्दिनम् ॥ ४५ ॥
भ्रमरायन्त्र[6]मध्यस्थं पुटं सप्तदिनं भवेत्[7] ।
तच्छुद्धं भस्म सेव्यं स्यात्[8] गुञ्जामानं तु मण्डलम्[9] ॥ ४६ ॥
एकाद्यं पञ्चमं मध्यं[10] पुनरेकं प्रशस्यते[11] ।
पूर्व्ववद्बन्धनाद्देवि[12] कोटिवेधी महारसः ॥ ४७ ॥

॥ इति वैक्रान्तबन्धः ॥

रक्तवर्णमयस्कान्तं[13] लाक्षारससमप्रभम् ।
भिन्नं स्त्रीरक्त[14]संकाशं तच्चूर्णं सूतसंयुतम् ।

---

(1) D and K read वज्रमुखायां. M reads सर्व्वमूशायां. (2) D reads व्रजेत्. M reads बोटतां. (3) D reads बद्धरसं मुखे. M reads वज्रं रससुखे. (4) D reads कृष्णाभ्रकमलं, which has no clear sense. (5) D has शाल्याविशाल्या. M and My have शल्यानि शल्य, which is inc. (6) K reads भ्रमरीयन्त्र. No mention is made of this apparatus ( यन्त्र ) in the रसरत्नसमुच्चय. (7) D reads वदेत्. (8) तं शुद्धभस्मसवं स्यात्, a variant in D. तच्छुद्धभस्म सेव्यं च, a variant in K. (9) जीवेत् कल्पायुतं नरः, a variant in K. (10) D reads एकाद्यापञ्चेशं भद्रं, which is unintelligible. My reads मद्दा. (11) This hemistich is not found in K. (12) K reads पूर्व्ववद्धमनाद्देवि, which seems to be inc. (13) D has रक्तवर्णं भवेत् कान्तं. M has रक्तवर्णमयं कान्तं. (14) D and K read भिन्नस्त्रीरक्त. M reads भिन्नचेद्रक्त.

मर्द्दयेच्छागरक्तेन ध्मातं खोटो[1] भवेत् प्रिये ॥ ४८ ॥
स सूतः शतवेधी तु[2] सर्व्वव्याधिहरो भवेत्[3] ।
गुटिकां धारयेद्वक्त्रे जीवेद्वर्षसहस्रकम् ॥ ४९ ॥
पीतवर्णमयस्कान्तं भित्त्वं[4] हेमसमप्रभम् ।
वेधयेत् सर्व्वलोहानि स्पर्शमात्रेण सुन्दरि[5] ॥ ५० ॥

इति कान्तबन्धः ॥

लाङ्गली करवीरञ्च[6] चित्रकं गिरिकर्णिका[7] ।
स्नौस्तन्यं[8] टङ्कसौवीरं मूषालेपन्तु[9] कारयेत् ॥ ५१ ॥
चपलाद्द्विगुणं सूतं[10] सूताद्द्विगुणकाञ्चनम्[11] ।
नष्टपिष्टं तु तत् कुर्य्यात् अन्धमूषागतं[12] धमेत् ॥ ५२ ॥
तत्र स्थितो रसेन्द्रोऽयं[13] खोटो भवति शोभनः[14] ।

---

(1) D and K read ध्मातः, which is not correct. M reads ध्मातं वं.डो.
(2) D has an incomplete charaṇa— ससूतः शतवे तु. (3) D reads शतव्याधिहरो भवेत्. K wants this charaṇa and the next four ones.
(4) D and My read भिन्न, which seems to be incorrect. (5) द्राव. येत् स्पर्शमात्रेण सर्वलोहानि सुन्दरि, a variant in M. (6) D reads कनकवीरा. (7) K reads गिरिकर्णिकं. (8) K reads स्नौस्तन्य.
(9) Both D and K read मूखालेपं तु, which is not correct. (10) चपलाद्द्विगुणं सूतं is the variant in D, M and My, which is inc. चपलाद्द्वि-गुणं सं तु is the variant in K, which is also incorrect. (11) M and My read erroneously सूताद्द्विगुणकांचनम्. (12) Both D and K read अंधमूखागतं, which is incorrect. (13) K reads रसैयद्रा, which is absurd. (14) D reads शोभने. वंडो भवति शोभनं, an incorrect variant in M.

शतांशं[1] वेधयेन्नागं गुञ्जावर्णस्तु जायते[2] ॥ ५३ ॥
तेन नागशतांशेन शुल्वं रक्तनिभं भवेत् ।
तेन शुल्वशतांशेन[3] तारं विध्यति काञ्चनम् ॥ ५४ ॥
चपलस्य तु षड्भागाः[4] तारभागास्तु सप्त च[5] ।
अष्टौ कनकभागास्तु[6] नव भागा रसस्य तु[7] ॥ ५५ ॥
त्रिंशद्भागा मिलित्वा तु भवन्ति सुरवन्दिते ॥ ५६ ॥
चित्रकं करवीरं च लाङ्गली रुदन्तिका तथा[8] ।
मर्दितं मातुलुङ्गाम्ले[9] मूषालेपन्तु[10] कारयेत् ॥ ५७ ॥
अन्धयित्वा धमेद्देवि[11] खोटो भवति शोभनः[12] ।
तेन खोटशतांशेन[13] विद्धो नागोऽरुणो भवेत् ॥ ५८ ॥
तेन नागेन विद्धं तु[14] शुल्वं गुञ्जानिभं[15] भवेत् ।
तेन शुल्वेन तारं तु विद्धं[16] भवति काञ्चनम् ॥ ५९ ॥

---

(1) D reads शतांशेन. K reads शतांशे. (2) D has गुञ्जावस्य तु, which is inc. My has जारयेत्. (3) M reads नागशतांशेन, which seems to be inc. (4) K reads षड्भागं. M reads षड्भागः, which is inc. (5) सप्त च तारभागकाः, a variant in D. K and M read तारभागन्तु, which is inc. My reads तारा भागस्य, which is also inc. (6) Both D and M have कनकभागन्तु, which is inc. (7) M reads च. (8) लाङ्गली गिरिकर्णिका, a variant in D. (9) मातुलिंगाम्लैः is the reading in K. (10) K reads मूखालिपं तु, (मूखा = मूषा). (11) My has साधयित्वा. M has भवेद्देवि. (12) Both D and M read शोभने. M reads बीट्टा. (13) M reads बीटशतांशेन. We do not find 66 ( 58—124 ) ślokas in D. (14) M has तत् instead of तु. My has पिष्टं तु. (15) M and My read गुञ्जारुणं. (16) M reads मिद्ध, which is inc.

हेमाभं चपलं[1] देवि पादार्द्धेन[2] तु संयुतम् ।
पादेन[3] कनकं दत्त्वा कुनट्या मर्द्दयेत् क्षणम् ॥ ६० ॥
लाङ्गली चित्रकञ्चैव स्नौस्तन्यं करवीरकम्[4] ।
गृध्रविष्ठा तथा[5] सर्व्वं मूषालेपं[6] तु कारयेत् ॥ ६१ ॥
तन्मध्ये तु स्थितं ध्मातं खोटो भवति शोभनः[7] ।
पूर्व्वोक्तं वेधयेदेतं[8] निर्व्वीजं कनकं भवेत् ॥ ६२ ॥
[ सुतप्ते लौहपात्रे च क्षिपेच्च पलपूर्णकम् ।
सवीजं पारदं कृत्वा चपलस्य तु वापयेत् ।
लाक्षाभो बध्यते सूतो गजेनेव महागजः ॥ ][9]

॥ इति चपलबन्धः ॥

शुद्धसूतपलैकं तु[10] पलैकं गन्धकस्य च[11] ।
एकीकृत्याथ संमर्द्द्य धुस्तूरस्य रसेन च[12] ॥
भावयेच्चक्रयोगेन[13] भस्मीभवति सूतकम्[14] ॥ ६३ ॥

---

(1) हेमाभश्चपलं is the reading in M. (2) M reads पादोर्धेन, which is inc. (3) M and My read पारदे. (4) कट्टवीरकम् is the reading in M. (5) M has गृध्रविष्टतया, which is inc. My reads ततः. (6) K reads मुखालिपं, which is inc. (7) खोट्टो भवति शोभनः, a variant in M. After this My has the following hemistich—तेन खोटशतांशेन विद्धो नागोऽरुणो भवेत् । (8) K reads वेधयेदत्तं, which is inc. (9) The portion within brackets is found only in M and My. (10) K reads बद्ध in place of शुद्ध. M reads च instead of तु. (11) K reads तु. (12) धत्तूररसकेन तु, a variant in K. (13) M and My read मारयेच्चक्रयोगेन. (14) भस्म भवति सूतकं is the variant in M.

अन्धमूषागतं ध्मातं खोटो भवति शोभनः ।
सूतं हेम च[1] नागं च चन्द्रार्कौ[2] चापि वेधयेत् ॥ ६४ ॥
पलैकं शुद्धसूतस्य कर्षैकं गन्धकस्य च[3] ।
मर्दयेत् स्निग्धखल्ले तु[4] देवदालीरसप्लुतम्[5] ।
मर्दयेत्तु कराङ्गुल्या[6] गन्धपिष्टिस्तु[7] जायते ॥ ६५ ॥
जम्बीरार्द्ररसेनैव[8] दिनमेकन्तु मर्दयेत् ।
पलाशमूलक्वाथेन मर्दयेत् त्रिदिनं ततः[9] ॥ ६६ ॥
पञ्चद्रावकसंयुक्तां वटिकां कारयेत् शुभाम्[10] ।
पलाशमूलकल्केन वटिकां तां प्रलेपयेत्[11] ॥ ६७ ॥
धमेत् खोटो भवेच्छ्वेतः[12] काचटङ्कणयोगतः ।
शोधयेत् तत् प्रयत्नेन यावन्निर्मलतां व्रजेत्[13] ॥ ६८ ॥
तत्खोटं रञ्जयेद्देवि[14] त्रिगुणं पन्नगं ततः ।
शतशो रञ्जयेत् पश्चात् शुद्धाभ्रक[15]कपालिना[16] ॥ ६९ ॥

---

(1) K reads हेमं च, which is unusual. M reads सितहेम च. (2) M and My read चन्द्रार्कं. (3) K has an incomplete charaṇa कस्य च. (4) स्निग्धखल्लेन is the reading in K and My. (5) M has देवदालीरसैस्सह. (6) अङ्गुष्टेनापि सम्यक्, an incomplete variant in M. (7) M reads गन्धपिष्टन्तु. (8) जंबिरस्य रसेनैव, a variant in M and My. (9) त्रिदिनं मर्दयेत्ततः, a variant in M. (10) M reads दृढाम्. (11) K reads तु लेपयेत्. (12) M reads erroneously खोटो भवेत् श्वेते. (13) K has मान्निर्मलतां व्रजेत्. M has यावन्निलतां व्रजेत्. Both are incorrect. (14) M has तद्वोट्टो जायते देवि. My has तं खोटं जारयेद्देवि. (15) M reads शुभाभ्रक. (16) My reads कपालिका.

शुल्वे तारे च खोटोऽयं[1] सहस्रांशेन वेधकः[2] ॥
गन्धकेन हते सूते[3] मृतलोहानि[4] वाहयेत् ॥ ७० ॥
पुनर्हेम समावर्त्त्य समांशं भक्षणं[5] कुरु।
जारिते शुल्वतारे च[6] घोषं[7] विध्यति सूतकः[8] ॥ ७१ ॥
रसं[9] हेमसमं कृत्वा पिष्टिकार्द्धेन गन्धकम्[10]।
द्विपदीरजसा युक्तं मर्द्दयेट्टङ्कणान्वितम् ॥ ७२ ॥
नष्टपिष्टं च तत् शुल्वं[11] ध्मातं खोटो भवेत्ततः[12]।
सौवीरं टङ्कणं काचं दत्त्वा दत्त्वा तु शोधयेत्[13] ॥ ७३ ॥
अक्षीणो मिलते हेम्नि[14] समावर्त्तस्तु जायते।
समांशं भक्षणं हेम्नि[15] शुद्धसूतेन कारयेत् ॥ ७४ ॥
नष्टपिष्टं च तच्छुल्वं[16] ध्मातं खोटो भवेत्ततः[17]।

---

(1) M reads बोटोयं. (2) M reads वेधयेत्. (3) गंधके मिलिते सूते, a variant in M. गन्धकेन हिते सूते, a variant in My. (4) K reads मृतलोहानी, which is gram. inc. (5) K has समांसम्रक्षणं, which has no sense at all. (6) शारीतशुल्वसूतारं, a variant in M, which is unintelligible. सारितं शुल्वतारे च, a variant in My. (7) K reads घाव, which appears to be incorrect. (8) M and My read सूतकम्. (9) M reads सूतं. My reads रस, which is incorrect. (10) K and My read गन्धकः. M reads गन्धकौ, which appears to be incorrect. (11) M and My read शुष्कं. (12) ध्मातो भवति खोटकः, a variant in My. (13) This hemistich and the next four are not found in M. (14) My reads मिलति हेमा. (15) My reads मं तु. (16) My reads तच्छुष्कं. (17) This hemistich is written in My after the next hemistich.

द्विपदीरजसा युक्तं मर्दयेत् टङ्कणान्वितम् ॥ ७५ ॥
चन्द्रार्कषोड़शांशेन[1] विद्धं भवति काञ्चनम् ।
हेमार्द्धं मिलितं तत्तु[2] मातृकासमतां[3] व्रजेत् ॥ ७६ ॥
कुर्य्यात् संकलिकायोगात्[4] वेधं[5] दशगुणोत्तरम् ।
यथा हेम्नि तथा तारेऽप्यादिवीजानि योजयेत्[6] ॥ ७७ ॥
तृतीयसंकलाबद्धं[7] षट्शतांशेन वेधयेत्[8] ।
चतुर्गुणेन तेनैव सहस्रांशेन काञ्चनम् ॥ ७८ ॥
अनेन क्रमयोगेण सप्त संकलिका यदि ।
कुरुते काञ्चनं दिव्यमष्टौ लोहानि सुन्दरि[9] ॥ ७९ ॥
तं पुनश्चूर्णयित्वा तु[10] पुटेद्भस्म प्रजायते[11] ।
सर्व्वव्याधिहरो देवि[12] पलैके तस्य भक्षिते ॥ ८० ॥
द्विपले[13] ब्राह्ममायुष्यं[14] त्रिपले[15] वैष्णवं भवेत् ।

---

(1) M and My read चन्द्रार्क षोड़शांशेन. (2) M reads हेमार्द्धं, which appears to be incorrect. My reads तं तु. (3) M has मात्रका, which has no clear sense. (4) सङ्कलिकायोगात् is the variant in M. (5) M reads वेध्यं. (6) स्यादीजानि योजयेत्, an incomplete charaṇa in K. ऽप्यादिवीजेन योजितम्, a variant in M. My reads व्याधिवीजानि योजितं. (7) तृतीयसङ्कलावन्धं, a variant in M. (8) षट्पते भाग-वेधकं, a variant in K and My, which is partly incorrect. (9) M reads विध्यति. (10) B wants तु. (11) Both B and M read पुटयेद्भस्म जायते. My reads खोटयेद्भस्म जायते. (12) My reads सर्व-व्याधि हरेद्देवि, which is incorrect. (13) K reads द्विपलं. My reads डेपलं, which is incorrect. (14) B and My read ब्रह्म मायुष्यं. K reads ब्रह्म आयुष्यं. (15) K reads त्रिपलं. My reads त्रिदश्चे, which is incorrect.

चतुःपले तु रुद्रत्व-मीशः[1] पञ्चपले भवेत् ॥ ८१ ॥
षट्पले भक्षिते देवि सदाशिवतनुर्भवेत् ॥ ८२ ॥
सूतकं गन्धकं तारं[2] मेषवल्लीरसेन च[3] ।
त्रिदिनं मर्द्दयेत्तीक्ष्णं[4] वङ्गपादेन मेलयेत्[5] ।
अन्धमूषागतं ध्मातं वङ्गं स्तम्भयति क्षणात् ॥ ८३ ॥
चूर्णितं गन्धकं देवि मर्कटी[6]रसभावितम् ।
भावयेच्छतवारांस्तु जीव[7]भस्म तु गच्छति ॥ ८४ ॥
दीपयेन्मृन्मये[8] पात्रे रसेन सह संयुतम् ।
तापयेद्रवितापेन मर्कटी[9]रससंयुतम् ।[10]
गन्धकं ग्रसति सूतः[11] पिष्टिका[12] भवति क्षणात् ॥ ८५ ॥
तिलपर्णी[13]रसेनैव गन्धकं भावयेत् प्रिये ।
सप्त वारांस्तु देवेशि छायाशुष्कं पुनः पुनः ॥ ८६ ॥
शोधितं पातितं सूतं पलैकप्रमितं[14] प्रिये ।

---

(1) All the texts read ईशः ; but ऐशं is proper. (2) M reads कान्तं. (3) मेषवल्लीरसे समाः, a variant in B. अष्टवल्लीरसेन च, a variant in K. मेषवल्लीरसैस्सह, a variant in M. मेषवल्लीरसे समाः, a variant in My. (4) M and My read मर्द्दयेच्चूर्णं. (5) वंकपत्रेषु लेपयेत्, a variant in M. वंगपादेन लेपयेत्, a variant in My. (6) My reads कर्कोटी. (7) My reads वीजं. (8) B and My have द्रावयेन्मृन्मये. M has तापयेन्मृन्मये. (9) My reads कर्कोटी. (10) This hemistich is not found in K. (11) K reads सूतं. (12) M reads पिष्टका. (13) K reads तिम्नपर्णि. (14) B and My read पलैकं प्रमितं, which is not correct. K reads पलैक समतं, which is senseless.

मूषामध्ये[1] विनिक्षिप्य नरेन्द्ररस[2]संयुतम् ।
जारयेद्वालुकायन्त्रे भावितं गन्धकं[3] पुनः ॥ ८७ ॥
त्रुटि त्रुटि[4] प्रदातव्यं गन्धकञ्च पुनः पुनः ।
अनेन क्रमयोगेण[5] जायते गन्धपिष्टिका ॥ ८८ ॥
गन्धपाषाणचूर्णं तु कनकस्य रसेन तु ।
एकीकृत्य तथा खल्ले मर्द्दयित्वा यथाविधि[6] ।
आतपे स्थापयेद्देवि कनकस्य रसेन तत् ॥ ८९ ॥[7]
भावयेत् सप्तवारांस्तु स्त्रीपुष्पेण तु सप्तधा ।
शुद्धसूतपलैकं च खर्परे[8] दापयेत्ततः ॥ ९० ॥
भावितं गन्धकं दद्यान्नरपित्तेन संयुतम् ।
दोलयेद्द्रवितापेन[9] पिष्टिका भवति क्षणात् ॥ ९१ ॥
गन्धकं सूक्ष्मचूर्णन्तु चणकाम्लेन भैरवि ।
भावयेत् सप्तवारांस्तु[10] स्त्रीपुष्पेन च[11] सप्तधा ॥ ९२ ॥
द्रुतसूतकमध्ये तु कर्पूरं गन्धकं समम्[12] ।

---

(1) K reads मूखामध्ये, which is incorrect. (2) K reads नरेंद्र रस, which is incorrect. My reads रसेन्द्र. (3) K reads गंधकं. (4) My reads कुटीकुटि. (5) K reads क्रियमाणेन. (6) B reads खल्ले मर्द्यं दिनावधि. (7) The 89th śloka is not found in M and My. (8) M reads कर्परे, which seems to be incorrect. (9) कालयेद्द्रवितापेन, a variant in B. लोलयेद्द्रवितापेन, a variant in M. लोलयेद्द्रवितापेन, a variant in My. (10) All the texts read सप्तवाराणि, which is gram. inc. (11) K, M and My read तु. (12) My reads रसं.

दापयेन्निक्षिपेद्गोष्ठे[1] सप्ताहाद्गन्धपिष्टिका[2] ॥ ८३ ॥
कटुकोशातकीबीजं चण्डाली[3]कन्दमेव च[4] ।
स्तनक्षीरेण संपेष्य[5] पिष्टिकां तेन लेपयेत् ॥ ८४ ॥
पुटयेद्भूधरे यन्त्रे स्तम्भते[6] नात्र संशयः ।
हेमसम्पुटमध्ये तु समावर्त्तं[7] तु कारयेत् ॥ ८५ ॥
अष्टमांशेन तेनैव नागवेधं[8] प्रदापयेत् ।
तन्नागं जायते दिव्यं सिन्दूरारुणसन्निभम् ॥ ८६ ॥
तन्नागेनाष्टमांशेन[9] शुल्ववेधं प्रदापयेत् ।
षोड़शांशेन तेनैव तारवेधं[10] प्रदापयेत् ॥ ८७ ॥
तत्तारं जायते हेम सिद्धयोगेश्वरीमतम्[11] ॥ ८८ ॥
गन्धपिष्टिपलैकं तु नागपिष्टिपलाष्टकम् ।
लेपयेन्नागपत्राणि[12] छायायां शोषयेत्ततः ॥ ८९ ॥

---

(1) B, K and My read गोष्टे. (2) B reads गंधपिष्टिकां, which seems to be incorrect. (3) K reads चांडाली. (4) M has चण्डालीकाममेव च, which seems to be incorrect. (5) स्तन्यक्षीरेण संमर्द्य, a variant in K. (6) M reads स्तम्भितो. My reads स्तंभते. (7) M reads समावृत्तं. (8) This hemistich is not found in K. M reads तारवेधं. (9) तन्नागं चाष्टमांशेन, a variant in K. नागेन चाष्टमांशेन, a variant in M. नागेनाष्टमसंशेन, a variant in My. (10) B reads तारं वेधं. K and My read तारे वेधं. (11) K reads सिद्धयोगीश्वरीमतं. M and My want this hemistich. (12) M reads नागपात्राणि, which is incorrect.

आटरूषकपिण्डेन[1] नागपत्राणि[2] लेपयेत् ।
आरण्योत्पलके देवि दापयेच्च पुटत्रयम्[3] ॥ १०० ॥
तन्नागं म्रियते दिव्यं सिन्दूरारुणसन्निभम् ॥ १०१ ॥
तन्नागपलमेकं[4] तु शुल्वचूर्णपलाष्टकम्[5] ।
वासकस्य रसेनैव[6] प्रहरैकं तु मर्दयेत् ।
मारयेत् पातनायन्त्रे शुल्वं तन्म्रियते[7] क्षणात् ॥ १०२ ॥
षोड़शांशेन तेनैव तारवेधं[8] प्रदापयेत् ।
जायते कनकं दिव्यं देवाभरणमुत्तमम्[9] ॥ १०३ ॥
या काचिद्गन्धपिष्टी तु[10] आदौ[11] नागं तु मारयेत् ।
नागं तु[12] वेधयेच्छुल्वं शुल्वं तारं तु वेधयेत् ।
कनकं जायते दिव्यं सिद्धयोग उदाहृतः[13] ॥ १०४ ॥

---

(1) आरूषकसपिंडत, an incorrect variant in B. आयुपरसपिंडेन, a variant in K, which has no clear sense. (2) M reads नागपात्राणि, which is incorrect. (3) This hemistich and the next one are not found in M. (4) K reads तं नागं पलमेकं. My reads तन्नागं पलमेकं. (5) K and M read शुल्वचूर्णं पलाष्टकम्. (6) My reads वासकस्वरसेनैव. (7) B and K read तु म्रियते. My reads erroneously तं म्रियते. (8) B and K read तारे वेधं. (9) देवाभरणभूषणं, a variant in B, M and My. (10) K has या काचिद्गन्धपिष्टिस्तु. M has या काचिद्गन्धपिष्टन्तु, which is gram. inc. (11) M wants आदौ. (12) B and My read नागेन. This hemistich is wanting in K. (13) सिद्धयोगमुदाहृतं, an incorrect variant in B. This hemistich is not found in M and My.

गन्धकं मधुसंयुक्तं हरबीजेन[1] मर्द्दितम् ।
भूमिस्थं मासषट्कं तु[2] तारमायाति[3] काञ्चनम् ॥ १०५ ॥
उद्वर्त्तनं तु[4] तेनैव कुष्ठरोगस्य नाशनम्[5] ।
घृतेन सह संयुक्तं व्रणरोगविनाशनम्[6] ।
संवत्सरप्रयोगेण सहस्रायुर्भवेन्नरः ॥ १०६ ॥

॥ इति गन्धकबन्धः ॥

शुद्धसूतपलैकं च पलैकं तालकस्य च ।
एकीकृत्याथ संमर्द्य उन्मत्तकरसेन च ।
मारयेच्चक्रयन्त्रेण भस्मीभवति सूतकम्[7] ॥ १०७ ॥
अन्धमूषागतं ध्मातं खोटो भवति शोभनः ।
वङ्गं तारं[8] च शुल्वं च क्रमशो वेधयेद्रसः ॥ १०८ ॥
शुद्धवङ्गपलैकं च पलैकं सूतकस्य च[9] ।
द्विपलं[10] तालकं चैव उन्मत्तरसमर्द्दितम् ।
मारयेत् पातनायन्त्रे धमनात् खोटतां नयेत्[11] ॥ १०९ ॥

---

(1) My reads erroneously चिरिबीजेन. (2) M and My read मासमेकं तु. (3) B reads तारमायति. K reads तारं भवति. M reads तारमायात. The first and the last readings are incorrect. (4) M has उद्वर्त्तनेन. (5) सर्वकुष्टं विनश्यति, a variant in B, K and My. (6) K reads वर्णरोगविनाशनं. M wants this hemistich. (7) B, K and My read सूतकः, which is not correct here. (8) M reads वङ्गं. My reads वंगतारं. (9) My reads तालकस्य च. (10) M reads द्वे पले. My reads द्विपले. (11) M reads खोटतां नयेत्. M and My have after this तालकबन्धः ॥

तालपिष्टीपलैकं[1] तु पलैकं गन्धकस्य च ।
द्वे पले शुद्धसूतस्य[2] दिनमेकन्तु तेन वै ॥ ११० ॥
एकीकृत्याथ संमर्द्य उन्मत्तकरसेन च ।
मारयेत् पातनायन्त्रे धमनात् खोटतां नयेत् ॥ १११॥

॥ इति तालकबन्धः ॥

शुद्धनागपलैकं च पलैकं सूतकस्य च ।
पलद्वयं कुनट्याश्च सर्व्वमेकत्र मर्द्दयेत्[3] ।
मारयेत् पातनायन्त्रे धमनात् खोटतां नयेत् ॥ ११२ ॥
हेमपिष्टिपलैकं तु पलैकं गन्धकस्य च ।
एकीकृत्याथ संमर्द्य धुर्त्तूरकरसेन[4] च ।
मारयेत् पातनायन्त्रे धमनात् खोटतां नयेत् ॥ ११३ ॥[5]
कृष्णाभ्रकस्य सत्त्वं च कान्तं तीक्ष्णं च हाटकम् ।
शुद्धशुल्वं च तारं च माक्षिकं समभागिकम्[6] ।
अन्धमूषागतं ध्मातं खोटो[7] भवति तत्क्षणात् ॥ ११४ ॥

---

(1) K reads तालपिष्टिपलैकं. This charaṇa and the next seven are not found in M and My. (2) B reads द्वीपले, which is incorrect. K reads द्विपलं. (3) K reads रंजयेत्, which seems to be incorrect. (4) K and My have धत्तूरकरसेन. (5) We do not find 112th and 113th ślokas in B. We find the following hemistich in K only :— हेमपिष्टिपलैकं तु पलैकं गंधकस्य तु, which seems to us a repetition. (6) शुद्धशुल्वतारं च माक्षिकं समभागानि कारयेत्, a variant in B, which appears to us irregular. शुद्धतारञ्च माक्षीकं समभागानि कारयेत्, a variant in M and My, wherein शुल्व is not mentioned. (7) M reads खोटी.

तत्खोटपलमेकं तु पलैकं सूतकस्य च।
पलद्वयं कुनव्याश्च सर्व्वमेकत्र मर्द्दयेत्[1]।
मारयेत् पातनायन्त्रे धमनात् खोटतां[2] नयेत्॥ ११५॥
कृष्णाभ्रकपलैकं तु[3] रसकस्य पलं तथा[4]।
सूतकस्य पलैकं तु सर्व्वमेकीकृतं प्रिये॥ ११६॥
उन्मत्तकरसेनैव मर्द्दयेत् प्रहरद्वयम्।
मर्द्दयेद्दिनमेकं तु[5] टङ्कणेन समन्वितम्॥ ११७॥
गुटिकां[6] कारयेद्देवि छायाशुष्कां तु कारयेत्।
महावह्निगतं ध्मातं खोटो भवति सूतकम्[7]॥ ११८॥
तं खोटं शोधयेच्छ्वेत[8]काचटङ्कणयोगतः।
हेम्ना सह समावर्त्त्य[9] सारणात्रयसारितम्॥ ११९॥
सहस्रांशेन तेनैव शुल्ववेधं[10] प्रदापयेत्।
अनेन क्रमयोगेण कोटिवेधी भवेद्रसः॥ १२०॥
वीजद्वयं पलाशस्य पलमेकं तु सूतकम्।
जम्बीराम्लेन संमर्द्य छायाशुष्कं तु कारयेत्॥ १२१॥

---

(1) B and My read कारयेत्. (2) M reads खोट्टतां. (3) कृष्णःअपलमेकं तु, a variant in K. (4) पलैकं गन्धकस्य च, a variant in M. This charaṇa and the next one are not found in My. (5) B and My read हि. After this charaṇa we do not find 70 (117—187) ślokas in M. (6) B has चं गुलिकां, which seems to be incorrect. (7) K and My read सूतकः. (8) K reads शोधयेद्देलत्, which seems to be incorrect. My reads खोटं संशोधयेत् श्वेत. (9) हेम्ना सहसमावर्त्य, a variant in B. (10) B reads शुद्धवेधं.

तुम्बी च[1] मेघनादा च काकजङ्घा च चूलिका[2] ।
स्त्रीस्तन्येन प्रलिप्तायां मूषायां[3] च विनिक्षिपेत् ॥ १२२ ॥
धमयेत् खदिराङ्गारैः खोटो भवति वाञ्छयः ॥ १२३ ॥
पलाशतैलं[4] संमर्द्य यावत् स्याद्रसपिष्टिका[5] ।
अन्धमूषागतं ध्मातं खोटो भवति तत्क्षणात् ॥ १२४ ॥
पूर्व्वशुद्धेन सूतेन[6] सह हेम्ना[7] च पार्व्वति ।
गोलकं कारयेत्तेन मर्द्दयित्वा द्रुतं[8] कृतम् ॥ १२५ ॥
ब्रह्मवृक्षस्य बीजानि कार्पासास्थि विभीतकम् ।
पञ्चचिञ्चा तु[9] वन्ध्या च राजिका च समन्वितम् ॥ १२६ ॥
सूक्ष्मपिण्डीकृतं[10] सर्व्वं तेन लिप्ता तु गोलकम् ।
पुटनैः सप्तभिर्देवि पिष्टिकास्तम्भनं भवेत् ॥ १२७ ॥
बृहत्पुटं ततो दत्त्वा मूषायां तत्तु भावयेत्[11] ।
समावर्त्तं तु तं सूतं[12] समहेम्ना नियोजितम्[13] ।

---

(1) B and My read तुंबिका. (2) My reads चूलिका. (3) K reads मूखायां, which is incorrect. My reads स्तन्यं च तैः प्रलिप्तायां मूषायां. (4) K has पातालतैलं. (5) My reads स्यादगन्धपिष्टिका. (6) पूर्व्वसुतेन शुद्धेन, a variant in D and K. (7) D reads सहैमिकेन, which is incorrect. My reads समहेम्ना. (8) D reads घृतं, which is incorrect. My reads कृतं. (9) B wants तु. K reads पंचचिंचा. (10) D reads erroneously सूक्ष्मपीडीसतं. (11) मूषायां तु भवेत्ततः, a variant in B. मूखायां तु भवेत्ततः, a variant in K. (12) B reads तत् सूतं. D has an incomplete charaṇa—समावर्त्तं तु सूतं. (13) D has an incomplete charaṇa—हेम्ना नियोजितम्.

जातांशेन तु चन्द्रार्कं वेधयेत् सुरवन्दिते ॥ १२८ ॥
पुनस्तेनैव योगेन पिष्टीस्तम्भं तु[1] कारयेत् ।
सारयित्वा ततो हेम्ना वेधयेच्च सहस्रकम्[2] ॥ १२९ ॥
एवं लक्षाणि कोटिं च वेधयेत् क्रमयोगतः ।
सप्तसंकलिकादूर्द्धं कृत्वा वक्त्रे[3] तु गोलकम् ।
वर्षणैकेन स भवेत्[4] वलीपलितवर्ज्जितः ॥ १३० ॥
चाण्डाली[5] राक्षसी चैव कुण्डगोलोद्भवो[6] रसः ।
बीजं सूतं च वैक्रान्तं मर्द्दयेत् प्रहरत्रयम्[7] ॥ १३१ ॥
विशुद्धं गोलकं[8] कृत्वा मूकमूषागतं[9] पुटेत् ।
खोटस्तु जायते देवि सुध्मातः[10] खदिराग्निना ॥ १३२ ॥
चाण्डालीराक्षसीपुष्प-रस[11]मध्वाज्यटङ्कणैः ।
महारसाष्टमध्येक-मभ्रकं चापि[12] योजयेत् ॥ १३३ ॥
नागं वङ्गं समं[13] सूतं हेम तारमथापि वा ।

---

(1) B and My read पिष्टिस्तम्भन, which is gram. inc. (2) वेधे- चैव सहस्रकं, a variant in B and My. (3) K wants चक्र. My reads चक्रं. (4) D reads सह भवेत्, which is incorrect. (5) B reads चण्डाली. (6) कुंडलीलोद्भवे is the reading in D, which seems to be incorrect. (7) D and My have प्रहरद्वयम्. (8) D reads विशुद्धगोलकं. (9) D and K read मूकमूखागतं, which is incorrect. (10) B reads ध्मातः, which mars the metre. (11) चंडालीराक्षसी- पुष्पीरस is the reading in B. राजसंपुष्पेरस is the reading in D. (12) B reads मध्येकमभ्रकं चापि, wherein the first term is incorrect. (13) K and My read नागवंगसमं.

अभ्रकं द्रुतिसत्त्वं[1] वा मर्द्दयेत् प्रहरद्वयम्[2] ॥ १३४ ॥
छायाशुष्कं ततो गोलं[3] मूकमूषागतं धमेत् ।
दत्त्वा लघुपुटं देवि खोटो भवति शोभनः ॥ १३५ ॥
रम्भा वीरा[4] स्नुहीचीरं कञ्चुकी यवचिञ्चिका ।
दीनारी चैव[5] गोरम्भा मीनाक्षी काकमाचिका ॥ १३६ ॥
एभिर्मर्द्दित[6]सूतस्य पुनर्जन्म न विद्यते ।
पूर्व्ववत् क्रमयोगेण खोटो भवति शोभनः ॥ १३७ ॥
विष्णुक्रान्ता च चक्राङ्का बला च तुलसी तथा[7] ।
महासोमाह्विवल्ली[8] च सूर्य्यावर्त्तश्च सुन्दरि[9] ।
एभिस्तु मर्द्दितः सूतः[10] पूर्व्ववत् खोटतां व्रजेत्[11] ॥ १३८ ॥
सुखेन ग्रसते ग्रासं[12] जारणा तेन सुन्दरि ।
रसोनराजिकामूलै[13]र्मर्द्दितं वरवर्णिनि ।

---

(1) My reads द्रुतसत्वं. (2) B reads प्रहरत्रयम्. (3) K reads गोलां, which is incorrect. My reads तथा गोलं. (4) K and My read विरा. (5) K reads दीनादिश्चैव, which seems to be incorrect. (6) समैर्मर्द्दितं is the reading in D, which is incorrect. (7) काचला तुलसी कथा, a variant in D. (8) B reads महासोमा च वह्नि, wherein the last term is incorrect. My reads महासोमा च वल्ली. (9) सूर्यावर्त्तं च सुन्दरि, a variant in D. सूर्यावर्त्ता च सुंदरी, a variant in K. सूर्यावर्त्तं च सुंदरी, a variant in My. (10) B and My have मर्दितं सूतं. D has मर्दितैः सूतं. (11) B, K and My read भजेत्. (12) B has an incomplete charaṇa—सुखेन ग्रसं. D and My want this charaṇa and the next nine ones. K reads ग्रासो. (13) रसंनिश्नीविमूलैः, a variant in B.

दिव्यौषधिपुटं पाच्यं[1] रसखोटस्य लक्षणम् ॥ १३९ ॥
एतत्ते कथितं गुह्यं विज्ञेयं[2] रसवादिभिः ।
मत्प्रसादेन देवेशि तस्य सिद्धिर्न[3] संशयः ॥ १४० ॥
स्नुहीक्षीरं सकाञ्जीकं[4] बीजानि[5] कनकस्य च ।
कञ्चुकी लाङ्गली चेन्द्र-वारुणी विषमुष्टिका ।
पलाश[6]मूलतोयं च मर्द्दयेत्तेन सूतकम् ॥ १४१ ॥
समे हेम्नि[7] समं सूतं पिष्टिकां कारयेद्बुधः[8] ।
महारसान् पिष्टिकार्थं[9] मर्द्दयेदौषधीरसैः ॥ १४२ ॥
यामत्रयं मर्द्दयित्वा गोलकं कारयेद्बुधः ।
पिष्टिकां बन्धयित्वा तु गन्धतैले[10] विपाचयेत् ॥ १४३ ॥
अन्धमूषागतं गोलं[11] छायाशुष्कं तु कारयेत् ।
[ ततो लघुपुटं दत्त्वा खदिराग्नौ तु धामयेत् ।
खोटस्तु जायते हेम्नि सह हेम्ना तु सारयेत् ॥][12]

---

(1) B reads erroneously पाश्य. (2) B reads विज्ञीतं, which is incorrect. (3) B reads तस्य सिद्धेन. (4) स्नुहीक्षीरस्य काञ्जिकं, a variant in B. स्नुहिक्षीरस्य कांजीकं, a variant in My. (5) My reads बीजकं. (6) K reads पालाश. (7) B and My have समहेम्नि. (8) पिष्टिका कार्द्देबुध, an incorrect variant in D. My reads कारयेत्ततः. (9) महामसान् पिष्टिकारार्थं, an incorrect variant in B. This hemistich and the next one are not found in D. महारसं पिष्टिकार्थं, a variant in My. (10) D has गन्धतैलं, which is inaccurate. (11) D and K have चैव. (12) The śloka within brackets is found only in B and My.

अक्षीणो मिलते[1] हेम्नि समावर्त्तश्च जायते ॥ १४४ ॥
भक्षणादेव सूतस्य[2] दिव्यदेहो भवेन्नर: ।
वेधयेत् सर्व्वलोहानि रञ्जित: क्रमितो रस:[3] ॥ १४५ ॥
समांशभक्षणं सूतं[4] मर्द्दयेद्दोषधीरसै:[5] ।
नष्टपिष्टं तु तं कृत्वा पूर्व्वयोगेन धामयेत् ॥ १४६ ॥
खोटस्तु जायते दिव्य:[6] षोड़शांशेन वेधयेत्[7] ।
वद्ध:[8] संकलिकायोगाद्विध्येद्दशगुणोत्तरम् ॥ १४७ ॥
मृगदूर्व्वा[9] चन्द्रवल्ली पक्का चिञ्चा[10] तथैव च ।
कोकिला[11] करवीरं च वीजं चोन्मत्तकस्य च ।
काकाण्डी[12]फलसंयुक्तं मर्द्दयेत् सुरसुन्दरि ॥ १४८ ॥
समहेम्नि समं सूतं पिष्टिकां कारयेद्बुध: ॥ १४९ ॥
अथवा सारयित्वा तु समेन सह सूतकम् ।

---

(1) D reads मिलिते, which qualifies हेम्नि. My wants this charaṇa. (2) D reads तस्यास्तु. The portion beginning with दिव्यदेहो and ending in वेधयेत् is not found in K. (3) D reads क्रामितो रस:. (4) समांसभक्षणं सूत, a variant in B. समांसं भक्षणे सूते, a variant in D. समांशं भक्षणे सूते, a variant in K. (5) D reads मर्दयेत दुग्धीरसै, which appears to be incorrect. (6) B, K and My read दिव्यं, which is gram. inc. (7) B and My read वेधक:. (8) D reads वद्ध. K reads वद्ध. (9) My reads मृता दूर्वा. (10) B reads erroneously पक्वचिंचा. D reads पक्वचिंची. (11) B has कांचिला. D has कोकला. My has कर्केशा. (12) D reads काकण्डी. K reads काकंडि.

मल्लारसं पिष्टिकार्थं[1] मर्द्दयेदोषधीरसैः ॥ १५० ॥
यामत्रयं मर्द्दयित्वा गोलकं कारयेत्ततः[2] ।
अन्धमूषागतं[3] गोलं छायाशुष्कं तु कारयेत् ॥ १५१ ॥
ततो लघुपुटं दत्त्वा[4] भ्रातः खोटो भवेत् प्रिये ॥ १५२ ॥
मृगदूर्व्वातमासोम-रसैः[5] सूतकचारणम्[6] ।
मूलैस्त्रयाणां लाङ्गल्या रामठेन च हन्यते[7] ॥ १५३ ॥
समेन हेम्ना संयुक्तां पिष्टिकां[8] कारयेद्बुधः ।
अथ तारकपिष्टं च[9] समसूतेन कारयेत् ॥ १५४ ॥
पूर्व्ववत् क्रमयोगेण खोटो भवति शोभनः ।
अन्धमूषागतं[10] भूमौ स्वेदयेत् करिषाग्निना ॥ १५५ ॥
अहोरात्रं त्रिरात्रं वा चूर्णबन्धो[11] भवेत्ततः ।
तच्चूर्णबंधः कुरुते[12] वेधं दशगुणोत्तरम् ॥ १५६ ॥

---

(1) B reads पिष्टिकार्द्धं. D has मल्लाराज्ञं पिष्टिकार्थं. Both the readings seem to be incorrect. (2) K reads चालयेत्ततः. My reads कारयेद्बुधः. (3) D and K read अंधमूखागतं, which is incorrect. (4) K reads दद्यात्. (5) B reads सोमरसौ. मृगदुःखेलमासोमारसैः, a variant in D. My has मृतदूर्वोक्रमासोमरसैः. (6) K reads सूतकचारिणा, which has no sense. (7) D reads हन्यति. My reads रमतेन च हंसते. Both the readings seem to be incorrect. (8) B and My have संयुक्तं पीठिकां, which is incorrect. (9) B and My read अर्धतारक पीतं च. This hemistich and the next two are wanting in D. (10) अंध-मूखागतं is the incorrect reading in B and K. (11) D reads चूर्णं बद्धं. My reads चूर्णबद्धो. (12) D has an incomplete charaṇa बद्ध कुरुते. My has तच्चूर्णबद्धं.

शूलिनीरससूतञ्च[1] स्रोतोञ्जनसमन्वितम् ।
पूर्व्ववत् पिष्टिकायोगात् खोटो भवति शोभनः ॥ १५७ ॥
स्रोतोञ्जनं सतगरं[2] पिष्टित्रययुतं रसम्[3] ।
धमयेदङ्क्षिसंचिप्तं[4] सूतकः सर्व्वकर्म्मकृत् ॥ १५८ ॥
हेमाभ्रं चैव ताराभ्रं[5] शुल्वाभ्रं चाभ्रतीक्ष्णकम् ।
वङ्गाभ्रं चैव नागाभ्रं समसूतेन वेधयेत्[6] ॥ १५९ ॥
यथालाभौषधीद्दष्टं[7] महारससमन्वितम् ।
हेम्ना तारेण शुल्वेन तीक्ष्णवङ्गोरगैस्तथा[8] ॥ १६० ॥
एभिर्व्यस्तैः समस्तैर्वा पिष्टिं कृत्वा समे समाम्[9] ।
मारयेत् पूर्व्वविधिना गर्भयन्त्रे[10] तुषाग्निना ॥ १६१ ॥
समांशं सूतकं दत्त्वा वारं वारं पुनः पुनः ।

---

(1) शूलनीरससूतं च, a variant in D. (2) श्रोतोञ्जनमगतगुणं, a variant in D. K reads समगरं. (3) श्ष्टित्रययुतं रसः, a variant in D, which seems to be incorrect. (4) B reads वङ्क्षिसंचिप्तं, which has no clear sense. (5) The portion beginning from ताराभ्रं and ending in चैव is wanting in K. My has हेमाभ्रकं च ताराभ्रं. (6) समसूतेन वंधयेत्, a variant in B and My. D reads समं सूतेन वेधयेत्, K has समं सूतेन वंधयेत्. (7) यथालाभौषधीद्दष्टं, a variant in D. यदा लाभौषधीद्दष्टं, a variant in My. (8) तीक्ष्णनागरसेन च, a variant in D, which seems to be incorrect. (9) पीठीं कृत्वा समे समाः, a variant in B and My, which is partly correct. D reads समः, which is incorrect. (10) B and D read गर्भपत्रे. For the description of गर्भयन्त्र vide रस. स. Chap. IX, verses 28—31.

जायन्ते विविधाः खोटाः[1] कान्तबद्धो[2] महारसः॥ १६२॥
भवेत् संकलिकायोगात् वेधो दशगुणोत्तरः॥ १६३॥
खोटः पोटस्तथा[3] भस्म धूलिः कल्कश्च[4] पञ्चमः।
एते निगलगोलाभ्यां[5] सर्व्वबन्धफलोदयाः[6]॥ १६४॥
शिग्रुसर्ज्जभवं चारं[7] ब्रह्मबीजानि गुग्गुलुः।
सैन्धवं द्विगुणं दत्त्वा मर्द्दयित्वा विचक्षणः॥ १६५॥
पिष्टिकावेष्टनं कृत्वा कल्केनानेन[8] सुन्दरि।
विल्वप्रमाणं कृत्वा तु मूषामतिदृढ़ां शुभाम्[9]॥ १६६॥
ऊर्द्ध्वाधो लवणं दत्त्वा मूषामध्ये[10] रसं क्षिपेत्।
मूषालेपः प्रदातव्यो[11] दग्धशंखादिचूर्णकः[12]॥ १६७॥

---

(1) जायते विविधः खोटः, a variant in D, K and My. (2) D reads कान्तवेधो. K and My read कान्तिबद्धो. (3) B and My read पाटस्तथा. (4) D reads काल्कं च. My reads धूलौ कल्कं च. (5) D reads कौलाभ्यां. K reads कालाभ्यां. My reads रोगाभ्यां. (6) सर्वबंधा फलोदया, a variant in B. सर्वं बन्धफलो दिशेत्, a variant in D. सर्वबद्धः फलोदया, a variant in My. (7) कुद्याकंसंभवं चीरं, a variant in B and My. D reads चारी. सिग्रुसर्जयवचारं, a variant in K. (8) D has मूखा यवेन. K has मूखामनेन. (9) D has an incomplete hemistich —विल्वप्रमाण मूखां कृत्वामाटी हृढ़शुभम्. (10) D and K read मूखामध्ये, which is incorrect. (11) मूषालेपे प्रदातव्यं, a variant in B and My. मूखालेपा प्रदातव्यं, a variant in D. मूखालेपचदातव्यं, a variant in K. All the texts are incorrect. (12) All the texts read चूर्णकम्, which is not lexicographically correct.

मुखं तस्या[1] दृढं बद्धा लोषमृत्तिकया[2] पुनः ।
कारयेच्च सुधालेपं[3] छायाशुष्कं च कारयेत् ॥ १६८ ॥
उक्तो निगलबन्धोऽयं[4] पुत्रस्यापि न कथ्यते ॥ १६९ ॥
तुषकर्षाग्निना भूमौ मृदुस्वेदं तु कारयेत्[5] ।
अहोरात्रप्रमाणेन[6] पुटं दत्त्वा प्रयत्नतः[7] ॥ १७० ॥
एवं[8] मूषा महेशानि रसस्य खोटतां नयेत्[9] ।
सुध्मातः[10] खदिराङ्गारैः रसेन्द्रः खोटतां व्रजेत्[11] ॥ १७१ ॥
सौवीरं टङ्कणं काचं[12] दत्त्वा खोटं तु शोधयेत्[13] ।
अक्षीणो मिलते[14] हेम्नि समावर्त्तस्तु जायते ॥ १७२ ॥

---

(1) D reads मूखा तस्य, which is incorrect. My reads तस्य. (2) D reads लवणमृत्तिकया, which destroys the metre. K reads लोषहृतिकया, which is incorrect. My reads लोहमृत्तिकया. (3) D has दृढा मूखा. K has दृढां मूखां. Both are improper. (4) B and D read निगड़-बंधोयं. K reads मुक्तो निगलबंधोयं, wherein the first term is incorrect. (5) मृद्ग्रामचतुष्टयोः, a variant in D. मृदुदेयचतुष्टयोः, a variant in K. (6) B and My have अहोरात्रं त्रिरात्रं वा. (7) D reads प्रमाणतः. (8) B reads सर्वं. This hemistich is not found in D and My. (9) B has खोटता व्रजेत्. (10) B and My read सुध्मातं. D reads सुध्मानं, which is incorrect. (11) रसेंद्रं खोटतां नयेत्, a variant in B. रसेन्द्रं खोटतां व्रजेत्, a variant in D. रसेन्द्री खोटतां नयेत्, a variant in My. The last two readings seem to be incorrect. (12) D reads काचं, which is incorrect. (13) दत्वा दत्वा विशोधयेत्, a variant in B and My. दत्त्वा खोटे तु साधयेत्, a variant in D. (14) D and K read अक्षिणो मिलिते, wherein the first term is incorrect. अक्षीर्णां निर्मलं, a variant in My.

समांशभक्षणं तं तु[1] शुद्धसूतेन कारयेत् ।
भ्रमयेत् पूर्व्वयोगेन[2] रसेन्द्रं खोटतां[3] नयेत् ॥ १७३ ॥
भवेत् संकलिकायोगात् वेधो दशगुणोत्तरः[4] ॥ १७४ ॥
पलाशबीजनिर्य्यासं कोकिलोन्मत्तवारुणि[5] ।
शूलिनीरससंयुक्तं[6] पेषयेत् सैन्धवान्वितम् ॥ १७५ ॥
पिष्टिकावेष्टनं कृत्वा निगलेन तु बन्धयेत् ॥ १७६ ॥
मूषायां निगलो देवि लेपितः शिवशासनात्[7] ।
रसस्य परिणामाय महदग्निस्थितो[8] भवेत् ॥ १७७ ॥
अभ्रकस्य तु पत्रेण वज्रार्कक्षीरसिन्धुना[9] ।
ताप्येन लोहकिट्टेन[10] सिकतामृन्मयेन च ॥ १७८ ॥

---

(1) B and K have समांशं भक्षणं तत्तु. D has समांसं भक्षणात्तं तु. (2) चर्मं तत्रप्रयोगेन, a variant in D. (3) रसेन घोडतां is an incorrect reading in D. My reads erroneously रसेन्द्रो खोटतां. (4) B reads दशगुणोत्तरं, which is incorrect. (5) कोकिलोत्तरवारुणी, a variant in D. (6) शूलौरसेन संयुक्तं, a variant in D. (7) B reads सौवसासनं. K reads विश्वसासनात्. Both the texts are incorrect. This hemistich and the next one are not found in D and My. (8) B has परीणामाया माहदग्निस्थितो. K reads महादग्निस्थितो. Both the texts are incorrect. The text adopted above is also gram. inc. , महाग्निस्थितो is the proper term, which mars the metre. (9) D reads पचिणा instead of सिन्धुना. K reads वज्रका and My reads वज्रांकं instead of वज्रार्क. (10) B reads तापेन. D reads ताप्येन लोहकठिन, which seems to be incorrect.

एभिस्तु निगलैर्बद्ध:[1] पारदीयो[2] महारस: ।
नातिक्रामति मर्य्यादां वेलामिव महोदधि:[3] ॥ १७९ ॥
तैलार्कचीरवाराही[4]-लाङ्गल्यो[5] निगलोत्तम: ।
काकविट् ब्रह्मबीजानि लाङ्गली निगलो वर: ॥ १८० ॥
वाकुची ब्रह्मबीजानि[6] कर्कटास्थीनि सुन्दरि ।
सामुद्रं साम्बरं[7] चैव लवणं निगलोत्तम: ॥ १८१ ॥
स्नुह्यर्कसम्भवं चीरं ब्रह्मबीजानि[8] कोकिला ।
करकस्य तु बीजानि लोहाष्टांशेन मर्द्दयेत् ॥ १८२ ॥
निगलोऽन्यस्तु गोजिह्वा-मूलानि चीरजोऽपर: ।
वाकुची ब्रह्मबीजानि[9] स्नुह्यर्कचीरसैन्धवम्[10] ।
ज्वालिनी काकविष्ठा च[11] प्रशस्तो निगलोत्तम: ॥ १८३ ॥
लवणं टङ्कणं चारं शिला तालकगन्धकम्[12] ।
तथाम्लवेतसं ताप्यं[13] हिङ्गुलं समभागिकम् ।
स्नुह्यर्कपयसा युक्तं पेषयेन्निगलोत्तमम्[14] ॥ १८४ ॥

---

(1) निगलैर्बध: is the incorrect reading in D. (2) D reads पारदोऽयं. (3) D reads महोदधे:, which is gram. inc. (4) D and K have काहारि. My has लाहारि. (5) B and My read लाङ्गल्या. (6) B reads काकची ब्रह्मबीजानि. The portion from कर्कटास्थीनि upto ब्रह्म-बीजानि is wanting in D. (7) My reads सैन्धवं. (8) K reads वत्सबीजानि. (9) B has वाकुचिर्ब्रह्मबीजानि. (10) D has सैन्धवै:, which is not proper. (11) D reads तु. K reads ज्वालिनि, which is incorrect. (12) B reads तारकगंधकं. (13) D has an absurd variant ताद्यात् प्रवैत ग्रमाप्यं. तिलाम्ले वेतसं ताप्यं, a variant in My. (14) D reads निगलं,त्तम:.

पिष्टिकां वेष्टयेद्देषा[1]मेकेन निगलेन तु ।
लोह[2]मूषागतं प्राग्वत् खोटं कृत्वा तु वेधयेत्[3] ॥ १८५ ॥
द्वितीयं[4] गोलकं वक्ष्ये पिष्टिकास्तम्भ[5]मुत्तमम् ॥ १८६ ॥
द्विपदीरजमूत्राणि सैन्धवाभ्रं च गुग्गुलुः[6] ।
पिष्टीं संवेष्ट्य कल्केन मृदा तु पुनरष्टधा ॥ १८७ ॥
तुषकर्षाग्निना भूमौ[7] मृदुस्वेदं तु कारयेत् ।
अहोरात्रं त्रिरात्रं वा[8] पूर्व्ववत् खोटतां[9] नयेत् ॥ १८८ ॥
वाकुची ब्रह्मबीजानि[10] गगनं विमलं मणिम्[11] ।
सौवर्च्चलं[12] सैन्धवञ्च टङ्कणं गुग्गुलुं तथा[13] ॥ १८९ ॥
द्विपदीरजसा मूत्रं[14] सुश्लक्ष्णं तच्च[15] मर्द्दयेत् ।
पिष्टीं संवेष्ट्य[16] कल्केन पूर्व्ववत् खोटतां[17] नयेत् ॥ १९० ॥

---

(1) विष्टिवेष्टयेद्देषा, an incomplete charaṇa in D. K reads देखा, which is incorrect. (2) B reads लेषां. (3) K reads बंधयेत्. (4) B, D and My have द्वितीय. K wants this. (5) D reads पौष्टिकं स्तम्भ. K reads पिष्टीकास्तम्भ. (6) सैन्धवाभ्यां सुगुग्गुलुः, a variant in D. My reads सगुग्गुलु. (7) D has an incomplete charaṇa—कर्षाग्निभूमौ. (8) D has वद्यं वापि, which seems to be incorrect. (9) M reads खोटतां. (10) वाकुचिर्ब्रह्मबीजानि, a variant in K. (11) B reads विमलमणिः. D reads विमलां मणीम्. K reads विमलां मणि. M reads विमलं गगनं मणिः. My reads विमलं मणिः. (12) M has सुवर्चलं. (13) K reads erroneously गुग्गुलुस्तथा. (14) द्विपदीरजसुमूत्रं, a variant in B. द्विपदीरसमूत्रं च, a variant in D. (15) B reads सुधाखरत्र. D reads सुलक्ष्णं च. Both are incorrect. (16) B, D, K, M and My read पिष्टिकां वेष्टा, which is gram. inc. (17) M reads खोटतां.

विषवीजं[1] ब्रह्मवीजं वीजानि कनकस्य च ।
मूलानि यवचिञ्चाया:[2] लाङ्गली चेन्द्रवारुणी ॥ १८१ ॥
कोकिलार्कस्नुहीचीरं[3] सैन्धवाभ्रकगुग्गुलु ।
पिष्टीं संवेष्य[4] कल्केन पूर्ब्बवत् खोटतां नयेत् ॥ १८२ ॥
लाङ्गली ब्रह्मवीजानि विष्ठा काकस्य गुग्गुलुः ।
श्वेताश्वमारमूलानि मूलं कनकवारुणी ॥ १८३ ॥
तैलं सैन्धवसंयुक्तं मर्द्दयेत्तद्विचक्षणः ।
पिष्टीं संवेष्य कल्केन पूर्ब्बवत् खोटतां नयेत् ॥ १८४ ॥
वाकुची ब्रह्मवीजानि जीरकद्वयगुग्गुलु ।
सैन्धवाभ्रं कुलीरास्थि टङ्कणं ज्वालिनीरसः[5] ॥ १८५ ॥
पिष्टीं संवेष्य कल्केन मृदा तु पुनरष्टधा ।
तुष[6]कर्षाग्निना भूमौ मृदुस्वेदं तु कारयेत् ॥ १८६ ॥
अहोरात्रं त्रिरात्रं वा[7] रसेन्द्रं खोटतां[8] नयेत् ।
दशसंकलिकायोगात्[9] शब्दवेधी महारसः[10] ॥ १८७ ॥

---

(1) B reads वीषवीजं. D reads व्याघ्रीवीजं. (2) D reads यव चिंचाया. K reads मूखानि चयचिंचाया. Both are incorrect. (3) K has कोकिलाचस्नुहीचीरं, which is incorrect. My has स्नुहिचीर. (4) B, K and My read पिष्टिकां वेष्टा, which is gram. inc. This hemistich and the next five are not found in D. (5) D reads ज्वलनीरसः. (6) B reads तुषा, which is incorrect. (7) D reads त्रिरात्रस्वा, which is incorrect. (8) M reads रसेन्द्रः खोटतां, which is not correct. My reads रसेन्द्रो खोटतां नयेत्, which is incorrect. (9) M has दशशङ्कलिकायोगात्. (10) D and My read शतवेधी महारसः. M reads शब्दवेधी भवेद्रसः.

शङ्करस्य द्विभागन्तु पारदस्य त्रयं[1] तथा ।
पिष्टिकां कारयेत्तेन तप्तखल्ले तु काञ्जिके[2] ॥ १९८ ॥
पूर्व्ववन्निगलोपेतं[3] खोटं कृत्वा तु वेधयेत् ।
दशसंकलिकायोगात्[4] शब्दवेधी[5] महारसः ॥ १९९ ॥
वज्रसूतकराजेन्द्र-शिलागन्धकमाक्षिकैः ।
कान्तपाषाणचूर्णेन भूलताभिः समन्वितः ॥ २०० ॥
ध्मातो मूषागतश्चैव[6] रसोऽयं[7] सुरवन्दिते ।
रसांश्चोपरसान् लोहान्[8] रत्नानि च मणींस्तथा[9] ।
प्रकाशमूषागर्भे च[10] ग्रसते वड़वानलः[11] ॥ २०१ ॥
माक्षिकं दरदञ्चैव गन्धकं च मनःशिला[12] ।

---

(1) पारदन्त्रितयं is the reading in D. (2) तदा खल्वे तु काञ्जिकम्, a variant in D. (3) पूर्व्वनिगलोपेतं, an incomplete variant in D. (4) दशशङ्कलिकायोगात्, a variant in M. (5) D and My read शत-वेधी. The ślokas 198th and 199th are not found in B and K. (6) B has मूषागते चैव. D has मूखागतो नैव. M has ध्माते मूषागतेनैव. My has मूषाशतेनैव. All the texts seem to be incorrect. (7) B reads ह्ठाग्निं. (8) K reads चैव. (9) D reads रत्नमणीजस्तथा. K and My read मणिस्तथा. M reads मणीन्तथा. (10) प्रकाशमूषया गर्भे, a variant in B. प्रकाशमूखाया गर्भौ, a variant in D. प्रकाशमुखगर्भे च, a variant in K. प्रकाशमूषामध्यगतो, a variant in M. प्रकाशमूषाया गर्भे, a variant in My. All the texts are more or less incorrect. (11) ग्रसते चतुरङ्गुलोनलः, a variant in D, which is senseless. My reads वध्वानिलः. (12) D has समं शिलाम्, which is incorrect.

राजावर्त्तं प्रवालं च कङ्कुष्ठं तुल्यकं[1] तथा ॥ २०२ ॥
पीतरक्तगणैर्भाव्यं कङ्गुणी[2]तैलमिश्रितम् ।
खोटं चण्डिकया पक्वं[3] द्रुतं हि नलिके क्षिपेत्[4] ॥ २०३ ॥
इष्टकां तु सिकतां[5] दत्त्वा त्रिरात्रमपि धामयेत्[6] ॥ २०४ ॥
आरणालेन तत् स्विन्नं[7] दोलायां घृतमेव च[8] ।
एवं संरञ्जितः[9] सूतः शरीरधनकृद्[10]भवेत् ॥ २०५ ॥
उद्घाटः परमः[11] प्रोक्तः सर्व्वकर्म्महितः परः[12] ।
ऋवी पतङ्गी[13] दुर्द्रावी दुर्म्मली नैव जायते ।
वर्णान्यत्वञ्च कुरुते[14] स्फोटयेद्दरवर्णिनि[15] ॥ २०६ ॥

---

(1) D reads कुष्ठं तुथकं, which seems to be incorrect. (2) B reads कंगुणि. M reads कुङ्कुणी. My reads कंगुणी. (3) M has भिण्डी. कलापक्वं, which seems to be incorrect. (4) द्रुतं हि नलिकां पचेत्, a variant in B. घृतं हि नलिकं क्षिपेत्, a variant in D. घृतं हि नलिका क्षिपेत्, a variant in K. द्रुतं ही नालिकां पचेत्, a variant in M. द्रुतं हि नलिकां पचेत्, a variant in My. (5) D reads क्षिकातां, which is incorrect. M reads भाण्डां तु सिकतां. (6) D and K read धारयेत्. (7) D reads तच्छिन्नं, which seems to be incorrect. (8) B reads डोलायां. M and My read डोलायां द्रुतमेव च. (9) B reads सुरंजितः. K reads संरञ्जितः. M reads स गदितः. My reads सञ्चितः. (10) B reads शरीरदृढकृद. (11) M reads उत्खोटः. My reads उद्घाटः पंचमः. (12) B and K read परं. (13) M reads चिवी वतङ्गी. (14) D reads वन्यं त्वचं प्रकुरुते, which appears to be incorrect. (15) स्फाटयेद्दरवर्णिनी, a variant in B. D reads वरवर्णिनी, which is incorrect. K has स्फोटयद्वरवर्णिनि. My has खोटयेद्वरवर्णिनि.

बन्धमेवं[1] द्रुतं कृत्वा कुरुते वज्रजारणम्[2] ।
सम्यमाचक्ष्व देवेशि किमन्यच्छ्रोतुमिच्छसि ॥ २०७ ॥

इति श्रीपार्वतीपरमेश्वरसंवादे[3]
रसार्णवे रससंहितायां
वज्रबन्धो नाम[4]
पञ्चदशः पटलः ॥ १५ ॥

---

(1) B reads बद्धमेवं. D and My read बद्धमेव. M reads बन्धमेतत्, which is grammatically incorrect. (2) कुरु वज्राणि जारणं, a variant in K. कुरि वस्त्राणि जारणम्, an incorrect variant in M. My reads कुरु वज्राणिजारणं. (3) B, M and My want this line. (4) D, M and My have पिष्टिस्तम्भनं नाम. K has पिष्टिस्तम्भमहारसोपरसलोहबंधो नाम.

## षोड़शः पटलः ।

श्रीदेव्युवाच ।[1]

बद्धस्य[2] रसराजस्य[3] कथं द्रावणमीश्वर[4] ।
वज्रादिजारणं चापि[5] कथमाज्ञापय प्रभो ॥ १ ॥

श्रीभैरव उवाच ।[6]

तं खोटं सूक्ष्मचूर्णन्तु स्त्रीरजोभिस्तु भावयेत्[7] ॥ २ ॥
पुनर्नवा च[8] मीनाक्षी रम्भाकन्दः[9] स्त्रियोरजः ।
मणिमन्थं[10] शिलाधातुं सर्व्वमेकत्र पेषयेत्[11] ॥ ३ ॥
कल्केनानेन संछन्नमारोटरससंयुतम्[12] ।
तं रसं[13] भूर्ज्जपत्रे तु बद्धा पोटलिकां[14] ततः ॥ ४ ॥
दोलायन्त्रे[16] सुरेशानि स्वेदयेद्दिवसत्रयम् ।
अनेन क्रमयोगेण मृतः सूतो[16] भवेद्द्रुतः[17] ॥ ५ ॥

---

(1) M has देव्युवाच. (2) B reads शुद्धस्य. (3) D reads रसवज्रस्य, which is incorrect. (4) B reads erroneously द्रावणमीश्वरि. (5) B and D read वापि. (6) This is wanting in D. (7) This hemistich is not found in D. (8) पुनर्नवौ द्वौ is the reading in B, M and My. (9) M reads रंभाकंदं. (10) B reads माणि-मंथं. D reads मणिमथं. K reads मनिमंथं. M reads माणिवन्ध. My reads माह्हिमंडं. (11) M has मेलयेत्. (12) D reads संयुतः, which is incorrect. (13) D and K read तद्रसं. (14) M reads पोट्टलिका. (15) B, M and My read डोलायन्त्रे. (16) B and D read मृतसूतो. M reads द्रुतसूते, which is incorrect. (17) My reads erroneously भवेत् ध्रुवं.

आर्द्रकं मूलकं शुण्ठी लसुनं हिङ्गु माचिकम्।
त्रिक्षारं पञ्चलवणं कांञ्ची कासीसगन्धकम्[1]।
अम्लवर्ग[2]समायुक्तं गोलकं कारयेत् प्रिये ॥ ६ ॥
तस्य मध्यगता पिष्टी[3] दोलायां स्वेदनेन तु[4]।
द्रवते नात्र सन्देहो द्रुतं जारयते रसम्[5] ॥ ७ ॥
बद्धं महारसं[6] देवि द्रावयेत् पादयोगतः।
द्रुतपादे ततो देयं[7] द्रावयित्वा पुनर्द्रवेत्[8] ॥ ८ ॥
एवं बद्धं द्रुतं कृत्वा समद्वित्रिगुणादिकम्[9]।
तस्मिन् द्रुते जारणा च[10] कर्त्तव्या कर्म्मवेदिभिः ॥ ९ ॥
कुक्कुटीकन्दमार्जारी[11] उच्चटापोख्वरी तथा[12]।

---

(1) कांश्रिकौशीसगन्धकम्, a variant in D. कांजीकौशीसगंधकं, a variant in K. काचीमांसीसगन्धकम्; a variant in M. (2) B and My read क्षाम्लवर्ग. M reads बम्बवर्ग. (3) तस्य मध्यगतं पिष्टं, a variant in D. तस्य मध्ये गतां पिष्टिं, a variant in K. My has an incomplete charaṇa—तस्य ता पिष्टिः (4) D reads दोलायन्त्र स्वेदयेन्न तु, which is incorrect. डोलायां स्वादनेन तु, a variant in M, which is partly correct. My reads डोलायां. (5) D reads रसे. M reads रसः. Both are incorrect. (6) D reads महारसे, which is incorrect. We do not find the 8th, 9th and 10th ślokas in My. (7) द्रुतं पादस्ततो देयः, a variant in D. द्रुत-पारदरोधाय, a variant in M. (8) M reads पुनर्द्दमेत्, which is incorrect. (9) K reads समं द्विविगुणादिकम्. M reads समद्वित्रिगुणाधिकम्. (10) M reads चारणा च. (11) कर्कटीकन्दमार्जारि, a variant in D. कुक्कुटीकंदमार्जारि, a variant in K. (12) सर्पाश्च मामरी तथा, a variant in D. सर्पाश्च मामरी तथा, a variant in K.

चीरकञ्चुकया युक्तं[1] स्वेदितं च द्रुतं[2] रसम् ॥ १० ॥
द्रुतं दोलादिसंभिन्नं[3] कुक्कुव्याद्यै[4]र्दिनत्रयम् ।
आर्द्रकाद्यैर्द्रुतञ्चैव[5] तत्सूतं स्वेद्यतां[6] व्रजेत् ॥ ११ ॥
वज्रं[7] द्रुतं यथा[8] सूतं जारयेत्[9] सुरवन्दिते ।
ईश्वरस्तस्य[10] विज्ञेयो देवदेवो[11] जगद्गुरुः[12] ॥ १२ ॥
विधाय खोटं यत्किञ्चित्[13] मृतकोत्थापिते रसे[14] ।
षड्गुणं हेम जार्यं तु सारयेत् सारणात्रयम्[15] ॥ १३ ॥
कोट्यंशेन[16] तु तेनैव शुल्ववेधं[17] प्रदापयेत् ।
जायते कनकं दिव्यं देवाभरणभूषणम् ॥ १४ ॥
पुनस्तत्तु[18] रसेन्द्रस्य वज्ररत्नानि जारयेत्[19] ।

---

(1) चीरं कञ्चुकया युक्तं, a variant in D. (2) सेवितं च द्रुतरसः, a variant in D. M reads मृतं. (3) D has दोलःसंस्थितं कर्कं. K has दोलादिसंमितं—, an incomplete charaṇa. M and My read डोलादिसम्भिन्नं. (4) B reads कक्रमाद्या. D reads कर्कवटोद्यै. K reads कर्कटाद्यै. (5) B and K read आर्द्रकादि. D reads आर्द्रकादि घृते चैव, which seems to be incorrect. This charaṇa and the next nine ones are not found in My. (6) B and M read स्वच्छतां. D and K read स्वेदतां. (7) B and M read वङ्ग. (8) K reads यदा. (9) D reads पारदः, which seems to be incorrect. (10) M reads ईश्वरस्य तु. (11) M reads देवदेव्या. (12) D reads erroneously देवदेवात भवद्गुरुम्. (13) D reads तं पङ्क्तिं, which is incorrect. (14) मृतकोत्थापितो रसः, a variant in M. (15) B reads सारणात्रये. (16) D has वधाशेन, which is senseless. (17) D reads शुल्वं वन्धं. (18) B has पुनस्तस्तु. D has पुनस्त. K has पुनस्तस्य. (19) D reads कारयेत्.

प्रकाशमूषागर्भे च हठाग्नौ जरते क्षणात्[1] ॥ १५ ॥

उच्चटा[2]मीननयना-सर्पाक्षी[3]रक्तचित्रकैः ।

एतैः रत्नं द्रवत्याशु[4] नीलमाणिक्यमौक्तिकम्[5] ॥ १६ ॥

विष्णुक्रान्ता च चक्राङ्का[6] कुमारी यवचिञ्चिका[7] ।

वज्राणि पद्मरागाश्च[8] राजावर्त्तादिसस्यकम्[9] ।

ओषधीनां द्रवं दत्त्वा तप्ते[10] सूते विनिक्षिपेत् ॥ १७ ॥

पश्चाद्रत्नानि देयानि द्रवन्ति सलिलं यथा ॥ १८ ॥

दोलायां[11] स्वेदयेद्देवि विड़योगेन[12] जारयेत् ।

प्रकाशमूषागर्भे च हठाग्नौ जारयेत् क्षणात् ॥ १९ ॥

शंखेनैवार्कदुग्धेन[13] पुटेन शतवापितम् ।

तद्बीजं[14] क्षारसंयुक्तमम्लवर्गेण[15] भावयेत्[16] ॥ २० ॥

---

(1) D and K read जायते क्रमात्. (2) D reads उच्चसं, which is incorrect. (3) D has सार्व्याञ्जी, which is unintelligible. K has सर्पाक्षि. (4) एते रत्नप्रवर्त्यासु, an incorrect variant in D. M reads द्रवन्त्याशु, which is incorrect. (5) तिलमाणिक्यमौक्तिमं, a variant in K, which is not correct. (6) D reads वक्राङ्का. M reads चक्राङ्गी. (7) D has यवचिंचिका. (8) D and K read पद्मरागं च. (9) K reads सःस्यकां, which is incorrect. (10) D reads तप्ता. K reads तप्तः. (11) D reads दोलायन्त्रे, which destroys the metre. (12) D reads वीरयोगेन, which is incorrect. (13) K reads शङ्खैर्वार्कदुग्धेन, which destroys the metre. (14) B reads तद्विड़. D reads तद्विज. M reads तत्पिण्डी. (15) B and M read चाम्लवर्गेण. (16) B and M read भावितम्.

विड्हिङ्गुलसंयुक्त[1]-राजावर्त्तप्रवालकैः[2] ।
गन्धकः शिलया युक्तः[3] खोटानां जारणे हितः[4] ॥ २१ ॥
मूषालेपादिसंयोगात्[5] बद्धहेम्नो हि जारणम्[6] ।
तत्क्षेपाज्जायते देवि[7] विड्योगेन जारणम्[8] ॥ २२ ॥
पश्चाद्धेम प्रदातव्यं षट्त्रिंशांशद्रवेण च[9] ॥ २३ ॥
ततो वै सूतराजस्य जायते रश्मिमण्डलम्[10] ।
तिर्य्यगूर्द्धमधोव्यापि[11]तेजःपुञ्जेन पूरितम् ॥ २४ ॥
इत्थं शुद्धो भवेत् सूतः[12] चिन्तामणिरिव[13] स्वयम् ।
सद्देवैः पूज्यते सिद्धैः[14] द्वितीय इव शङ्करः[15] ॥ २५ ॥

---

(1) विड्हिङ्गुकसंयुक्तं, a variant in M. (2) राजावर्त्तं प्रवालकैः, a variant in D. राजावर्त्तं प्रवालकम्, a variant in M. (3) गन्धकैमशिला-युक्तैः, a variant in D, which is senseless. M reads गन्धकं शिलया युक्तं. (4) D and K read हितं. M reads खोटानां जारणे हितम्. (5) D and K read मूखालेपो हि संयोगात्. M reads मूषालेपाभिसंयुक्तं. (6) B has बद्धो हेमाद्धिजारणं. D has बद्धो हेम्रा हि जारणम्. K has बद्धो हेमादिजारणं. M has बद्धहेमाभिजारणम्. (7) B reads तद्द्येपाज्जारते देवि. D reads तच्चपाजारयेद्दे वि. K reads तच्चोपा जारये देवि. (8) B, D and K read विड्योगेन जारयेत्. M reads विड्हेमाभिमारणम्. (9) K reads षट्त्रिंशांषद्रवेन च, which is incorrect. (10) जायंते रश्मिमंडले, a variant in B. जारयेद्रश्मिमण्डले, a variant in D. जायंते रश्मिमंडलं, a variant in K. (11) B and K read वापि, which seems to be inaccurate. (12) B reads इत्यष्ट भवेत् सूतः. D reads इयं था भवेत् सूतः. K reads इत्थं यथा भवेत् सूतः. M reads शुद्धं यथा भवेत् सूतं. (13) K reads चिन्तमणिरिव, which is not correct. (14) D and K read सर्वदैवैः प्रपूज्यंते, which is incorrect. (15) K reads सिद्धैर्द्वितीयशंकरः.

लोकानुग्रहकर्त्ता च भुक्तिमुक्तिप्रदायक: ।
जारयेच्च महानीलं तत्त्वसंख्याक्रमेण[1] तु ॥ २६ ॥
भ्रमते दक्षिणावर्त्तंस्तदासौ खेचरो रस:[2] ।
वेधयेत् सर्व्वलोहानि भारसंख्यानि[3] पार्व्वति ॥ २७ ॥
एवं जीर्णस्य सूतस्य शृणु कापालिरञ्जनम् ॥ २८ ॥[4]
शुल्वपत्रपलैकं तु[5] पलार्द्धं[6] गन्धकस्य च ।
टङ्कणं कर्षमेकं तु कर्षैकां रसकज्जलीम्[7] ॥ २९ ॥
माक्षिकं[8] कर्षमेकं तु सर्व्वमेकत्र कारयेत्[9] ।
अन्धमूषागतं ध्मातं खोटो[10] भवति तत्क्षणात् ॥ ३० ॥
तं खोटं सूक्ष्मचूर्णन्तु चणकाम्लेन[11] मर्द्दयेत् ।
आरण्य[12]गोमयेनैव पुटान्[13] दद्याच्चतुर्द्दश ॥ ३१ ॥
इन्द्रगोपकसंकाशं जायते नात्र संशय: ॥ ३२ ॥
तच्चूर्णं मधुना युक्तं शुद्धतारं तु रञ्जयेत् ।

---

(1) D reads तत: संख्याक्रमेण. (2) तदासौ खेचरगो रस:, a variant in B. सदासन्नो खेचरो रस:, a variant in M, which is incorrect. (3) M reads च्चारसंख्याणि, which is incorrect. (4) After this hemistich we find in B अत: परं प्रवक्ष्यामि शृणु कापालिरंजनं ; in D अत: परं कलापालनी ; in K अत: परं कपालिनि. (5) D has शुल्वपत्रकपौकं तु, which is incorrect. K has शुल्वपत्र पलैकं तु. (6) B reads पलैकं. (7) कर्षैकं रसकज्जलीं, a variant in B. कर्षैकं रसकज्जलं, a variant in D. कर्षैका रसकज्जली, a variant in M. (8) B reads माक्षीकं. (9) M reads मर्दयेत्. (10) M reads खोट्टो. (11) B and K read दनुजाम्लेन. M reads लिकुचाम्लेन. (12) D reads अरण्य. (13) B, K and M read पुटं.

रञ्जयेत् त्रीणि वाराणि[1] शोभनं हेम जायते[2] ॥ ३३ ॥
एष कापालिको योगः सर्व्वलोहानि रञ्जयेत् ।
रञ्जयेद्बद्धसूतं च[3] वज्रबन्धञ्च[4] रञ्जयेत् ॥ ३४ ॥
आरचूर्णपलैकं वा[5] मृतनागपलं तु वा[6] ।
वङ्गाभ्रकपलैकं वा[7] तीक्ष्णचूर्णपलं तु वा[8] ॥ ३५ ॥
विशुल्वं नागवङ्गौ वा[9] एकैकांशसमन्वितम्[10] ।
विशुल्वं गैरिकैकैक[11]मथवा तीक्ष्णमाक्षिकम् ॥ ३६ ॥
अथवा तीक्ष्णभागौ द्वौ त्रयो घोषा नवोरगाः[12] ।
ताम्रस्य नव भागाः स्युरारभागचतुष्टयम्[13] ॥ ३७ ॥
अथवा देवदेवेशि माक्षिकस्य पलद्वयम् ।
मयूरग्रीवतुल्यैकं[14] मृतनागपलं तथा ॥ ३८ ॥

---

(1) त्रीणि वाराणि is grammatically incorrect. This hemistich and the next one are not found in D. (2) K reads जारयेत्, which is not correct. (3) M reads रञ्जयेद्बद्धसूतेन. (4) D and M read वज्रबद्धं च. (5) D reads च. आरचूर्णं पलैकञ्च, a variant in K, M reads तु. (6) मृतनागं पलं तु च, a variant in D. K reads च. (7) D reads तु. वंगाभ्रकं पलैकं च, a variant in K. (8) B reads च वा. D reads तीक्ष्णचूर्णं ये तु वा, which is incorrect. तीक्ष्णचूर्णं पलं तु वा, a variant in K. (9) M has नागवङ्गं वा. (10) D reads समन्वितः. K reads एकैकं तु समन्वितं. (11) विशूल्वं गैरकं चैव, a variant in D. विशुल्वं गैरिकैकं वा, a variant in M. (12) D reads त्रयो दोषा. M reads नवोरसाः. Both are incorrect. (13) D has तारभागाश्चतुष्टयम्. K has तारभागचतुष्टयं. (14) K reads मयूरग्रीवं तत्थैव, which is incorrect. This hemistich and the next two are not found in M,

अथवा वङ्गनागांशमेकैकं सुरवन्दिते[1] ।
तीक्ष्णद्वयं त्रिशुल्वं च हेमताप्यचतुष्टयम्[2] ॥ ३९ ॥
यद्वा[3] विमलवैक्रान्तवङ्गनागानि रीतिका[4] ।
सशुल्वाप्यथवा[5] हेम विमलं च भुजङ्गमः ॥ ४० ॥
एषामन्यतमं देवि पूर्व्वकल्पसमन्वितम् ।
अन्धमूषागतं[6] ध्मातं खोटो[7] भवति तत्क्षणात् ॥ ४१ ॥
पुटयेत् पूर्व्वयोगेन रञ्जयेत् पूर्व्वयोगतः ॥ ४२ ॥
नागशुल्वं[8] तथा तीक्ष्णं कापालिक्रम[9]मुत्तमम् ।
तेनैव रञ्जयेत्तारं सप्तवारं पुनः पुनः ॥ ४३ ॥
तेनैव रञ्जयेद्धेम सप्तवारं पुनः पुनः ।
पक्वबीजमिदं[10] श्रेष्ठं सर्व्वकर्म्मसु[11] योजयेत् ॥ ४४ ॥
वङ्गतीक्ष्णं कपाली च[12] शुल्वं तारं तु रञ्जयेत्[13] ।
रञ्जयेत् सर्व्वलोहानि यावत् कुङ्कुमसन्निभम् ॥ ४५ ॥

---

(1) D reads सुरसुन्दरि. (2) This charaṇa and the next two are not found in K. (3) B reads तारं. (4) विमलवैक्रान्तं वङ्गनागास्तृतीयका:, a variant in D. (5) B reads सप्तशुल्वाथवा. M reads सशुल्वास्त्वथवा. (6) D and K read अंधमूखागतं, which is not correct. (7) M reads खोट्टी. (8) B reads नागं शुल्वं. (9) K reads erroneously कायाक्रम. M reads कापालीक्रम. (10) M reads सत्वबीजमिदं. (11) B and K read सर्वकर्मणि. D reads सर्वकर्माणि. (12) वंगतीक्ष्णकपाली तु, a variant in B. वङ्गं तीक्ष्णं कपालिं च, a variant in D. वंकं तीक्ष्णाभ्रकं वाली तु, a variant in M. (13) D has शुल्वतारं तु योजयेत्. M reads शुद्धतारं तु रञ्जयेत्.

वैक्रान्तं नागकापाली[1] शुद्धतारं तु रञ्जयेत्[2] ।
रञ्जयेत् सह हेम्ना तु[3] भवेत्[4] कुङ्कुमसन्निभम् ॥ ४६ ॥
रक्ततैल[5]निषिक्तं तु लोह[6]संक्रान्तिनाशनम् ।
आरकापालिचूर्णन्तु शुद्धतारं तु रञ्जयेत्[7] ॥ ४७ ॥
विमलेन च नागेन[8] कापाली परमेश्वरी ।
रञ्जयेत् सर्व्वलोहानि तारं हेम विशेषतः ॥ ४८ ॥
रञ्जयेत् त्रीणि वाराणि[9] जायते हेम शोभनम् ।
तेनैव रञ्जयेद्धेम[10] सप्तवारं पुनः पुनः ॥ ४९ ॥
लवणोद[11]निषिक्तन्तु लोहसंक्रान्तिनाशनम् ।
वङ्गनागं[12] तथा कान्तं शुल्वं तीक्ष्णं च माक्षिकम्[13] ॥५०॥
रविनागं कपाली तु[14] शुद्धतारन्तु रञ्जयेत् ।
रञ्जयेत् त्रीणि वाराणि[15] तारारिष्टं तु जायते ।
तेनैव रञ्जयेद्धेम[16] सप्तवाराणि[17] पार्व्वति ॥ ५१ ॥

---

(1) This hemistich and the next one are not found in B. D reads नागकापालिं. M reads नागकापालं. (2) D has योजयेत्, which seems to be incorrect. (3) M reads सितहेमन्तु. (4) K reads यावत्. (5) D has रक्ततैले. (6) D reads लोहं. (7) This hemistich is not found in D and M. (8) विमूलेन च भागेन, an incorrect variant in D. (9) This is grammatically incorrect, yet found in all the texts. (10) तथा वैद्रुकरीहेम, an incorrect variant in B. (11) B reads लवणाद्रु. (12) B reads वंगं नागं. (13) लाङ्गली तीक्ष्णमाक्षिकम्, a variant in D. (14) रविं नागकपालिं च, a variant in D. (15) This is grammatically incorrect. (16) B reads जायते हेम. (17) This is grammatically incorrect.

रक्तावर्गनिषिक्तं च लोहसंक्रान्तिनाशनम् ।
वङ्गनागं[1] तथा शुल्वं कापाली[2] सुरवन्दिते ॥ ५२ ॥
गुड़ेन नीलकाचेन[3] तुल्याम्ललवणेन च ।
विषपित्ताम्ल[4]पिष्टेन हन्यात् संक्रान्तिकालिकाम् ॥ ५३ ॥
गैरिकं गन्धकं सूतं तिलतैलेन पेषयेत् ।[5]
लेपयेत्तारपत्राणि दत्त्वा शुल्वकपालिकाम् ॥ ५४ ॥
ऊर्द्धाधस्त्वन्धमूषायां[6] शुभ्रं[7] हेमदलं भवेत् ॥ ५५ ॥
भागैकं हरितालस्य भागैकं गैरिकस्य च[8] ।
माक्षिक[9]कल्कभागैकं चत्वारो गोलकस्य च ।
अन्धमूषागतं ध्मातं हेम रञ्जयति क्षणात् ॥ ५६ ॥
अनेन क्रमयोगेण चतुर्वारं तु रञ्जयेत् ।
पक्वबीजमिदं श्रेष्ठं बालार्कसदृशप्रभम् ॥ ५७ ॥
तेन वर्णद्वयोत्कर्षः षोड़शांशेन जायते ॥ ५८ ॥
रक्ततैले निषिक्तं च लोहसंक्रान्तिनाशनम् ।

---

(1) D and K read वङ्ग नागं. (2) D reads कपालि, which is incorrect. (3) गुडेन पीतकचैव, a variant in B. गुलेन तिलकाचेन, a variant in K. विडे च गन्धे वडकाचेन, an incorrect variant in M. (4) B reads विषसिद्धार्थ. This hemistich and the next one are not found in D. (5) Here ends the MS. M. in the middle part of the 16th Paṭala. (6) ऊर्द्धाधश्चांधमूषायां, a variant in B. D and K read मूखायां, which is incorrect. (7) K reads हभं, which is incorrect. (8) B has an incomplete charaṇa—भा गैरिकस्य च. (9) B and K read माक्षिकं.

रसकस्य तु कापाली[1] चन्द्रार्कं तु शतांशत:[2] ।
अन्धमूषागतं ध्मातं शोभनं हेम जायते ॥ ५९ ॥
शुद्धनागपलैकं तु कर्षैकं द्रुतसूतकम्[3] ।
सारयेत् सारणायन्त्रे खोटो भवति सूतक: ॥ ६० ॥
खोटस्य पलमेकं तु माक्षिकस्य पलं तथा ।
एकीकृत्याथ संमर्द्य कनकस्य रसेन च ।
पाचयेन्मृन्मये पात्रे[4] भवेत् कुङ्कुमसन्निभम्[5] ॥ ६१ ॥
पूर्व्वकल्केन संयुक्तं खोटं कुर्वीत पूर्व्वत:[6] ।
एतत् कापालिकायोगात्[7] चूर्णमक्लेन[8] मर्द्दयेत् ॥ ६२ ॥
पुटयेत् पूर्व्वयोगेन रञ्जयेत् पूर्व्वयोगत: ॥ ६३ ॥
येन केन[9] रसं बद्ध्वा हेमगन्धशिलोरगै: ।
क्रमेण वेष्टितं ध्मातं शतवाराणि[10] वेधयेत् ॥ ६४ ॥
आदौ[11] तु बद्धसूतं च वङ्गं[12] तारं मन:शिला ।
क्रमेण वेष्टयेत् ध्मातं शतवेधी न संशय: ॥ ६५ ॥

---

(1) B reads कपाली. K reads कापालि. (2) D reads शतांशयो:. K reads शतांशं. (3) This charaṇa and the next one are not found in K. (4) B reads भाण्डे. (5) भवेत कंकसंनिभं, a variant in B. (6) B reads पूर्ववत्. (7) एतत् कापालिकं चूर्णं, a variant in B. D reads कपालिकायोगात्. (8) B reads मध्यमाम्लेन. (9) K reads तीनकेन, which is an error of the scribe. (10) B reads दश-वाराणि. D reads शतं वाराणि. (11) This hemistich and the next two are not found in D. K reads आपौ, which is incorrect. (12) K reads वंङ्ग, which is incorrect.

अनेन कुरुते तारं कनकेन तु काञ्चनम् ॥ ६६ ॥

सूतो मृतो हन्ति समेन वङ्गं[1]
तेनैव हन्यात्[2] द्विगुणं च तारम्[3] ।
तारं चतुःषष्टिरविं करोति
हेमापि तद्वत् फणिहेमयोगात्[4] ॥ ६७ ॥

मृतरसपलमेकं[5] पञ्चनागं च दद्यात्
कनकपलविमिश्रं[6] ध्मातसूतावशेषम्[7] ।
पुनरपि शतवारानेवमेव[8] क्रमेण
भवति च[9] रसराजः कोटिवेधी क्रमेण ॥ ६८ ॥

मृतसूतपलैकं तु[10] द्वे पले[11] दरदस्य च ।
चतुःपलं गन्धकस्य कङ्कुष्ठस्य[12] पलत्रयम् ।
शिलायाः पञ्चकं चैव गोपित्तेन तु मर्द्दयेत् ॥ ६९ ॥

---

(1) D has an absurd charaṇa—आयो चतुर्थे सूतेन मृतं हेति समेन तं वङ्गं. (2) B reads वंगं. (3) तेनैव गावद्धि गुड़ं च तारं, an incorrect variant in D. (4) K has शंखेंदुकुंदमतीनं मनोहरं हेम गोपात्, which is absurd. (5) D wants पल ; hence it reads मृतरसमेकं, which mars the metre as well as the sense. (6) B reads कनकपलं विमिश्रं, which destroys the metre as well as the grammar and sense. (7) D reads ध्मातं सूतावशेषं, which mars the metre. (8) शतवारान्निष्कमेकं, a variant in D. शतवारं निष्कमेव, a variant in K. (9) D has only भवति, which makes the charaṇa an incomplete one. K reads स भवति. (10) D has मृतसूतं पलैकं तु. (11) D reads द्विपलं. K reads पलैकं. (12) B reads कुंकुमस्य.

पलैकनागपत्राणि[1] तेन कल्केन[2] लेपयेत् ।
मारयेत् पुटयोगेन नागोऽयं म्रियते[3] क्षणात् ॥ ७० ॥
वटिकां कारयेत्पश्चात् षष्टिं त्रीणि शतानि च ।
एकैकां वटिकां पश्चाद्गोपित्तेन तु मर्द्दयेत् ॥ ७१ ॥
अनेन क्रमयोगेण शतं दद्यात् पुटानि च[4] ।
नागोऽयं जायते देवि सिन्दूरारुणसन्निभः[5] ॥ ७२ ॥
शतांशेन च तेनैव[6] तारे वेधं[7] प्रदापयेत् ।
तत्तारं जायते देवि देवाभरणमुत्तमम्[8] ॥ ७३ ॥
मृतनागपलैकं तु[9] हेमपत्रं तु तत्समम् ।
मारयेत् पुटयोगेन म्रियते हेम[10] तत्क्षणात् ॥ ७४ ॥
तद्भस्मनागैकयुतं[11] हेमपत्रं तु तत्समम् ।
मारयेत् पुटयोगेन म्रियते हेम तत्क्षणात् ॥ ७५ ॥
अनेन क्रमयोगेण त्रीणि वाराणि[12] कारयेत् ।
सहस्रांशेन तेनैव तारे वेधं[13] प्रदापयेत् ॥ ७६ ॥

---

(1) This hemistich and the next one are put in B after the 71st śloka. पलैकं नागपत्राणि, a variant in K. (2) D has तिलकल्केन. (3) D reads म्रयते, which is grammatically incorrect. (4) शतं दद्यात् पुटं प्रिये, a variant in B. (5) B reads सप्रभः. K reads संप्रभः. (6) D reads तैलेन. (7) D reads तारवेधं. (8) B reads देवाभरणभूषणं. This hemistich is not found in D. (9) मृतनागं पलैकन्तु, a variant in D. (10) D reads देवि, which is not accurate. K reads क्षीयते, which is incorrect. (11) तद्भस्मभागैकयुतं, a variant in B. D and K read युक्तं. (12) This is grammatically incorrect. (13) D reads तारवेधं.

सुखसाध्यप्रयोगेन[1] तत्तारं कनकं भवेत् ।
कल्कवेधमतो वच्चे[2] सुखसाध्यं सुरेश्वरि ॥ ७७ ॥
पलाशनिम्बविल्वाच-कार्पासकटुतुम्बिनी ।
कङ्गुणीकटुतैलं च[3] एकैकं रसमारकम्[4] ॥ ७८ ॥
समे हेम्नि समं सूतं[5] तारं ताम्रमथापि वा[6] ।
महारसाष्टमध्ये तु चत्वारोपरसास्तथा[7] ॥ ७९ ॥
फलाम्लकाञ्जिकैर्मध्य[8]-निरङ्गारे तु[9] खल्लयेत् ।
तप्तायसेऽथवा लोह[10]-मुष्टिना मृदुवह्निना ॥ ८० ॥
प्रागुक्त[11]वालुकायन्त्रे तैलं दत्त्वा विचक्षणः ।
मर्द्दयेत् पञ्चमिकं तु[12] दिवारात्रमतन्द्रितः ॥ ८१ ॥
तत्कल्कं जायते श्रेष्ठं धर्म्मकामार्थमोक्षदम् ।
वेधयेदष्टलोहानि देवानामपि दुर्ल्लभम् ॥ ८२ ॥
नाशयेत् सकलान् रोगान् पलैकेन न संशयः ।
त्रिकटुत्रिफलायुक्तं मध्वाज्येन तु भक्षयेत् ॥ ८३ ॥

---

(1) This charaṇa is wanting in B. This hemistich is not found in D. (2) B reads ततो वचेत्. D reads कल्के वेधमतो. K reads कल्कवद्वमतो लक्ष्ये, which is incorrect. (3) कंगुणी कटुजं तैलं, a variant in D. (4) B reads रसमारणं. (5) B has समे सूतं, which is incorrect. (6) तारं ताम्रं तथापि वा, a variant in D. (7) चत्वार उपरसास्तथा is the correct grammatical form. (8) B reads फलाम्लं काञ्जिकैर्मध्वा. D reads मृद्वा, which seems to be incorrect. (9) B has निरुद्धारे तु. D has निरणं ये तु, which is unintelligible. (10) तथादायसेऽथवा लोहि, a variant in D. (11) D reads प्रयुक्त. (12) B reads च.

हेम्ना तु बद्धं गुञ्जैकं[1] तारेण हे[2] सुरेश्वरि ।
ताम्रेण गुञ्जात्रितयं[3] वर्षात् स्यादजरामरः ॥ ८४ ॥
सेवन्ते चन्द्रवदनाः सर्व्वाभरणभूषिताः ।
त्रिफलाबीजमध्वाज्यं नस्यं कृत्वा निशासु च[4] ॥ ८५ ॥
रसं तु[5] भक्षयेत् प्रातरजीर्णं नैव जायते ।
गन्धकं पानमालेपं[6] कङ्कुष्ठं भक्षयेद्बुधः ॥ ८६ ॥
पलेन[7] भक्षयेत् सूतं सुरासुरनमस्कृतम्[8] ।
तप्तहेमनिभाकारो बालार्कसदृशप्रभः ॥ ८७ ॥
वेधयेत् सर्व्वलोहानि छेदे दाहे[9] न संशयः ।
बद्धा तु संकलाबन्धै[10]र्वटिका[11] खेचरी भवेत् ॥ ८८ ॥
काकजङ्घा च बृहती शरपुङ्खाजभृङ्गिके[12] ।
शिवा[13] शक्रलता[14] कन्या समेतास्तु[15] महालताः ॥ ८९ ॥

---

(1) हेमस्तु पलगुञ्जैकं, a variant in D. K reads फलगुंजैकं. (2) D reads तारेणार्धे. K reads तारेणार्द्धं. (3) D has गुञ्जात्रितये. (4) निशात्पुनः is the incorrect reading in D. (5) K reads एणं तु, which is incorrect. (6) गन्धकेनाथ मालिपं, a variant in D. (7) K reads अनेन. (8) K has an incomplete charaṇa—सुरनमस्कृत्य. (9) D reads छेद्दाहे. This hemistich is not found in K. (10) B reads बद्धस्तु, which is incorrect. बद्धा कश्चिकलाविधैः, a variant in D. बद्धास्तु संकलाबुधैः, a variant in K. (11) B reads घुटिका. (12) बुसित-पुंखाचभृंगिके, a variant in B. शरपुङ्खाजभृङ्गिका, a variant in D. सुख-पुंखाजभृंगिका, a variant in K. (13) B has शिखा. D has शिवं. K has शिव, which seems to be incorrect. (14) B reads शर्कलता. D reads शकुलतां, which is incorrect. (15) समेते तु महाबलाः, a variant in B. समेते तु महालता, a variant in D. समेतास्तु महालताः, a variant in K.

शुद्धाद्दृश्यं समाख्यातं वातारिस्नेहसंयुतम् ।
समे हेम्नि समं सूतं[1] तारे ताम्रेऽथवा प्रिये ॥ ८० ॥
मल्लारसाष्टमध्यैकं दद्यात्तूपरसांस्तथा[2] ।
मर्द्दयेत् खल्लपाषाणे[3] यावन्निश्चेतनं भवेत् ॥ ८१ ॥
स्वेदयेदारणालेन[4] मर्द्दयेत् पूर्व्वकल्कवत् ।
तच्च लोहस्य देहस्य तत्तत्कर्म्मसु[5] योजयेत् ॥ ८२ ॥
हेमाभ्रकस्य चैकैकं सूतकस्य द्वयं तथा[6] ।
ताराभ्रकस्य चैकैकं सूतकस्य द्वयं तथा[7] ॥ ८३ ॥
पिष्टिकां कारयेत्तेन निगलेन च बन्धयेत् ।
पुटेषु पिष्टिकाबन्धो[8] गोलेन निगलेन च[9] ॥ ८४ ॥
पुनरन्यं प्रवक्ष्यामि चूर्णबन्धं सुरेश्वरि[10] ॥ ८५ ॥
पिष्टिकां[11] टङ्कणं दत्वा द्विपदीरस[12]मर्द्दितम् ।
नष्टपिष्टं च शुष्कं तत्[13] ध्मापयित्वा पुटे[14] पचेत् ॥ ८६ ॥

---

(1) B reads समे सूते. (2) दद्यादुपरसांस्तथा, a variant in B. (3) D reads खल्लु पाषाणे. (4) D and K read स्वेदयेदारुणालेन. (5) B reads तत्र कर्म्मसु. D reads ततः कर्म्मसु. (6) D reads सूतकस्याद्रसं तथा, which seems to be incorrect. (7) This hemistich is not found in D. K reads सूतकं द्विसयं तथा. (8) All the texts have पिष्टिका-बद्धो, which seems to be incorrect. (9) B reads वा. After this we find the following in B only—इति पिष्टिकाबंधः । (10) D has चूर्णबद्ध सुरेश्वरी, which is incorrect. (11) B reads पीठिका. (12) B has द्विपदीरज. (13) नष्ट पिष्ट च शुष्कं तत्, a variant in B. नष्ट पिष्ट च शुष्कं च, a variant in D. (14) B reads रंध्रयित्वा पुटे. D and K read पुटं.

वेष्टयेद्देवदेवेशि गोलेन निगलेन च[1] ।
तुषकर्षाग्निना भूमौ मृदुस्वेदं तु कारयेत् ॥ ९७ ॥
अहोरात्रं त्रिरात्रं वा चूर्णं भवति शोभनम् ।
बद्धसंकलिकाभावात्[2] भवेद्वेधा तु वेधकम्[3] ॥ ९८ ॥
पुनरन्यं प्रवक्ष्यामि पट्टबन्धं[4] सुदुर्लभम् ॥ ९९ ॥
कासीसं[5] टङ्कणं क्षारं सैन्धवं गन्धमभ्रकम्[6] ।
सूतकं[7] मातुलुङ्गेन मर्दितं पुटवेधकम्[8] ॥ १०० ॥
वङ्गताराभ्ररसक[9]-स्नुक्क्षीरकृतगोलकम्[10] ।
वेष्टयेद्भूर्जपत्रेण वस्त्रसूत्रेण[11] वेष्टयेत् ॥ १०१ ॥
ऊर्द्ध्वाधो[12] गोमयं दत्त्वा भूमध्ये स्वेदयेत्ततः ।
मर्दनं स्वेदनं कुर्यात्त्रिवारानिवमेव च[13] ॥ १०२ ॥
लेपयेद्देशधर्माख्य[14] मर्दयेन्तुङ्काञ्जिकैः ।
धत्तूररससलिप्तायां मूषायां[15] संनिवेशयेत् ॥ १०३ ॥

---

(1) B reads वा. (2) B reads योगात्. (3) After this we find in K only the following incomplete śloka :—गंधताराभ्रसंयुक्तं स्नुही-क्षीरेण तालकं । वेष्टयेत् भूर्जपत्रेण..., which is found afterwards in B and D. (4) K reads पटबंधं. (5) D and K read कौशीसं. (6) D reads गन्धभ्राचकम्, which seems to be incorrect. (7) D wants सूतकं. (8) तस्य द्वे पुनर्वेधकम्, an absurd variant in D. K reads पटबंधकं. (9) D and K read वंगताराभ्रसंयुक्तं. (10) D and K read स्नुहीक्षीरेण ताल-कम्. (11) D reads वस्त्रं सूत्रेण. (12) D reads ऊर्ध्वं, which renders the charaṇa incomplete. (13) त्रीणि वाराणि सुन्दरि, a variant in D. त्रिणि वारांस्तथैव च, an incorrect variant in K. (14) D reads ह्रशधर्माख्य. K wants this. (15) B wants this.

बद्धा मूषामुखं[1] देवि सन्धिलेपं तु कारयेत् ।
लोणमध्ये क्षिपेन्मूषां वृहन्मूषां च[2] वाह्यतः ॥ १०४ ॥
मुखं तस्याश्च मूषाया बद्धा लोणमृदा ततः ।
तुषकर्षाग्निना भूमौ मृदुस्वेदं तु[3] कारयेत् ॥ १०५ ॥
अहोरात्रं त्रिरात्रं वा स्थिरधर्म्मा भवन्ति ते[4] ।
अनेनैव प्रकारेण सप्तवारं[5] तु कारयेत् ॥ १०६ ॥
अन्तर्वहिश्च बद्धास्ते[6] धर्म्मशुद्धा भवन्ति ते ॥ १०७ ॥
गन्धकेन हतं सूतं कांचीकासीससैन्धवम्[7] ।
क्षुद्रकं टङ्कणं गुञ्जा रविक्षीरेण मर्द्दिताः[8] ।
पुराणका भवन्त्याशु[9] धर्म्मकामार्थमोक्षदाः ॥ १०८ ॥
पञ्चभागं तु शुल्वस्य द्विभागं कुञ्जरस्य च ।
कारयेद्दलधर्म्मांश्च[10] लेपयेत् पूर्व्वयोगतः ॥ १०९ ॥
रसेन्द्रो रञ्जति[11] ह्येवं कर्त्तव्यं सारणादिकम् ।
तन्ममाचक्ष्व देवेशि किमन्यच्छ्रोतुमिच्छसि ॥ ११० ॥

---

(1) D reads मूखागतं, which is incorrect. (2) K reads वृहन्मूखा च, which is incorrect. (3) D reads च. (4) B reads तु. D reads स्थिरधर्मा भवन्ति ते. K reads वितधर्मा भवंति हि. (5) D has वारं वारं. (6) B reads विद्धास्ते. D reads वध्वाने, which is incorrect. (7) D and K have कांजिकाशीशसैंधवं. (8) D and K read मर्द्दयेत्, which seems to be improper here. (9) पुराणार्कंभयीस्यासु, a variant in D. पुराणका भयीत्यासु, a variant in K. Both seem to be incorrect. (10) कारयेद्दलधर्मांश्च, a variant in D and K. (11) B reads रंजते. K reads रंजिते, which is incorrect.

इति श्रीपार्व्वतीपरमेश्वरसंवादे[1]
रसार्णवे रससंहितायां
रसरञ्जनो नाम[2]
षोडशः पटलः ॥ १६ ॥

---

(1) B wants this portion. (2) B and D read रञ्जनो नाम. In the beginning of this Paṭala, the Goddess asks the द्रावण of रस to be explained and not रञ्जन ; the latter being the final subject.

# सप्तदशः पटलः ।

श्रीदेव्युवाच ।

द्रावणं रञ्जनं चैव पारदस्य श्रुतं मया ।
सारणं क्रामणं चैव क्रमादाख्यातुमर्हसि[1] ॥ १ ॥

श्रीभैरव उवाच ।

मूषां तु गोस्तनीं कृत्वा धत्तूरकुसुमाकृतिम्[2] ।
तदर्द्धं[3] पूरयेत्तैलं रञ्जितं च रसं क्षिपेत् ॥ २ ॥
तुषकर्षाग्निना वाह्ये मूषायास्तु[4] प्रदापयेत् ।
विंशांश[5]नागसंयुक्तं समावर्त्तं च खोटकम् ।
दीर्घसंदंशनेनैव[6] प्रक्षिपेत् सारितं भवेत् ॥ ३ ॥
द्विगुणेन ततो[7] हेम्ना जायते प्रतिसारितम् ।
ततस्त्रिगुणहेम्ना तु[8] जायते चानुसारितम्[9] ॥ ४ ॥

---

(1) D has an incorrect variant क्रमदच्चतुमर्हसि. (2) D and K have धत्तूरकुसुमाकृतिः, which is grammatically incorrect. (3) All the texts read तस्यार्धं, which is grammatically incorrect. D has an incorrect variant—तस्यर्धं तैसे पच्चैलं. (4) B reads मूषायां तु. D and K read मूखायास्तु, which is incorrect. (5) D reads विंशांशं. (6) B has दीर्घं संदर्शनं नैव. D and K have दीर्घंसंदर्शनेनैव. (7) D reads हतो, which is not correct. (8) B reads ततस्त्रिगुणं हेमा तु. This hemistich and the next two are not found in D. K reads ततस्त्रीगुण हेम्मा तु, which is incorrect. (9) B has चानुसारणा. K has नानुसारितः, which is incorrect.

तारस्य भागाश्चत्वारः[1] शुल्वभागास्त्रयस्तथा[2] ।
सम्यगावर्त्य देवेशि गुटिकैकां[3] तु निक्षिपेत् ॥ १९ ॥
अनेन क्रमयोगेण तारे ताम्रं[4] तु वाहयेत् ।
यावत्तु जायते रक्तं तारं चैव न संशयः ॥ २० ॥
अस्य भागद्वयं ग्राह्यं तारस्य भागपञ्चकम्[5] ।
हेमभागैकसंयुक्तं द्रुतं[6] हेमाष्टकं भवेत् ॥ २१ ॥
गन्धकेन हतं शुल्वं दरदेन समन्वितम् ।
आर्द्रकं मूलकं शुण्ठी लसुनं हिङ्गु माक्षिकम् ॥ २२ ॥
मर्दयेन्मातुलुङ्गेन[7] नागपत्राणि लेपयेत् ।
पुटेन म्रियते नागः सिन्दूरारुणसन्निभः[8] ॥ २३ ॥
तत्तारे त्रिगुणे व्यूढं[9] निर्बीजं कनकं भवेत् ॥ २४ ॥
गन्धपाषाणदरद-तीक्ष्णखर्परसूतकैः[10] ।
भागवृद्धैः समध्वाज्यैः[11] पञ्चमांशेन लेपयेत् ॥ २५ ॥
पुटनाच्छुष्कपुटनात्[12] द्विधा तारस्य कृष्णता[13] ॥ २६ ॥

---

(1) D reads चत्वारि, which is incorrect. (2) D reads शुल्वभागास्त्रयं तथा, which is incorrect. (3) D and K read गुटिकैका. (4) D and K read तारे ताम्रे. (5) B has तारभागस्य पंचकं. (6) D reads द्रुतं, which is incorrect. (7) K reads मातुलिंगेन. (8) B and D read सप्रभः. (9) B reads व्यूढ़ः. D reads व्यूढ़े. K reads ततसूते. (10) D reads सूतकाः, which is grammatically incorrect. K reads पाषाण in place of खर्पर. (11) B reads erroneously समध्वाज्ये. B reads भागवृद्धैः. (12) पुटेन तच्छुष्कपुटनात्, a variant in D. पुटयेत् शुष्कपुटनात्, a variant in K. (13) द्विधा नयस्यत्तकृता, an incorrect variant in D.

पीतगन्धकपालाश-निर्य्यासेन प्रलेपितम् ।
पुटत्रयप्रदानेन[1] रजतं काञ्चनं भवेत् ॥ २७ ॥
पीतकृष्णारुणगणं[2] यथालाभं सुचूर्णितम् ।
गोसर्पिर्भावितं तारे[3] वापेन श्वेतनाशनम्[4] ॥ २८ ॥
रक्तपीतासितगणं[5] छागक्षीरेण भूयसा ।
सप्ताहं स्थापयेत्तारे[6] निषेकाद्रक्तिवर्द्धनम्[7] ॥ २९ ॥
यदा वाप[8]निषेकाभ्यां मार्ज्जारनयनप्रभम् ।
तत्तारं दलसंप्रोक्तं[9] मेलनं परमं मतम् ॥ ३० ॥
शुल्वस्य[10] कांस्यकृष्णं तु रसकेन तु रञ्जयेत् ।
द्वौ भागौ तस्य शुल्वस्य तारस्यैकं च मेलयेत् ॥ ३१ ॥
तदा तस्य रसेन्द्रस्य मेलनं परमं मतम् ।
वेधयेत् शुद्धसूतेन[11] शतांशेन सुरेश्वरि ॥ ३२ ॥
हेममाक्षिकलवणं[12] पेषयेन्मधुसर्पिषा ।

---

(1) पुटवयं प्रयत्नेन, a variant in B, which seems to be incorrect. (2) D reads गतं instead of गणं. This charaṇa and the next five are not found in K. (3) गोसर्पिर्भावितातारं, a variant in B. (4) D has वामने श्वेतनाशनी, which has no clear sense. (5) B reads सितरुणं, which is evidently an error of the scribe. (6) B reads erroneously स्थस्येतरे. (7) निषेकाद्रक्ते वन्धनं, a variant in D, which is partly incorrect. (8) D reads incompletely यथा सं. K reads यथा वाप्य, which is not correct. (9) D and K read तदा तस्य रसेन्द्रस्य, which seems to be improper. (10) B reads शुल्वं तु. D reads शुल्वेन तु, which is incorrect. (11) B reads सिद्धसूतेन. (12) B reads हेममाक्षिकलोणं च.

कुङ्कुमाभं भवेद्यावत् तेन नागपुटे[1] पचेत् ॥ ३३ ॥
समं शुल्वं[2] ततो देयं तच्छुल्वं तारपञ्चके[3] ।
त्रिवारं शोधयेद्दत्त्वा शुद्धं हेमदलं भवेत् ॥ ३४ ॥
वङ्गं नागं तथा[4] तीक्ष्णं शुल्वं तारं च पञ्चकम्[5] ।
त्रिवारं शोधयेद्दत्त्वा शुद्धं हेमदलं भवेत्[6] ॥ ३५ ॥
तालकं गन्धपाषाणं[7] माक्षिकं खर्परं[8] विषम् ।
मातुलुङ्गयुतं[9] लिप्ता वङ्गलोहं पुटे पचेत्[10] ॥ ३६ ॥
दरदं गन्धपाषाणं माक्षिकं सैन्धवं विषम् ।
मातुलुङ्गयुतं लिप्ता तीक्ष्णलोहं[11] पुटे पचेत्[12] ॥ ३७ ॥
कुनटी गन्धपाषाणं माक्षिकं सैन्धवं विषम् ।
मातुलुङ्गयुतं लिप्ता नागलोहं पुटे पचेत्[13] ॥ ३८ ॥
सर्व्वं हेमदले वाह्यं[14] हेम वङ्गेन[15] वेधयेत् ॥ ३९ ॥

---

(1) D has तेषां नागपुटं. K has तेन नागपुटं. (2) B reads समशुल्वं. (3) B and K read तारपंचके, which seems to be incorrect. (4) K wants तथा. (5) This hemistich and the next one are not found in D. (6) This hemistich is not found in K. (7) D reads हेमपाषाणं. (8) B reads खर्परो. (9) K reads मातुलिंगयुतं. (10) D reads पुटं भवेत्, which seems to be incorrect. (11) K reads वंगलोहं. (12) After this śloka we find a śloka in B, which is a repitition of the 36th, having नागलोहं in place of वङ्गलोहं. (13) This śloka is not found in D. In K we see only the word कुनटी. (14) B reads वाह्यः. D reads सर्वं हेमदलो, which seems to be incorrect. (15) B reads हेम चानेन.

तुल्यांशौ हेमकरिणौ[1] तीक्ष्णं द्विगुणमेव च[2] ।
ध्मूढ़ं रक्तगणैः सिक्तं[3] तत्तारं कनकं भवेत् ॥ ४० ॥
शुल्वं ताप्यहतं[4] कृत्वा वरनागं[5] तु रञ्जयेत् ।
तं नागं वाहयेत्तारे यावद्धेमदलं[6] भवेत् ॥ ४१ ॥
विषं सूतसमं गन्धं[7] त्रिगुणाञ्जनसंयुतम्[8] ।
अम्लेन त्रिदिनं[9] पिष्ट्वा ताराकौं मेलयेत् समौ[10] ॥ ४२ ॥
पक्वं पञ्चमृदा चैव[11] पुटेत्तारावशेषितम् ।
एवं वारत्रयेणैव रञ्जयेत्तारमुत्तमम् ॥ ४३ ॥
भुजङ्गस्य[12] च शुल्वस्य पृथगंश[13]चतुष्टयम् ।
पृथग्द्वादशतैलस्य[14] रीतिकातारयोर्द्वयोः[15] ॥ ४४ ॥

---

(1) B reads तुल्यंशौ, which is incorrect. K reads erroneously हेमकर्णौ. (2) D has तीक्ष्णं त्रिगुणं भवेत्. (3) B reads रक्तगणै. D reads शिक्ये, which is incorrect. (4) B has शुल्वताप्यं हतं. (5) D reads तारेणोगं, which is unintelligible. (6) D has यावच्चासीदलं, which is incorrect. (7) विषं सूतं समं गंध, a variant in B and K. विषसूतसमं गन्धं, a variant in D. (8) B has त्रिगुणं अंजनसंयुत. D reads erroneously त्रिगुणं येन संयुतम्. (9) D reads त्रिगुणं, which is evidently an error. (10) ताराकं मेलयेत् समम्, a variant in B. नाकं मिलय तत्समम्, an incorrect variant in D. (11) D has पूर्ववदमृता चैव, which is partly correct. K has पक्वं पंचदमृता चैव, which is incorrect. (12) B reads भुजगस्य. (13) D and K read पृथगस्य. (14) पृथग्द्वादशतीलास्य, an incorrect reading in B. अप्यङ्गद्वादशतैलस्य, a variant in D. पृथक्द्वादशर्लोहस्य, a variant in K. (15) टौतिकातारयोर्द्वयोः, a reading in B. रीतितारकयोर्द्वयोः, a variant in D. K has an incomplete charaṇa—रीतिकातायोर्द्वयोः.

कनकस्य तु भागैकं हेमताराविशेषितम्[1] ।
मार्ज्जाराचिप्रभं देवि वरं हेमदलं भवेत् ॥ ४५ ॥
तारष्टकं ताम्रचतुष्कभागं[2]
नागद्वयं काञ्चनमेकभागम् ।
सर्व्वं ततो रक्तगणेन सिक्तं
तारावशेषं कनकं करोति ॥ ४६ ॥
राजावर्त्तं चतुर्थं च[3] दरदञ्च प्रवालकम् ।
हेममाक्षिकसंयुक्तं समभागानि कारयेत् ॥ ४७ ॥
रसकस्य[4] त्रयो भागा मेषीक्षीरेण[5] मर्द्दयेत् ।
वटिकां कारयेत् पश्चात् छायायां शोषयेत्ततः ॥ ४८ ॥
पञ्चद्रावकसंयुक्तां शिलापट्टेन पेषयेत् ।
अनेन सिद्धकल्केन तारारिष्टं तु योजयेत्[6] ॥ ४९ ॥
प्रथमे[7] समकल्केन द्वितीये तु तदर्धकम् ।
तृतीये पादभागेन तारारिष्टं तु जायते ॥ ५० ॥
पत्रे दाहे कषे च्छेदे[8] हेम तच्चाक्षयं भवेत् ॥ ५१ ॥
सूतकं दरदं ताप्यं गन्धकं कुनटी तथा ।
गृहीत्वा क्रमवृद्ध्या तु शुल्वपत्राणि लेपयेत् ॥ ५२ ॥

---

(1) D reads हेमतमावशेषितम्, which is not correct. (2) K reads ताम्रचतुष्कभागे. (3) D reads राजावर्त्तंचतुर्थं च. (4) K reads कारकस्य, which is incorrect. (5) मजाक्षीरेण in D, which is incorrect. (6) B reads तु जायते. (7) B, D and K read प्रथमं ; but this is not accurate. (8) D reads छेदे, which seems to be incorrect.

चाङ्गेरीस्वरसे[1] पिष्ट्वा दापयेत्[2] पुटपञ्चकम् ।
तच्चूर्णं वाहयेत्तारे हेमाकृष्टिरियं[3] भवेत् ॥ ५३ ॥
कनके[4] योजयेद्देवि कृष्णवर्णं भवेत्ततः[5] ॥ ५४ ॥
गोमूत्रेण[6] निशां पिष्ट्वा शुल्वमावर्त्त्य[7] सेचयेत् ।
शतधा शोधनेनैव भवेत् काञ्चनतारकम् ॥ ५५ ॥
अथ कांस्योद्धृतं[8] ताम्रमारोटमथवा प्रिये ।
षड्गुणेन तु नागेन[9] शोधयित्वा ततो बुधः[10] ॥ ५६ ॥
शतार्द्धं सिन्धुवारस्य रसमध्ये तु ढालयेत् ।[11]
कुष्माण्डस्य रसे[12] पश्चात् सप्तवारं तु दापयेत् ॥ ५७ ॥
तथा तक्रे निशायुक्ते तप्ततप्तं च[13] दापयेत् ।
शुकतुण्डकिंशुकाभं छेदे रक्तं मृदुं तथा[14] ॥ ५८ ॥

---

(1) D reads श्वरसे, which is an error of the scribe. (2) K reads चपयेत्, which has no sense. (3) D reads हिमकष्टिरयं, which is incorrect. K reads हेमकृष्टिरिउं. (4) B reads कनकेन, which destroys the metre. This hemistich is not found in D. (5) K reads भवेत्तु वा. (6) D reads गोमूत्रे, which mars the metre. (7) D reads शुल्वमावर्त्तं, which is incorrect. (8) D reads कांस्योद्दृतं. K reads कांस्योधनं. Both the readings are incorrect. (9) षड्गुणेन तुल्यांशेन, a variant in D. (10) B reads ततो नधः, which is incorrect. (11) After this 18 ślokas ( 57—74 ) are wanting in B. (12) D reads कुष्माण्डकरसे. K reads कुष्माण्डस्य रसं, the latter being incorrect. (13) D has पुनस्तचैव. K has तप्ततप्तैव, which is grammatically incorrect. (14) छेदैरक्तमृदईस्तथा, an incorrect variant in D. K reads मृदुस्तथा.

ताप्येन वाप्यं कृत्स्नं तत्[1] शुल्वं कालिकया गतम्[2] ॥ ५९ ॥
दरदं किंशुकरसं रक्तचित्रकमेव च ।
हरिद्रे[3] द्वे वरारोहे छागमूत्रेण पेषयेत् ॥ ६० ॥
दद्यान्निषेचनं[4] शुल्वे सप्तवारं न संशयः ।
शुल्वं सिन्दूरवर्णं च वरं[5] हेमदलं भवेत् ॥ ६१ ॥
द्विगुणौ तीक्ष्णभुजगौ घोषकृष्णं[6] तु वाहयेत् ।
अथवा यन्त्रकारस्य[7] चैकद्वित्रिपलक्रमात्[8] ॥ ६२ ॥
